कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

२०

दामृगयात्री क्लोलोलुपः [illegible] चिन्ता गहनं घोरं वल्केन महताहतः ॥२१॥ तत्र विद्याधरैश्चित्रि कान् गंधर्वा
न्॥ [illegible] वक्त्रांश्च मृगेंद्रान् महिषान् मृगान् ॥२२॥ सारथी मृगयासक्तो गहने दंशितश्चसन् ॥ वल्कनाकं
नानिचारवरं ॥२३॥ तस्यानुजः [illegible]वाविष्टः स्थित्वा दूरे तिरोहितः ॥ भ्रातरं निहतं राज्ञा वीक्ष्य तया वेतसा ॥२
होरवल्लेषदुर्धर्षो देवनारक्षसामपि ॥ ख्यप्रतेनैव जेतव्यो ममन्त्राकृष्टो न चान्यथा ॥२५॥ इति विश्वसिता राक्षसोमा
कृतिः ॥ आससाद नृपश्रेष्ठ मुपानइव मन्निमान् ॥२६॥ तविनम्रततिदृष्ट्वा स्पृयतां कर्तुमागतं ॥ वक्रेमयासाध्यमुप
महीपतिः ॥२७॥ अथ तस्मिन् नेरागा किं चिन्ता ख विहस्य सः ॥ भिव चोमृगयां हित्वा स्वां पुरीं पुनरायया ॥२८॥ तं
रव्यस्पदम यं तीतिनामतः दमयन्ती नलस्येव विहिता वल्लभा सती ॥२९॥ एतस्मिन् समये राजा निर्यन्त्र नत्विं
पुंगव महामिन्ये संप्राप्तेऽभ्र वासरे ॥०॥ रक्षसा क्रूररूपेण अभिलिखितं न नराधिपं ॥ शाकम्भरं पुर क्षिप्तं हृद्
धिक् धिक् नराधिपं राजा त्वयैदं ख्या कारिणा ॥ खड्गेनोपहतं मम स्यमतोऽर क्षोऽविषयासि ॥३२॥ रक्षः क्रूरं ॥
रुस्ततः ॥ पुनर्विनृप सोपं वक्रार खड्गाद्धिवं ॥३३॥ राजापि कुपितः प्राहयादंत्वमनवेष्टितं ॥ अः

स्कंद

Acc. No. ~~1675~~ M998
Title :- स्कन्दपुराण
Author :- वेदव्य
Subject :- पुराण
प्रत :- (136)

(1)

87 क्रमांक पुस्तक (कोन्या) वर होता

K K S U LIBRARY
RAMTEK
441 106
M998
Dist Nagpur

Checked 2012

रणं स्मरणा ॥ ९ ॥ अतो दुर्लभमं मन्ये चैव शिवदर्शनं ॥ सुदुर्लभतरं तत्रऽर्चनं परमेश्वितुः ॥ १
न्नं पुण्यराशिविपाकं ॥ ज्ञस्य वा पुनस्तत्र बिल्वपत्रार्चनं विभोः ॥ १ ॥ वर्षाणामयुतं
मवेत्र ॥ सकृद्बिल्वार्चनैरेव तत्फलं लभते नरः ॥ ११ ॥ यानि कानि च पापानि भिन्नानि च युगे युगे ॥ मा
तुर्दश्यां तानि नश्यंति सर्वशः ॥ १२ ॥ एतानेव प्रशंसंति लोके ब्रह्मादयः सुराः ॥ मुनयश्च वशिष्ठाद्या मा स्थितत्र तुहर
यत्रोपवासः केनापि हतः केनु रतस्य वै ॥ रात्रौ जागरणं पुण्यं कल्पकोटिशताऽधिकं ॥ एकेनाबिल्वपत्रेण शिव ाऽर्चनं कृत
लोक्यां तस्य पुण्यस्य को वा संख्यां मिच्छति ॥ १५ ॥ अत्राऽनुवर्ण्यते पुण्या गाथा परमशोभिना ॥ गोपनी कण्याौ
काश्रिता ॥ १६ इक्ष्वाकुवंशजः श्रीमान् राजा परमधार्मिकः ॥ आसीन्मित्रसहो नाम श्रेष्ठः सर्वधनुर्भृतजासवह
णामिवक्ष्मः कृतिपारगः ॥ वीरोऽनंतबलोत्साहो नित्योऽहेगोदयाऽन्वितः ॥ १७ ॥ पुण्यानामिव संघातस्तेन ॥ अ
[illegible] विराजते ॥ १८ ॥ हृदयं दयया क्रांतं क्रियाकांतं च तद्वपुः ॥ वरणीयस्य सामंतरुज्जमणि ॥

②

प्यविज्ञक्रतुपथ... ...डसमाप्तिष्पप्नांवंदनचीतच्छां ॥ संतोषंपरमंलेभेनिस्व:
वैदेषणनिषनुराज्ञशास्त्रावतंसोपमघ्यांतकारी ॥ पंचाक्षरस्यैवमहाप्रभावो मयासमासात्कथितस्
॥४॥ शिवमस्तु ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेशिवपंचाक्षरीमाहात्म्यंनामप्रथमोऽध्या
॥ सूतउवाच ॥ अथान्यदपिवक्ष्यामिमाहात्म्यंत्रिपुरद्विषः ॥ श्रुतमात्रेणयेनाशुच्छिद्यंतेऽर्घं
नास्तिकिंचित्पापविशोधनं ॥ सर्वाःसंकटंशमीमत्सर्वकामार्थसाधनं ॥ दीर्घायुर्विजयारोग्यं
यशोज्ञानन्यतावेनमहेश्वराराधनंपरं ॥ ३ ॥ ...र्णामपिक्षुद्राणामल्पानांमहतामपि ॥ एतद
शोधनं ॥ ४ ॥ महामुनिविनिर्दिष्टैः प्रायश्चित्तैरथोत्तमैः ॥ सर्वकालेष्वशेषघनाम... यत्कारा
यः सर्वशास्त्रविनिश्चितं ॥ यत्कृत्वापरमेशस्य श्रीपतेःपतनंमहत् ॥ ५ ॥ नास्ते... नतावापि द
किंचिदपिदेवायक्षत्रंकर्मविमुक्तिदं ॥ ६ ॥ मासेषुकार्तिकवतुर्दश्यानुपवा... तद्दुर्लभं ॥ तत्रापिदुल

५७

सहस्रशः॥ दृष्ट्वा तद्वायसकुलं हस्यमानं सुविस्मितौ॥ सपत्नाव राजमो [illegible] तं पर्यपृच्छ

यैकस्य जातं शरीरतः॥ वायसानां कुलं जातं चैतेषं वा शरीरभुक्तं॥ भ्रमन्ति ये गुरु

भष्यतो ३ चं॥ त्वत्संगमे सति न यथाद्वेमे तत्साधु भाषितं॥ गर्ग उवाच॥ राजन् भवसहस्रेषु भवंतौ पापि

रंतादि संति पापान्यनेकशः॥ तत्र जन्मसहस्रेषु संति पुण्यानि यानि वै॥ तेषामाधिक्यतः क्वापि जायते पु

थापापीयसां योनौ कर्मविपाकेन गच्छति॥ साम्ये जन्मो भययोः साम्ये मानुषीं योनिमागतौ॥ चैवां एवं

दा तेहृदये गता॥ अघानां कोटयस्त्वचः काकरूपेण निर्गताः॥ कोटयो ब्रह्महत्यानाम

पत्तियस्तु रापाहरणहत्यादि कोटय॥ तैव कोटिसहस्रेषु येन्ये पातकराशयः॥ क्षणाद्भस्मीभवसे

गाधराजेंद्र दग्धाः पातककोटयः॥ अनयालहरता [illegible] विहरस्व यथासुखं॥ सूत उवाच॥

पदिश्यवान्॥ ताभ्यां विस्मितश्चिताभ्यां विस्मितः स्वगृहे ययौ॥ पूर्वमप्युत्ताप्य मुदितौ॥

(4)

तन्वंगीमनोनयननंदिनी ॥ बाळेंदुशेखरां स्निग्धनीळकुंचितकुंतळां ॥ भृंगसंघातरुचिरं नीळालकविराजितां ॥ मणि
कुंडलविद्योतमुखमंडळविभ्रमां ॥ नवकुंकुमपंकांककपोळतळदर्पणां ॥ माधुरस्मितभ्राजदरुणाधरपल्लवां ॥ १७
कंबुकंठीं शिवामुद्यत्कुचपंकजकुड्मळां ॥ पांशांकुशाभयवरैर्विलसंतीं चतुर्भुजां ॥ अनेकरत्नखचितकंकणांगणमुद्रिकां ॥
त्रिवळीवलयां हृद्यां हेमकांचीगुणान्वितां ॥ दिव्यमाल्यांबरधरां दिव्यचंदनचर्चितां ॥ दिव्याभरणितां मौळिसंन्नतां ॥
सरोरुहां ॥ रत्नसींहासनासीनां सर्वराजपरिच्छदां ॥ एवं ध्यात्वा महादेवं देवीं च जगदंबिकां ॥ न्यासक्रमेण संपूज्य देव
गंधादिभिः क्रमात् ॥ पंचभिर्ब्रह्मभिः कुर्यात्सोक्तस्थानेषु वा हृदि ॥ पृथक्पुष्पांजळिं देहे न वह्नि त्रिधा ॥ पुन
शिवोक्त्वा मूळमंत्रेण साधकः ॥ ततः संपूजयेद्देवं बाह्यपीठे पुनः क्रमात् ॥ संकल्पं प्रजपेत्तत्र [illegible] पं[illegible] तेः ॥ [illegible] करं ॥ ३.
पुरोक्त्वा चिंतयेत्तत्र हृदि शंकरं ॥ सर्वपातकदौर्भाग्यदारिद्र्यादिनिवृत्तये ॥ अशेषाः पविनानाय[illegible] महपार्वपातक
संतप्तं संसारभयपीडितं ॥ बहुरोगाकुळं दीनं पाहि मां वृषवाहन ॥ आगच्छ देवदेवेश महादेवा

5

रोकृत्वावाग्यतोनियमान्वितः॥कृतसंध्याजपविधिःशिवपूजांसमाचरेत्॥देवस्यपुरतःसम्यक्उपलिप्य॥विधायम
रम्यंधौतवस्त्रादिभिर्बुधः॥वितानाद्यैरलंकृत्यफलपुष्पनवांकुरैः॥विचित्रंपद्ममुध्दसपंकथाकं॥तत्रो
ष्ठलेसुपविष्टःस्थिरासने॥सम्यक्संपादिताशेषपूजोपकरणःशुचिः॥आगमोक्तेनमंत्रेणने यत्र॥
शुद्धिंचकृतभूतशुद्धिमनुक्रमात्॥प्राणायामत्रयंकृत्वाबीजमंत्रैर्यथाविधिः॥मातृकान्यस्यविधिने स्वातांदेवतापरा॥
प्यमातृकांहृदयेध्यात्वादेवंपरंशिवं॥वामभागेगुरुंध्यात्वादक्षिणेगणपंयजेत्॥अंसायोर्युगगोश्चन्यासैर्नाभिस्यपार्श्व
योः॥अनंतादीन्यनंतादीन्हृदिपीठमनुन्यसेत्॥उक्तक्रमेणविन्यस्यहृत्प्रदेसाधुम्राविते वन्हिकिसमेरम्येध्याये
वमुमापतिं॥चंद्रकोटिप्रतीकाशंत्रिनेत्रंचंद्रशेखरं॥आपींगलजटाजूटरत्नमौलिविराजितं॥नीलग्रीवमुदारांग
ताराहारेणशोभितं॥वरदाभयहस्तंचहरिणंचपरस्वधं॥दधानंनागवलयंकेयूरांगदमुद्रिकं॥व्याघ्रचर्मपरीधानंर
त्नसिंहासनेस्थितं॥ध्यात्वातद्वामभागेचचिंतयेद्गिरिकन्यकां॥भास्वज्जपाप्रसूनाभामुदयासमप्रभां॥विद्युत्पुंजनिभां

भक्त्या प्रार्थयंती महेश्वरं ॥ शृण्वती सत्कथां पुण्यां कर्मबंधसमाछिनत् ॥ अथ कालेन सा ना-
री समुत्सृज्य कळेवरं ॥ महेशानुचरैर्नीता जगाम शिवमंदिरं ॥ तत्र देवैर्महादेवं सेव्यमानं नुत-
नैः ॥ गणेशनंदीभृंगीशबाण चंडीश्वरादिभिः ॥ उपास्यमानं गौरीशं कोटिसूर्यसमप्रभं ॥ त्रि-
लोचनं पंचवक्त्रं नीलग्रीवं सदाशिवं ॥ वामांगे बिभ्रतं गौरीं विद्युत्पुं[illegible]समप्रभां ॥ दृष्ट्वा सा ससंभ्र-
नारी सा प्रणम्य पुनः पुनः ॥ आनंदाश्रुजलैर्युक्ता रोमहर्षमनन्वृता ॥ [illegible] नि[illegible]
वं स्पाशं करेण च ॥ तस्मिन्लोके परानंदघने ज्योतिषि शाश्वते ॥ लेभ्वानि वा [illegible]
रवमनाहतं ॥ सा कदाचिदुमादेवीमुपगम्य प्रणम्य च ॥ पर्यपृच्छत मे भक्त्ता का[illegible]
तामुवाच महादेवी स ते भर्त्ता द्विजाधमः ॥ भुक्त्वा परमदुःखानि विंध्ये जातः पिशाचकः ॥ पुनः प-
प्रच्छ सा नारी देवीं त्रिभुवनेश्वरीं ॥ केनोपायेन मे भर्त्ता सद्गतिं प्राप्नुयादिति ॥ श्रीदेव्युवाच ॥
सोस्मत्कथां पुण्यां कदाचिच्छृणुयादपि ॥ निस्तीर्य दुर्गतिं सर्वां निजं लोकं प्रयास्यति ॥ इति गौर्या व-
चः श्रुत्वा सा नारी विवर्तांजलिः ॥ प्रार्थयंती महादेवीं भर्त्तुः पापविमुक्तये ॥ तया जगुः प्रार्थम-
ना सा गौरी करुणाप्लुता ॥ तुंबरुं नामगंधर्वं समाहूयेदमब्रवीत ॥ तुंबरो गच्छ भद्रं ते विंध्यद्रौ त्वं

⑦

यांश्च त्वामनुजः सद्यः त्यजेद्विषयवासनां ॥ तस्याश्चित्तं यदा शुद्धं वैराग्यपरसुधारयः ॥ तदुवाच द्विजः
शैवीं कथां भक्तिसमन्वितां ॥ यथा यथा मनस्तस्याः प्रसादमधिगच्छति ॥ तथा तथानुतेनैः शंभो ध्यान
योगमुपादिशत् ॥ शनैः शनैर्ध्वस्वरस्तमोमलं विमुक्तसर्वेंद्रियभोगविभ्रमं ॥ विशुद्धसत्वं हृदयं द्विज
स्त्रियो विवेशाविश्वरयोगचिंतनं ॥ इत्थं स कुरु माश्रित्य सा नारी प्राप्तसंगतिः ॥ दध्योर्गुरुमुखः शंभो
श्चिदानंदमयं वपुः ॥ नित्यं तीर्थजलैः स्नात्वा जटावल्कलधारिणी ॥ भस्मोद्धूलितसर्वांगा रुद्र
क्षकृतभूषणा ॥ शिवनामजपासक्ता वाग्यतामितभोजना ॥ बद्धपद्मासन [illegible] प [illegible] स्तपा
श्रवणोत्सुका ॥ गुरुशुश्रूषणापरा त्यक्तापत्यसुहृज्जना ॥ ग्रिरूपपरिष्टमार्गेण । [illegible] केदेप
यत् ॥ विश्वेशविश्वविलयस्थितिमन्महेतो विश्वैकवंद्यत्रिदिवेश । [illegible] र्तं [illegible] श्वपधः
कालविपरीतगुणावभासश्रीमन्महेशममदेहि कृपाकटाक्षं । [illegible] ः राज्ञांककृतशे[illegible]
तमस्तैं गंगाधराणां करवरार्चितपादपीठं ॥ नागेंद्रभूषणमगेंद्रनिकेतनेशा भक्तार्तिहन्मां
निवेहि कृपाकटाक्षं ॥ श्रीविश्वनाथ करुणाकर भ्रकृपाणेश्च भूतेशभ्रगत्रिभुवनेश त्रयगीतकं
तैः ॥ श्रीनीलकंठमदनांतक विश्वमूर्ते गौरीपते मयि निधेहि कृपाक्षे कटाक्षं ॥ इति प्रतिदिने

8

रुंधतिशापात्पुराहं ॥३४॥ इत्युपोन्नछिमादाय गुरुं चान्तुसमुद्यत ॥ पतितापादयोस्तस्य दमयंती न्यवारयत् ॥३५॥ निर्दृन
स्तस्यावचनगोरवात् ॥ तसाज यादयोरेतः प्राह क स्त्वमपतां गतौ ॥३६॥ कस्मिषां भ्रिरितिरव्यातस्ततः [illegible] तेपाणि
६३ रुच्छापेनराक्षसोवनगोचर ॥३७॥ सविप्रश्वसंरूपं च्छात्रान्तं कमयमोपमं ॥ नरवदार्दातोध [illegible] स्यमानुष
सकदाचिद्वनेक्कापि रममाणौ चिरोरकौ ॥ अपश्यदंतकाकारे नवोढां मुनिदंपती ॥३८॥ [illegible] घोरायं मानुषाहारो किंरो
मुनिनंदनं ॥ क्रुद्धं तत्याह शापात्तेव्या घोमगरिण्डं यथा ॥४०॥ कन्येयं हीत्वा भर्त्तारं दृष्ट्वा पीता पतिव्रता ॥ उवाच करुणं वा
ळारुदितीस्त्वतिवेपिता ॥४१॥ सोभामामाव्यथा पापं स्पर्वं राक्षसो धर ॥ दमयंतीपतिस्त्वा हि राजेंद्रानन्नु राक्षसः ॥४२॥ नरवा
दमम भर्त्तारं प्राणान्प्रियतरं विभो ॥ आच्छिनांकारणाच्छीनात्वमेवहिय तोगतिः ॥४३॥ पापानामिव संघातैः किं मे दुः
जडात्सुखिः ॥ देहेन वा तिमारेण विना भर्त्रा ममात्मना ॥४४॥ बाळोयं वेदनिष्णातो तपस्वी बहुशास्त्रवित् ॥ अतोऽस्य [illegible]
नेन जगद्रक्षा कृतात्वया ॥४५॥ कृपां कुरु महाराज बाळायां ब्राह्मणस्त्रियं ॥ अनाथ कृपणा चेर्पु सघृणा रव

साधवः॥ इत्थमप्यर्थ्यमानोपि पुरुषादः स निर्घृणः॥ चखादशिर उत्कृत्य विप्रपुत्रं दुराशयः॥ ४३॥ अथ
साध्वीह्युरोदीनाविलप्यार्श्चादुःखिता॥ विप्रस्य तनुरस्थीनि चितां चक्रे यथोचितां॥ ४४॥ भर्तार
मनुगच्छतीश्चविश्रांतिंहुताशनं॥ राजानंराक्षसाकारं शापास्त्रेण जघानतं॥ ४५॥ रे पार्थिव पापात्मन्
त्वयामेऽरक्षितःपतिः॥ अतःपतिव्रतायास्त्वं शापंतुक्ष्वविशोल्वणं॥ ४६॥ अद्यप्रभृतिनारीषुयद
त्वमपिसंयतः॥ तदामृतिस्तेवेस्मच्छाविषेराज्वलनंसता॥ ४७॥ सोऽपिराजागुरोःशापमनुभूययथावि
दि ४ धिः॥ पुनःस्वरूपमास्थायस्वगृहंमुतोययौ॥ ज्ञात्वाविप्रसतीशापंतस्यस्त्रीरतिलालसं॥ पतिंनिवारय
सष्ववैधव्यादितिबिभ्यती॥ अनपत्यस्तुनिर्विण्णोराज्यभोगेषुपार्थिवः॥ विसृज्यसकल
पिकानने॥ सोपिवैःप्रार्थितश्चैववसिष्ठेनमुनिसत्तम॥ तस्याप्रसादयामासदमयन्त्यांसुतोतै
ष्यराज्योराजापिविचारसकलामहीं॥ आयांतीपश्चतोपश्यसिराविघोरत्नाधिं॥ सोपि

तीघोरा ब्रह्महत्यादुरत्यया ॥ यद्वासौ शापविध्वस्तो मुनिपुत्रमभक्षयत् ॥ ५६ ॥ तेनात्रकर्मणायांती ब्रह्मत्यांव [illegible]
पृष्ठतः ॥ बुभ्रो ऽमुनिवर्याणामुपदेशेन भूपतिः ॥ ५७ ॥ तस्यानिर्वेशमन्विच्छन् राजा निर्विण्णमानसः ॥ ना
नाक्षेत्राणि सर्वाणि विचचार बहुवत्सरं ॥ ५८ ॥ यदा तीर्थेषु सर्वेषु स्नात्वा चापि चमुकुर्मुकुः ॥ न निवृत्ता चाब्रलहत्सा
मिथिलामाययौ ततः ॥ ५९ ॥ बाह्योद्यानगतस्याथ चिंतया परयार्दितः ॥ ददर्श मुनिमायांतं गौतमं विमला
शयं ॥ ६० ॥ कृतार्थं नमिवाशेषतपस्वीजनसेवितं ॥ विवस्वंतमिवाशेषध्वांतदोषतमोनुदं ॥ ६१ ॥ शशांकमि
वनिःशंकमवदातगुणोदयं ॥ महेश्वरमिव श्रीमद्विद्वज्जनकलाधरं ॥ ६२ ॥ शांतं शिष्यगणोपेतं तपसामे
कभाजनं ॥ उपसृत्य स राजेंद्र प्रणनाम मुहुर्मुहुः ॥ ६३ ॥ गौतमोपि मुनिश्रेष्ठो राज्ञानं तं विवर्णजं ॥ अति
नंद्यमुनिः प्रीत्यासाविस्मयः समभाषत ॥ कच्चित्तेकुशलं राजन्कच्चिद्व्याहतं पदं ॥ कुशलिन्यः ॥

अधमा नार

नाः कश्चिद्दरिद्रो धन्य नोपि वा ॥ ६५ किमर्थमिह संप्राप्तो विहस्य सकलांश्रियं ॥ किमेव ध्यायसि श्रां
तो दीर्घमुष्णं च निश्वसन् ॥ ६६ राजोवाच ॥ ॥ सर्वैकुशलिनो ब्रह्मन् वयं त्वदनुकंपया ॥ त
थापुत्रमवद्रूपानां ब्राह्मणसास संपदां ॥ ६७ किमांसुबाधते त्वेणापि रात्रीघोररूपिणी ॥ अलब्धिता
यदपैर्क्लृपर्यंती पदेपदे ॥ ६८ यन्मयात्रासपद्म धेनकृतमं होदुरत्ययं ॥ नराणां निर्जायितेतस्य प्रायश्चित्तैः सहस्रकैः ॥ ६९ इ ॥७॥
ष्टाश्च विविधा यज्ञकोटयः सर्वस्वदक्षिणाः ॥ सरित्सरांसि स्नातानि यानि पुण्यानि भूतले ॥ ७० निसेवितानि तीर्थानि स
र्वाणि भ्रमतामया ॥ जप्तान्यपि च मंत्राणि ध्याताः सकलदेवताः ॥ बहुव्रतान्यचीर्णानि पर्णान्सफलफलाशिना ॥ ना
नि सर्वाणि कुर्वती स्वच्छं मां न कदाचिन्नं ॥ ७१ अद्यमे सफलं जन्म भवद्दर्शनलप्स्यते ॥ यतस्त्वद्दर्शनादेव ममानंदभागरू
॥७ र ॥ अन्विच्छन्नलभ्यते कापि वर्षद्युगैर्मनोरथं ॥ इत्यायं जनगदोपि मयी प्राप्तोद्वि ससतौं ॥ ७४ प्राग्जन्मसंचितानां तु पुण्या
नामुदयोदये ॥ यद्भवान्भवश्रीना नां ज्ञातानयनगोचरं ॥ अस्मदेरागादि हागतस्त्वं भवभयापह ॥ दूरभ्रमण

१२

भ्रांतं मन्ये त्वामिह चागतं ॥ दृष्ट्वा त्वां यमिवास्य र्थं मुदितोस्मि सुखश्रिया ॥ आनंदयसि मे चेतः प्रेम्णा संभाषणादिना ॥२७॥
अद्य मे तव पादाब्जं शरण्यस्य च तेन सः ॥ स्नातं कुरु महाभाग येनाहं सुखमाप्नुयां ॥७६॥ इति तेन समादिष्टो गौतमः करु
णानिधिः ॥ समादिदेश घोराणामघानां साधु निष्कृतिं ॥७७॥ गौतम उवाच ॥ ॥ साधु राजेंद्र धन्योसि महाऽपोत्र
यं सत्तः ॥ शिवे चातरिभक्तानां भयं तारणेषिणां ॥ शृणु राजन्महाभाग क्षेत्रमन्यत्प्रतिष्ठितं ॥ महापातकसंहारि गोकर्णाख्यं
मनोहरं ॥ यत्र स्थिति निष्पापानां महस्योमहान्तामपि ॥ ह्रत्वैवाशेषपापघ्नोयं यत्र संनिहितः शिवः ॥८२॥ यथा कैलासशिखरे यथा
मंदरमूर्धनि ॥ निवासो निश्चितः शंभोस्तथा गोकर्णमंडले ॥८३॥ अग्निनानवाग्नां के न नताराग्यह नायके ॥ तमो विदीर्यते सम्य
क् यथा सवितृदर्शनात् ॥ तथैव नेतरैस्तीर्थैर्नव क्षेत्रैर्मनोरमैः ॥ सद्यः पापविशुद्धिः स्याद्यथा गोकर्णदर्शनात् ॥८५॥ अपि पापशतं
कृत्वा ब्रह्महत्यादिमं नरः ॥ सप्तविरूप गोकर्णं न विभेति यमः क्वचित् ॥८६॥ तत्र पूर्वं महात्मानस्तपसा सिद्धिमागताः ॥ इंद्रोपेंद्रवि
रिंच्याद्यास्तपसा सिद्धिकांक्षिणः ॥८७॥ तत्रैकेन दिनेनापि यत्कृतं तत्र तमुत्तमं ॥ यच्चान्यत्राब्दलक्षेण ततो भवति संस्मृतं ॥८८॥ यत्रै

13

द्रब्रह्मविष्ण्वादिदेवानां हितकाम्यया ॥ महाबलाभिधानेन देवः संनिहितः शिवः ॥ ८९ घोरेण तपसा लब्धं रावणाख्येन
रक्षसा ॥ तल्लिंगं स्थापयामास गोकर्णे गणनायकः ॥ ९० इंद्रो ब्रह्मा मुकुंदश्च विश्वेदेवा मरुद्गणाः ॥ आदित्या वसवो रुद्राश
शांकश्च सतारकः ॥ ९१ एते विमानगता ये देवास्ते सहपार्षदैः ॥ पुरद्वारि निषेवंते तस्यैव प्रीतिकाम्यया ॥ ९२ तथैव मुनयः साध्या
वल्कलाजिनवाससः ॥ दंडिनो व्रतिनो मुंडाः स्नातका ब्रह्मचारिणः ॥ ९३ सर्वेऽस्थिमात्रावयवा तपसा दग्धकिल्बिषाः ॥
सेवंते परया भक्त्या देवदेवं पिनाकिनं ॥ ९४ यथा देवाः सगंधर्वाः पितरः सिद्धचारणाः ॥ विद्याधराः किंपुरुषाः किंनरा गुह्य
काः खगाः ॥ ९५ नागाः पिशाचा वेताला दैतेयाश्च महाबलाः ॥ नानाविभवसंपन्ना नानाविधविभूषणाः ॥ ९६ विमानैः सूर्यसंका ॥ ८ ॥
शैरग्निकल्पैः शशिप्रभैः ॥ ९७ विद्युत्स्फूर्जनचिरस्थैः समंतात्परिवार्यते ॥ प्रस्तुवंति च गायंति पठंति प्रणमंति च ॥ ९८ प्रहसंति
धि प्रहृष्यंति गोकर्णे पृथिवीपते ॥ ९९ लभंतेऽभीप्सितान् कामान् रमंते च यथासुखं ॥ गोकर्णसदृशं क्षेत्रं नास्ति नास्ति जग
त्त्रये ॥ १०० ॥ तत्र घोरं तपस्तप्तमगस्त्येन महर्षिणा ॥ तथा सनत्कुमारेण प्रियव्रतसुरैरपि ॥ अग्निना देववर्येण

15

कंदर्पेण च पार्थिव ॥ तथा देव्या भद्रकाल्यां शिशुमारेण भास्वता ॥ दुर्मुखेन फणींद्रेण मणिनागाह्वयेन च ॥ विभीषणे
न पुण्येन च कुंभकर्णाह्वयेन च ॥ काळाववोदिभिर्गोरकिडेन च बळीयसा ॥ राक्षसाराव(णे)नापि तपस्तप्तं महात्मना ॥ एते
चान्ये च गिर्वाणाः सिद्धचारणमानवाः ॥ गोकर्णे देवदेवेशं शिवमाराध्य भक्तितः ॥ स्वनामांकानि लिंगानि स्थाप
यित्वा सहस्रशः ॥ लेभिरे परमां सिद्धिं तथा तीर्थानि चक्रिरे ॥ अत्रस्थानानि देवानां सर्वेषां संति पार्थिव ॥ विष्णोश्च देवदे
वस्य ब्रह्मणः परमेष्ठिनः ॥ इंद्रस्य कार्तिकेयस्य गजवक्त्रस्य वायोश्च ॥ धर्मस्य क्षेत्रपालस्य दुर्गायाश्च महामते ॥ गोकर्णे
शिवलिंगानां तीर्थानामपि भूरिशः ॥ वर्ण्यंते च पुरा राजन्नपुराणेषु महर्षिभिः ॥ असंख्यातानि तीर्थानि तिष्ठंति च पदे पदे ॥
बहुनात्र किमुक्तेन गोकर्णस्थानि पार्थिव ॥ सर्वाण्यप्रमाणि लिंगानि तीर्थान्यंभांसि सर्वशः ॥ गोकर्णे शिवलिंगानां तीर्थाना
मपि भूरिशः ॥ वर्ण्यंते च पुरा राजन्नपुराणेषु महर्षिभिः ॥ गोकर्णकोटितीर्थं च तीर्थानामुत्तमं गतं ॥ सर्वेषां शिवलिंगानां सार्वभौ
मो महाबलः ॥ कृते महाबलः श्वेतस्त्रेतायामतिलोहितः ॥ द्वापरे पीतवर्णश्च कलौ श्यामो भविष्यति ॥ आक्रांतसप्तपाताळकुहरो
पि महाबलः ॥ प्रायः कलौ युगे घोरे स्फुटतामुपयास्यति ॥ पश्चिमांबुधितीरस्थं गोकर्णं तीर्थमुत्तमं ॥ ब्रह्महत्यादिपापानि हरती

तिविस्मद्भुतं ॥ यं वा चापि तरं तारोये त्वमूतद्दहः राः ॥ २८ ॥ ये सर्वे गुरुतीवाह्मपरदाररताश्चये । ये दुर्वृत्ता दुराचारा दुःशीलाश्चप
णाश्चये ॥ लुब्धाः क्रूराश्च कामलुब्धायेनाश्चैवाः तिकामितः ॥ ते सर्वे प्राप्य गोकर्णं स्नात्वा तीर्थजलेष्वमे ॥ देवं महाबलं द
ष्ट्वा प्रयाताः शांकरं पदं ॥ तत्र पुण्यासु तिथिषु पुण्यक्षेत्रे पुण्यवासरे ॥ ये ऽर्चयंति महादेवं ते तेन भावेन संशयः ॥ यदा कदाचि गो
कर्णं यो वा क्वेचापि मानवः ॥ प्रविश्य पूजयेद्देवं स गच्छेद्ब्रह्मणः पदं ॥ रवीदुसौम्यवारेषु रात्रौ मंत्रविष्यतिौ तदा जच्छमिधिस्ना
नं दानं च पितृतर्पणं ॥ शिवपूजाजपोहोमो व्रतचर्यादि जार्वनं ॥ ३२ ॥ ये कृतं विठाहृतकर्म तद् नंतफलं स्मृतं ॥ व्यतिपातादियोगे
षु रविसंक्रमणेषु च ॥ ३३ ॥ महाप्रदोषवेळासु शिवपूजा विमुक्तिदा ॥ अथैकां ते प्रवक्ष्यामि तिथिं को पार्थिवमुक्तिदां ॥ तस्यां दि
महाव्याधोले भेशिवपदं परं ॥ माघमासे महापुण्या सायाह्नछका चतुर्दशी ॥ शिवलिंगं बिल्वपत्रं दुर्लभं हि चतुष्टयं ॥ अहो वल ॥२॥
वती माघाय थाशैवी महातिथिः ॥ नोपोष्यं तेन जागरणे महापूर्वं शिवरात्री ॥ उपवासो जागरणं सन्निधिः परमेशितुः ॥ ३५ ॥ गोकर्णं त्रि
वलोकस्य पवनासोपानपहतिः ॥ शृणु राजन्नहमपि गोकर्णादिमां धुनागतः ॥ ३८ ॥ उपोष्येनां शिवतिथिं विलोक्य च महोत्सवं ॥ अस्यां
शिवतिथौ सर्वे महोत्साह दिदृक्षवः ॥ ३९ ॥ आगताः सर्वदेशेभ्यश्चातुर्वर्ण्यमहाजनाः ॥ स्त्रियो बालाश्च वाळाश्चवतुराश्रमवा

सिद्धाः॥ आगत्य दृष्ट्वा देवेशं लेभिरे कृतकृत्यतां॥ यथाहमप्यमीशिष्यालक्षशश्च तपोधनाः॥ ३१ राजर्षयश्च राजेंद्र सनकाद्याः
सुरर्षयः॥ स्नातास्सर्वेषु तीर्थेषु समभ्यर्च्य महाबलं॥ लेभ्यापि जन्मसाफल्यं प्रयाताः सर्वतो दिशं॥ अमुनापथनरेंद्र
णजनकेनपियक्षुणा॥ निमंत्रितोहं संप्राप्तो गोकर्णाच्छिवमंदिरात्॥ प्रस्थागच्छं किमप्यंगदृष्टमाश्चर्यं महत्पथि॥ नातानं
देनमहताकृतार्थोस्मि महामते॥ ॥१३५॥ ८७॥ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे गोकर्णमहिमानाम द्वितीयोऽ
ध्यायः॥ २॥ ७॥ २॥ राजोवाच॥ ॥ किं दृष्टं भवता ब्रह्मन्नाश्चर्यं पथि कुत्र वा॥ तन्ममाख्याहि येनाहं कृतकृत्यत्व
माप्नुयां॥ १॥ गौतम उवाच॥ गोकर्णादहमागच्छन्क्वापिदेशे महामते॥ तत्रमध्याह्नसमये प्राप्तवान्विमलं सरः॥ २॥ तत्रो
पस्पृश्य सलिलं विनायच्चपथिश्रमं॥ स्निग्धधरीतच्छायंन्यग्रोधसमुपाश्रयं॥ ३॥ अथाविदूरे चांडालीं दृष्टवामंधाकरा
कृतिं॥ क्षुत्पनुरखीं निराहारां बहुरोगेनपीडितां॥ ४॥ कुष्ठरोगपरितांगीं घल्कृमिसमाकुलां॥ पूयशोणितसंसिक्तां जरस
टलत्कटिं॥ ५॥ महायक्ष्मगदग्रस्तेनकंठस्वरोधविकृळां॥ विनष्टदंतामव्यक्तां विलुठंतीं मुहुर्मुहुः॥ ६॥ चंद्रार्ककिरणस्पर्शात्व
रोककरलेसिलुतां॥ विण्मूत्रमयदग्धांगीं मस्तगं धांदुरासदां॥ ७॥ कफरोगबहुश्वासत नाडीपनव्यथां॥ विध्वस्तकेशाव

८५

यत्वामपश्यंमरणोन्मुखीं॥८॥तांतथासंगतांवीक्ष्ययाहंपरिप्लुता॥प्रतीक्ष्यकारणंतस्याःक्षणंतत्रैवसंस्थिता॥९॥अथां
तरिक्षेणदेवीसिंचंतीमिवरश्मिभिः॥दिव्यंविमानमस्माकमानीतंशिवकिंकरैः॥१०॥तस्मिन्नुरवीडुवङ्गीमांतेजसामिवपंजरे॥वि
मानेसूर्यसंकाशेरूपवंतःशिवकिंकराः॥११॥तेवैत्रिशूलखट्वांगटंकचर्मासिपाणयः॥चंद्रार्धशेखराःसांद्रघंटाकुंडल
वर्चसः॥१२॥किरीटकुंडलभ्राजन्महाहिवलयस्रजः॥शिवानुगामयादृष्टाश्चत्वारस्तुमतक्षणौ॥१३॥तानावीयाताः
समालोक्यविमानस्थान्सुविस्मिता॥उपसृत्यांतिकेवेगाद्दृष्टंगगनेस्थितान्॥१४॥नमोनमोवस्त्रिदशोत्तमेभ्यस्त्रिलो
कनःश्रीचरणानुगेभ्यः॥त्रिलोकरक्षाविधिमावहद्भ्यस्त्रिशूलखट्वासिगदाधरेभ्यः॥१५॥विदितास्मिमयायद्यंमहेश्वरस्
नुगाः॥इयंवोलोकरक्षार्थागतिराहोविनोदतः॥१६॥अहोसर्वज्ञगौरीपविजयायकृताहराः॥ब्रूतकारुण्यतोयद्यंयस्मा ॥१०॥
च्छीघ्रमिहागता॥१७॥ देवाऊचुः॥ एषाप्रदृष्टपतेस्तेतावेडाळीमरणोन्मुखी॥एतामादौतुमायाताःसंदिष्टाःप्रभुणाव
यं॥१८॥इत्युक्ताःशिवदूतैस्तैरपृच्छंतुनरप्यहं॥विस्मयाविष्टचित्तस्तान्कृतांजलिरुपस्थिता॥१९॥अहोपापीयसीघोरा
वेडाळीकथमर्हति॥दिव्यंविमानमारोढुंशीवाधर्मंवदं॥२०॥आजन्मतोप्युविप्राप्याणिपापान्यनुगामिनी॥कथमेनांदुरा
चारांशिवलोकंनिनीषथ॥२१॥अस्यानास्तिशिवज्ञानंनास्तिघोरतरंतपः॥नसत्यंनास्तिदमोनास्तिकथमेनांनिनीषथ॥२२॥

नमा २

पञ्चमासकृताहारां गाकण्णीदुरितोदरां ॥ नीवहिंसारतां नित्यं कथमेतां निरीक्षथ ॥२३॥ नवपंचाऽक्षरी जप्ता नष्टं तं शिवप्र
लप्तं ॥ नध्यातो भगवान् शंभुः कथमेतां निरीक्षथ ॥२४॥ नोपोषिता शिवतिथि नैक्तं नक्तमैव हि ॥ नेपापनोदिकं चापि
कृ० २५ नवस्नातानि तीर्थानि नदानां निवृत्तानि च ॥ नवस्रुता मिवीणानि कृ० २८ ॥ दृष्टौ नेपरिहर्त्तव्यौ क्रिमुस नाषणादि
पु ॥ स सगरहिता वंगंकृ० २७ नक्ष्यांतरार्जितं किंचिद्स्याः सुकृतमस्ति वा ॥ तत्कथं क्ष्म कुष्णदिक्ष मिमिं परिभूयते ॥२८॥
अहो श्वाकर बर्येयं दुर्विभाव्या चारी रिणां ॥ पापात्मनोपि नीयंते कालव्या सरमं पदं ॥२९॥ इत्युक्त्वा स्ते मयाहूता देवदेव
स्य सन्निधिन ॥ प्रस्कंधुर्मिनिथ श्रीलास सर्वे संशाय मौदिन: ॥३०॥ ॥ शिवहन्तार्डकं तु:॥ ॥ बसतस्तु महदाश्वर्यं सुक्षण
कौतूहलं चयदि ॥ इमामुद्दिश्य वो डाकैंयं दु कृमवतांधुना ॥३१॥ आसीदिपंसर्त्तमिवेवी ब्राह्मणकन्यका ॥ सुमित्रा
नाम संपूर्णसोमबिंबसमानना ॥३२॥ उत्फुल्लकलिकाकामसुकुमारांऽगलक्षणा ॥ कैकेयी दिजनमुख्यस्य कस्यापि दुहि
स्मणस्यसा ॥३३॥ तां सर्वलक्षणोपेतां रत्नेन्द्रं विधिवापरां ॥ वर्द्धमानापितुर्गेहे वीक्ष्यासन् विस्मिता जना: ॥३४॥ दिने दि
ने वर्द्धमानावंधुमिर्लालितान्वहं ॥ सारात्यैयौवनं भेजे स्मारस्येव महाधना ॥३५॥ अथ मातावंधुवर्गैश्व संमते कुमारि

न १

19

का ॥ पित्राप्रदत्ताकस्मैचिद्ब्राह्मणायानसूनवे ॥ ३८॥ साप्रत्नासिन्नुप्राप्य नवयौवनशालिनी ॥ कंचित्कालंप्रभुभावसा
रेमेबंधुभिरावृता ॥ ३९॥ अथकालवशात्तस्याः पतिर्लीबकतार्दितः ॥ रूपयौवनकांतोपि पंचत्वमगमन्मुने ॥ ४०॥ सातेनभर्त्र
तिदुःखेनविदग्धहृदयासती ॥ उवासकतिचिन्मासान्सुशीलाविजितेंद्रिया ॥ ४१॥ अथयौवनभारेणदह्यमानानिरस्यदा ॥
बभूवहृदयंतस्याः कंदर्पशरपीडितं ॥ सुगुप्तांबंधुवर्गेणग्रासितापिमहत्तमैः ॥ निशायांकमनेरोहं मदनाकृष्टमंगना ॥ साती
वमत्यथविप्रा रूपयौवनशालिनी ॥ विधवापिविशेषेण जारमार्गस्थिताभवत् ॥ नज्ञाताकेनचिदपि जारयानीतिविचक्षणा ॥ ४२॥
तुरहास्यदुरातंक्र किंचित्कालमसत्तमा ॥ तांदोहदसमाक्रांतांघननीलमुरवस्तनीं ॥ कालेनबंधुवर्गोपिविबुबोधवि ॥१९
चितां ॥ स्त्रियः कामेनन्दयंति ब्राह्मणाहीनसेवया ॥ राजानोब्रह्मदंडेनपतयोभोगसंग्रहात् ॥ तोदंभुनायथैवान्नंसर
थैवापितंपयः ॥ रूपंकुष्ठेनजाविष्टं कुष्ठेनरूपंतिकुस्त्रिया ॥ इतिसर्वेसमालोच्यसमस्ताः पतिसोदराः ॥ तस्यानुगोवितोदूरंग
हीत्वासघवग्रहं ॥ सघटोत्सर्गमुत्सृष्टासानारीसर्वबंधुभिः ॥ विचरंतीचमत्रेणरममाणारतिप्रिया ॥ सायथेच्छंविहि
ग्रामारण्याश्रयेणकेनचित् ॥ सदृष्ट्वातांवरारोहांपीनोन्नतपयोधरां ॥ गृहंनिनायवान्तावधनवान्सूत्रता

यक्षः ॥ सा नारी तस्य महिषी कृता तेन दिवानिशं ॥ रममाणा कदाचिद्देवो विवसन् गृहवल्लभः ॥ तत्र सापि पिशिताहारा निस्समा
पीतवारुणी ॥ लेभेऽसौ तां स्वच्छन्देन रममाणा रतिप्रिया ॥ कदाचित्कर्त्तरिकापि यातेपी तासु रासवा ॥ इयेप पिशिताहारा
मदिरामदविह्वला ॥ सयाहमेषबुध्या सा गोवत्सं पिबति प्रिया ॥ ययौ लवणमद्याय सातमो धोनिरामुखे ॥ अविमृश्यपम
दावेशान्मेषबुध्याऽमिषप्रिया ॥ तं वैतपानगोवत्सं दुर्गागामदविह्वला ॥ निहतं गृहमानिन्ये तां दृष्ट्वा गोवत्समंगना ॥ श्री
नारिवसिवेश्याहके नविस्तुण्यकर्मणा ॥ सा मुहूर्तेन मिध्यात्वापि बिता सवलालसा ॥ छित्वा तमेव गोवत्सं च क्षुराहसीसि
तं ॥ गोवत्सास्वशरीरेण कृताहारा च सा पुनः ॥ तद्दिदेहं विक्षिप्य बहिरुक्षेपकैतवात् ॥ अहो व्याघ्रेण ग्रस्तोयं मे गो
वत्सको व्रजे ॥ इति तस्याः समाक्रन्दः सर्वगेहेषु शुश्रुवे ॥ ततः सर्वेऽपि हि जनाः समागम्यांतिके स्थिताः ॥ हतं गोवत्समालोक्य
व्याघ्रेणेति ब्रुवंतो ययुः ॥ गतेषु तेषु सर्वेषु व्युष्टायां च ततो निशि ॥ तद्भर्ता गृहमागत्य दृष्ट्वा न गृहविड्वरं ॥ एवं च कुर्वती येन काळेन
तेसा मृत्युमागता ॥ काळस्य वशमापन्ना जगाम यममंदिरं ॥ यमोऽपि धर्ममालोच्य तस्याः कर्मं च पौर्विकं ॥ निर्वर्स निरयावा

२१

साध्व्येके चांडाळनातिकं ॥ अथ धनाढ्यायमपुराच्चांडाळी गर्भमास्थिता ॥ ततो बहुलवत्वासौ धावन्नांतागारमेवका ॥ तस्मि
तासोपि चांडाळो देशे कुत्रचित्स्थितः ॥ तां तादृशीमपि स्तुतां कृपया पर्यत्राषयत् ॥ अथोऽन्येन कदनेन कृनालीछेनसूतिनो ॥
अपेयैश्चरसैस्त्राता नोषितासा दिने दिने ॥ जातस्य धासापि बालकाळेन बाल्ये चापितजार्हिता ॥ उद्धनकेन विलंबापि चांडाळे
नापि दुर्भगा ॥ अतीतवयसा काळे विपन्नपितृमातृका ॥ दुर्भगेति परित्यक्ता बंधुभिश्च सहोदरैः ॥ ततः क्षुधार्दिता दीना
बोभ्रंती विगतेक्षणा ॥ गृहीतयष्टिः कष्टेन पालवचारसलोष्टका ॥ पदनेषापि सर्वेषु याचमाना दिने दिने ॥ चांडाळोच्छिष्ट
पिंडेन जठराग्निमतर्पयत् ॥ एवं कष्टेन महता नीतास्तु बहुवयः ॥ जरयाक्रांतसर्वांगा दुःखमापदुरत्ययं ॥ निरन्नः पा
नवसना सा कदाचिन्महाजनात् ॥ आयास्यंतं शिवतिथौ गच्छंतं बुबुधे ध्वगात् ॥ तेस्यां च देवयात्रायां देशे देशांतपा ॥१२॥
थिनां ॥ विप्राणां साग्निहोत्राणां यानच्छत्रोपशोभिनां ॥ तथान्येषां च विट्शूद्राः संकीर्णानां सहस्रशः ॥ सस्त्रीकानां
नो २ नृपाणां च सावरोधाश्चदंतिनां ॥ सपरीवारयोषाणां यानच्छत्रोपशोभिनां ॥ हसतां गायतां कापि नृत्यतामिव धावतां ॥ ८४॥
संप्रयाणमनुष्याणां संभ्रमः समजायत ॥ इति सर्वेषु गच्छत्सु गोकर्णे शिवमंदिरं ॥ गच्छंति दिविजाः सर्वे विमानस्थाः स

22

कौतुका:॥ अथेयमपि चांडाळी वसना:स्तनन्धकया॥ महाजननानुया। वयितुं संचचार शनै: शनै:॥ करावलंबन
स्तस्या: प्राग्जन्मार्जितकर्मणा॥ दिनै: कतिपयैर्याता गोकर्णक्षेत्रमुत्तमं॥ ततो विहरे मार्गस्यनिषण्णा विष्टतांजलि:॥८
यावमाना वरूनूलोकान् व्याषेकरुणं वच:॥ प्राग्जन्मार्जितपापोघै: पीडिताया चिरं मम॥ आहारमात्रदानेन दयां कुरुत हे जना:॥ अनु
पार्जितपुण्याया जन्मांतरशतेष्वपि॥ पापायां मंदभाग्यायां दयां दयां कुरुत हे जना:॥ वसनाशनहीनायां राशिताया महीतळे॥ महापापेषु
मग्नायां दयां कुरुत हे जना:॥ दातार: परमा: नॄनां त्रातार: शरणार्थिनां॥ के नरा बहुपुण्या ना दयां कुरुत हे जना:॥ एवमभ्यर्थयंत्या
स्त: चांडाल्या: प्रसृतांजळौ॥ एक: पुण्यतम: पांथ: प्राक्षिपद्बिल्वमंजरीं॥ तामंजळौ निपतितां सविमृश्य पुन: पुन:॥ अभक्षत्वे
वगम्याथ दूरे प्राक्षिपदातुरा॥ तस्या: करेण सा मुक्ता रात्रौ सा बिल्वमंजरी॥ पपात कस्यचिदपि शिवलिंगस्य मस्तके॥ सैव शिवचतुर्द
श्यां रात्रौ पांथजनान्नमुहु:॥ याचमानायत्किंचि न्न लेभे दैवयोगत:॥ तत्रोषिता नया रात्रौ भक्तकाल्या स्वपृष्ठत:॥ किंचिदुत्तरत:
स्थानं तद्ध्येनर्ताति दूरत:॥ तत: प्रभाते भ्रष्टा सा क्लेशेन महतान्विता॥ शनैर्निर्वहते दीनास्वदेशायैव केवळं॥ भ्रांता चिरापदे चोन
निपतंती पदे पदे॥ क्रंदंती बहुरोगार्ता वेपमाना हतातुरा॥ दस्यमाना: कृतापेन नन्नदेहा स्वयष्टिका॥ अंता स्तावंती भूमि निपपात वि
चेतना॥ अथ विश्वेश्वर: शंभु: कल्याणामृतवारिधि:॥ एतामानयते स्वस्मान्नादिदेश विमानगान्॥ एषा शंभो इति ख्याता चांडाल्यास्त्वेह परि

कीर्त्तिता॥ यथासादर्शितात्वंभोः कृपणेषुकृपालुना॥ कर्मणापरिपाकोऽयंगतिंपश्यमहामुने॥ अधर्मोऽपिपरंस्थानंसमारोहतिनि
रामयं॥ यदाऽनयापूर्वभवेनान्नदानादिकंकृतं॥ क्षुत्पिपासादिकैःक्लेशैस्तस्मादिहनिपीड्यते॥ यद्वेषामदवेगांधावक्रेपानम
होल्वणं॥ कर्मणातेनजासंधावभूत्वाचैवजन्मनि॥ अपिविज्ञायगोवत्संयद्देषालक्षयत्पुरा॥ तेनपापेनचांडाळीचभूत्वेहविगर्हिता॥ य
द्देषाऽयपिथंहित्वाजारमार्गरतापुरा॥ तेनपापेनदेहेस्मिन्बहुकुष्ठव्रणांकिता॥ कामार्त्तायदियंस्वैरंभर्तृद्रेणरमितापुरा॥ कर्मणातेनकेना
पिनहृतादुर्भगेतिच॥ यदाक्लिष्टामहावेगाजारेणाविधवापुरा॥ महास्वरूपकामिभिस्तेनपापेनपीड्यते॥ यद्येतयापूर्वभवेसुरापी
तावितृष्णया॥ महायक्ष्मादिभिःक्लेशैःपीड्यतेतेनपाप्मना॥ अत्रैवसर्वमर्त्येषुपापचिह्नानिलक्षयेत्॥ इत्युक्तेमुनिनापृष्टःसविवे सं
केर्महामतिः॥ सुवृत्तानिनवीर्णानिनेष्टापूर्त्तादिकंकृतं॥ सर्वभोगविहीनेयंदृश्यतेतेनपाप्मना॥ अन्येयेबहुरोगार्त्तायेपुत्रधनवर्जि ॥१२॥
ताः॥ येवदुर्लक्षणाःक्लिष्टायावकाविरतेंद्रियाः॥ बालोनपानशयनस्नान्यकाम्भाजनादिभिः॥ हीनाकुरूपेऽवसनाविकलांगाःकुभोज
नाः॥ येदुर्भगानिंदिताश्चयेवान्येपरसेवकाः॥ एतेपूर्वभवेसर्वेस्तुमहत्सापकारिणः॥ एवंविमृश्यप्रयत्नेनदृष्ट्वालोकनतत्स्थितिं॥ बुधो
नकुर्वतेपापंयदिकुर्यात्सआत्महा॥ देहोयंमानुषोजंतोबहुकर्मैवभाजनं॥ सदासत्कर्मसेवेतदुःकर्मस्यततस्त्यजेन्नरः॥ पुण्यंसुखवाप्यै
कुर्वीतदुःखदंपापमाचरेन्न॥ द्वयोरेकतरंलोकेस्वकीयात्कुशलंनरः॥ इदंमानुषमाश्रित्यदेहंपरमदुर्लभं॥ यआत्महितं

मन्विछन्देवमेकंसमाश्रयेत्॥ अथपापानिसर्वाणिकुर्वन्नपिसदानरः॥ शिवमेकंसदाध्यायेत्ससंतरतिपातकं॥ एतात्पूर्वंमयासेवयदप्राप्ता
यनाश्रय॥ नेदाविर्तर्कःसुमहान्नासीद्यमसमासदं॥ यद्यपिब्राह्मणीसैषास्वकुलाचारदूषिता॥ अतोऽस्माभिरिहाऽनीतायातुवान
रकंनवा॥ तथापिसुविचार्यैवधार्योदंडोत्रवानक॥ बहुजन्मसहस्रेषुकृतपुण्यविपातेके॥ नृणांब्रह्मकुलेजन्मलभ्यतेवकथंचन॥ अ
तोस्याःपूर्वपूर्वेषुकृताऽघंनास्तिजन्मसु॥ अन्यथासत्कुलेजन्मकथमेवप्रपद्यते॥ अत्रैवजन्मन्यनयाकृतमंहोतिदारुणं॥ तथापिनर
कावासंशयश्चोनेयमर्हति॥ किंतुगोवत्सकंहत्वाविप्रस्यपरातसाध्वसा॥ एषाशिवशिवेत्याह तत्पुण्यप्राग्भवार्जितं॥ यद्येषापापविछित्यै
सकृज्जप्याऽक्षरद्वयं॥ शिवनामवदेद्भक्त्यातर्हिगछेत्परंपदं॥ ऐकजन्मकृताऽघस्यदारुणस्यचतत्कृते॥ क्रमेणानुभवत्येषाभूत्वाचांडालकन्य
का॥ अस्मात्पापतमःकोवानरकोस्तिनृणामिह॥ अनेकक्लेशसंघातैर्यन्मुहुःपरिपीडनं॥ दुःकुलेजन्मदारिद्र्यंमहाव्याधिर्विलुंठना॥
एकैकएवनरकःसर्वेप्यत्रागताःपुनः॥ प्राग्जन्मपुण्यभारेणयन्नामविवशाब्रवीत्॥ यदेषान्यभवेद्भूरिपुण्यमतेकरिष्यति॥ तेनपुण्येन
महतानिस्तीर्णाघोरयातना॥ नीतातत्सकृपैरंतेप्रयास्यतिपरंपदं॥ एतावद्दत्तानांमर्त्यानांशास्तारोनवयंक्वचित्॥ विचार्यैस्वय
मेवेशोयदुक्तंतत्करोतुसः॥ एवंवैवस्वतपुरेसर्वैर्धर्मपुरोगमैः॥ विप्रस्यपाचित्रगुप्ताद्यैरियमुक्तापितद्भुवि॥ आद्येयदेषाशिवनामनारीप्र

मादतो वाप्यसती जगाद ॥ तेनेह भूयः सुकृतेन नश्यांस्मोर्बिल्वांकुराराधनपुण्पनाय ॥ श्रीगोकर्णे शिवतिथौ उपोष्य शिवमस्तके ॥
कृत्वा जागरणं रात्रौ चक्रे बिल्वार्चनं निशि ॥ अकामतः कृतस्यास्य पुण्यस्यैव च तत्फलं ॥ यद्येवं नीयतेऽस्माभिः पश्यतस्तव
नोत्कष ॥ ॥ गौतम उवाच ॥ ॥ इत्युक्त्वा शिवदूतास्ते तस्याश्चांडालयोषितः ॥ शिवलोकं समानेतुं पुपुजुः दिव्यतेजसा ॥१२॥
तां दिव्यदेहसंक्रांतां तेजोराशिसमुज्वलां ॥ विमाने स्थापयामासुः प्रीतास्ते शिवकिंकराः ॥ अथ सा परमोदारा रूपलावण्य
शालिनी ॥ दिव्यभूषणदीप्तांगी दिव्यांबरविराजिता ॥ देहेन दिव्यगंधेन दिव्यतेजोविकाशिनी ॥ दिव्यमाल्यावतंसेन विराज
विमानगा ॥ रत्नछत्रपताकाद्यैर्गीतवादित्रनिस्वनैः ॥ भीता त्रस्ता हठाच्चाश्चर्यं दृष्ट्वा स्वप्नमिवोत्थिता ॥ काहं केमीमहासिद्धिं ॥१४॥
कोयं लोकः मनोरमः ॥ क्व गतमेव वपुः कुष्टं चांडालगोत्रजं ॥ अहोस्तु महदाश्चर्यं दृष्टं मायाविलासजं ॥ यन्मयाम्रवलदृष्टुत्रौ
हं तंभ्रांतं पुनःपुनः ॥ अहोईश्वरस्व पायामाहात्म्यं विस्मयावहं ॥ पत्रमात्रेण संतुष्टो ददाति परमं पदं ॥ इति तां जाततावनिर्वेदां स्म
रतीं भगवत्पदं ॥ दिव्यविमानमारोप्य ते महेश्वरकिंकराः ॥ आलोकयत्सु सर्वेषु लोकेशेषु सविस्मयं ॥ आमंत्र्य तामथानिन्यु
स्तां महेश्वरसंनिधिं ॥ राजन्सु महदाश्चर्यमाख्याता तं गिरिजापतेः ॥ माहात्म्यं भक्तिलेशस्य सर्वाघौघविनाशनी ॥ राजोवाच ॥७॥

भगवन्परमेशस्यकीदृशोलोकउत्तमः॥ तस्यास्तेलक्षणंब्रूहियद्यस्तिमयितेदया॥ ॥ गौतमउवाच॥ ॥ ब्रह्मादिसुरनाथा
नांलोकेभ्योपिसुदुर्लभः॥ यत्रानंदस्सदायत्रसलोकःपरमेश्वर॥ सर्वागमादिपर्यंतंयज्जोतिर्यत्रप्रतिष्ठितं॥ क्वचिन्नास्ति
समोलोकोसलोकःपरमेश्वर॥ गुणाहतिर्विनिस्तीर्यसंप्राप्यायत्रयोगिनः॥ नपतंतुःपुनःसर्गेस०॥ यत्रवासोनकुर्वंतिलोभ
क्रोधमहेश्वराः॥ यत्रावस्थानजन्माद्यास०॥ सर्वेषांनिगमानांचयदेकंक्षेत्रमुत्तमं॥ यस्मान्नास्तिपरात्किंचित्स०॥ प्रत्याह
रासनाध्यानप्राणसंयमनादिभिः॥ यद्वायोगपथैःप्राप्तंस०॥ यत्रयोगीसदानंदोनिमग्नोज्ञानरूपया॥ आस्तेदेव्यासहक्रीडनस०॥ ॥२७
जन्माद्यनेकसाहस्रैःसंचितैःपुण्यराशिभिः॥ आरूढाःपुरुषानार्योक्रीडयायत्रसंयताः॥ तेजोराशौसमानानांदुर्विभाव्यम
नो[illegible]रमे॥ अहोरात्रादिसंस्थाननविदंतिकदाचन॥ सलोकःपरमेशस्यदुर्लभस्सुकृत्सुयोगिनां॥ एतद्धिकिंचिद्दारण्यात्से
रेवंसंप्रपद्यते॥ एतत्कथाश्रवणमात्रजातहर्षायेसर्वदातत्कृतहृदयस्थशमैकनिष्ठाः॥ संसारचक्रमतिदास्यनिरस्तमोहास्ते
शांभवंपदमनवाप्यसुखंरमंते॥ तेषात्वमपिराजेंद्रगोकर्णेशिवमंदिरं॥ गच्छप्रशमितापौघःकृतकृत्यत्वमाप्नुहि॥ तत्रती
र्थेषुसर्वेषुस्नात्वाभ्यर्च्यमहाबलं॥ कृत्वाशिवचतुर्दश्यामुपवासंसमाहितः॥ कृत्वाजागरणंरात्रौबिल्वैरभ्यर्च्यशंकरं॥ सर्व

१४३

पापविनिर्मुक्तः कृतकृत्यत्वमाप्नुहि ॥ एवं तेद्विजलोकानामनुपदेशोमया कृतः ॥ स्वस्तितेस्तु गमिष्यामिमिथिलाधिपतेः पुरीं ॥ ॥१४८॥
॥ सूत उवाच ॥ इत्यामंत्र्य मुनिःश्रीमान्गौतमोमिथिलांययौ ॥ सोपि हृष्टमनाराजा गोकर्णं प्रत्यपद्यत ॥ तत्र दृष्ट्वा महादेवं
स्नात्वाभ्यर्च्य महाबलं ॥ निर्धूताशेषपापोघो लेभे शंभोः परं पदं ॥ य इमां शृणुयात्पुण्यां कथां शैवीं मनोहरां ॥ श्रावयेद्वा जना-
न्भक्त्या सयाति परमं पदं ॥ तदर्धं वा नः सकृद्वापि य इमां शृणुयात्कथां ॥ त्रिःसप्तकुलजैः सार्धं शिवलोकमवाप्नुयात् ॥ इति क-
थितमशेषं श्रेयसामादिबीजं ॥ भवभयदुरितघ्नं ध्वस्तमोहांधकारं ॥ चरितममरगेयं मन्मथारेरुदारं सततमपि निसेव्यं स्व-
स्तिमान्सकलोकः ॥७०॥७॥ श्लोकाः ॥४॥ ॥ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे शिवरात्रिमाहात्म्यं नाम तृतीयोऽध्या- ॥१५॥
यः ॥७॥ ॥ सूत उवाच ॥ ॥ अथोपि शिवमाहात्म्यं वक्ष्यामि परमाद्भुतं ॥ शृण्वतां सर्वपापघ्नं भवपाशविमोचनं ॥ दुस्त-
रे दुरितांभोधौ मग्नानां विषयात्मनां ॥ शिवव्रतं विना कश्चित्क्रमो नास्ति निरूपितः ॥ शिवपूजां सदा कुर्यात् बुद्धिमानिह मानवः ॥
अशक्तश्चेत्कृतां पूजां पश्यन्भक्तिविनम्रधीः ॥ अशक्त्यापि यः कुर्याच्छिवपूजाविमुक्तिदा ॥ पत्रपेद्यासोपि कालेन प्राप्नोति पर-
मं पदं ॥ आसीत्किरातदेशेषु नाम्ना राजविषेमकः ॥ क्रूरः परमदुर्धर्षो जितरातिः प्रतापवान् ॥ सर्वदा मृगयासक्तः श्वपचो निर्घृ-

घोवळी॥ सर्वमांसाशनः क्रूरः सर्ववर्ण्याऽशनारतः॥ तथापि कुलतेजांशोः प्रजानां निसमनिंदितः॥ चतुर्दश्यां विशेषेण पक्षयोः सि
तलक्ष्ययोः॥ महाविभवसंपन्नां पूजां कृत्वा समोदते॥ हर्षेण महता युक्तो नृत्यति स्तौति गायति॥ तस्यैवं वर्तमानस्य नृपतेः सर्व
भक्षिणः॥ दुराचारस्य महिषी चेष्टितेनान्वितप्यते॥ सा वै कुमुद्वती नाम्ना राज्ञी शीलगुणान्विता॥ एकदा पतिमासाद्य रहस्येनमपृच्छ
त॥ एतत्ते चरितं राजन्महदाश्चर्यकारणं॥ कृतेमहान्दुराचाराः कृ भक्तिः परमेश्वरे॥ सर्वदा सर्वजंतुस्वं सर्वस्त्रीरतिलोलसः॥ सर्वहिंसाप
रः क्रूरः कथं भक्तिस्तवेश्वरे॥ इति पृष्टस्तया भूपालो विस्मयपरश्चिरं ततः॥ कृत्वा पूजां प्रहस्यैनां प्रोवाच स्वसुकृतं हृद्गतम्॥ ॥ राजोवाच॥ ॥ अहं
पूर्वमेवं कश्चित्सारमेयो वनांतरे॥ पंपानगरमाश्रित्य पर्यटामि समंततः॥ एवं कालेषु गच्छत्सु तत्रैव नगरोत्तमे॥ कदाचिदागतः सोहमनोज्ञ
शिवमंदिरे॥ पूजायां वर्तमानायां चतुर्दश्यां महातिथौ॥ अपश्यं पडुस्वं बहूं हर्षितं द्वारसमाश्रितः॥ अथाऽहं परमक्रूरैर्दंडहस्तैः प्रधावतः॥ त
स्माद्देशादपक्रांतः प्राणरक्षापरायणः॥ ततः प्रदक्षिणीकृत्य तदेव च शिवालयं॥ द्वारदेशात्पुनः प्राप्तः पुनश्चैवं निवारितः॥ पुनः प्रदक्षिणीकृ
त्या तथैव शिवमंदिरं॥ बलिपिंडादिलोभेन पुनर्द्वारमुपागतः॥ एवं पुनस्तत्र भ्रत्वा नानाधौ च प्रदक्षिणं॥ द्वारदेशसमासीनं निजघ्नुर्निशितैः श
रैः॥ सविद्धमात्रः सहसा शिवद्वारि गतासुकः॥ ततोस्म्यहं कुले राज्ञां प्रभावाच्छिवसन्निधेः॥ दृष्टा चतुर्दशी पूजा दीपमाला विलोकिता॥ तेनपु

२९

येनमहतात्रिकालज्ञोतोऽस्मिकामिनि॥ २२ प्राग्जन्मवासनायोगात्सर्वज्ञोऽस्मिकामिनि॥ विदुषामपिदुर्लक्ष्यावासनाप्रकृतिर्मयि॥ २३ अतोऽ
हमर्थयेच्छ्रोतुंचतुर्दश्यांजगत्प्रभो॥ त्वमपिश्रद्धयाऽऽनजदेवंपिनाकिनं॥ २४॥ राज्ञ्युवाच॥ ॥त्रिकालज्ञोसिराजेंद्रप्रसादात्त्रिपुरि
नापते॥ मत्पूर्वचरितंत्वंहिवक्तुमर्हसितत्वतः॥ २५॥ राजोवाच॥ ॥त्वंपूर्वजन्मन्येकापिकपोतीव्योमचारिणी॥ कापिलध्वजतीकाचिन्मां
सपिंडंयदृच्छया॥ २६ विहृहीतमथालोक्यगृध्रःकोप्यामिषंवद्धी॥ निरामिषःस्वयंवेगाद्दक्षिद्रुतावत्रीषणः॥ २७ ततस्त्वंवीक्ष्यवित्रस्ताविद्रु
तासिवरानने॥ तेनानुजाताघोरेणमांसपिंडजिघृक्षया॥ २८ दिष्ट्याश्रीगिरिमासाद्यश्रांतातत्रशिवालये॥ प्रदक्षिणांपरिक्रम्यध्वजाग्रेस १८
मुपस्थिता॥ २९ अथानुसृत्यतरसातीक्ष्णतुंडोविहंगमः॥ त्वांनिहत्यनिपात्याधोमांसमादायजग्मिवान्॥ ३० प्रदक्षिणप्रक्रमणाद्देवदेव
स्थितेः॥ तस्याग्रमरणाच्चैवजातासित्वंनृपांगने॥ ३१॥ राज्ञ्युवाच॥ ॥श्रुतंसर्वमशेषेणप्राग्जन्मचरितंमम॥ जातंचमहदा
श्चर्यंशक्तिश्चममचेतसि॥ ३२ अथान्यच्छ्रोतुमिच्छामित्रिकालज्ञमहामते॥ इदंशरीरमुत्सृज्यप्रयास्यावःकांगतिंपुनः॥ ३३॥ राजोवाच॥ ॥
अतोजन्मन्यपिद्वितीयेसैंधवोनृपः॥ यथातत्वंसत्ताकन्या॥ संजयेषुसुतात्वंचममपत्नीभविष्यसि॥ ३४ ततीस्मात्वेराजासौराष्ट्रस्यहं॥ च
भविता१

३०

कलिंगराजतनयात्वंचपत्नीभविष्यसि ॥ चतुर्थेतुभविष्यामिभवेगांधारभूमिपः ॥ मागधीराजतनयातत्रत्वंममगेहिनी ॥ पंचमेवंति
नाथोहंभविष्यामिभवांतरे ॥ दाशार्हराजतनयात्वंचमांप्रतिपत्स्यसि ॥ अस्माज्जन्मनिषष्ठेहमनंतोभवितानृपः ॥ ययातिवंशजाक
न्याभूत्वामामैष्यास्यसि ॥ पांप्रराजकुमारोहंसप्तमेभवितामवे ॥ यत्रमत्सदृशोनान्योरूपौदार्यादिभिर्गुणैः ॥ सर्वशास्त्रार्थत
त्त्वज्ञोबळवान्दृढविक्रमः ॥ सर्वलक्षणसंपन्नःसर्वलोकमनोहरः ॥ पद्मवर्णइतिख्यातःपद्मवर्णसमद्युतिः ॥ भवितात्वंचवै
दर्भीरूपेणाप्रतिमद्युतिः ॥ नाम्नावसुमतीख्यातासर्वावयवशोभना ॥ सर्वराजकुमाराणांमनोमयसुवंदितः ॥ सात्वंस्वयंवरेस
र्वान्विहायनृपनंदनान् ॥ वरंप्राप्स्यसिमामेवदमयंतीवनैषधं ॥ सोहंजित्वानृपान्सर्वान्त्वांप्राप्यवरवर्णिनी ॥ स्वराष्ट्रस्थो
बहून्भोगान्भोक्ष्येवर्षगणान्बहून् ॥ इष्ट्वाचविविधैर्यज्ञैर्वाजिमेधादिभिःशुभैः ॥ संतर्प्यपितृदेवादीनदानैश्चापिसज्जनान्
संप्रत्यदेवदेवेशंलोकशंकरशंकरं ॥ पुत्रंराज्यधुरिन्यस्यगतोस्मितपसेवनं ॥ तत्राऽगस्त्यान्मुनिवराज्ज्ञानधर्ममवाप्यच ॥
त्वयासहगमिष्यामिशिवस्यपरमंपदं ॥ चतुर्दश्यांचतुर्दश्यामेवंसंपूज्यशंकरं ॥ सप्तजन्मसुराजाऽहंत्वंमेपत्नीवरानने ॥ इ
त्येतत्सुकृतंलब्धंपूजादर्शनमात्रतः ॥ कुमारमेयोदुष्टात्माकीदृशीममसद्गतिः ॥ ७ ॥ सूतउवाच ॥ ॥ इत्युक्तोमितिनाथे

३१

नसाराज्ञीभिर्लक्षणा ॥ परंविस्मयमापन्नापूजयामासतंमुदा ॥ सोपिराजातयासार्द्धंभुक्त्वा भोगान्यथेप्सितान् ॥ जगामसतभव
म्यांतेशंभोस्तत्परमंपदं ॥५३॥ ७ ॥ श्रीरस्तु ॥ ॥ ४ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेशिवपूजादर्शनमाहात्म्यं
नामचतुर्थोऽध्यायः ॥ ७ ॥ ४ ॥ श्रीः ॥ सूतउवाच ॥ शिवोगुरुःशिवोदेवःशिवबंधुःशरीरिणां ॥ शिवआत्माशिवोजीवःशि
वादन्यन्नविद्यते ॥ शिवमुद्दिश्ययत्किंचिद्दत्तंजप्तंहुतंकृतं ॥ तदनंतफलंप्रोक्तंसर्वागमविनिश्चितं ॥ श्रद्धयानिवेदितंशंभोः
पत्रपुष्पफलंजलं ॥ अल्पादल्पतरंकिंचित्तदनंतायकल्पते ॥ विहायसकलान्देवान्सकलागमनोदितान् ॥ शिवमेकंभजेद्यस्तु
मुच्यतेसर्वपातकैः ॥ योप्रीतिरात्मनःपुत्रेयाकलत्रेधनेपिसा ॥ कृताचेच्छिवपूजायांसिद्धिमेतिकिमद्भुतं ॥ तस्माल्लोकेविमहात्मनःस
कलान्विषयासवान् ॥ सर्वंपतिशिवभक्त्यर्थेस्वदेहमपिदुस्त्यजं ॥ सजिह्वयाशिवंस्तौतितन्मनोध्यायतेशिवं ॥ तौकर्णौतत्कथास
कौतौहस्तौतस्यपूजकौ ॥ तौनेत्रौपश्यतःशंभोस्तच्छिरःप्रणतंशिवे ॥ तौपादौयौशिवक्षेत्रेभक्त्यापर्यटतःसदा ॥ यस्येंद्रियाणिसर्वाणि
वर्तंतेशिवकर्मसु ॥ ससंतरतिसंसारंभुक्तिंमुक्तिंचविंदति ॥ शिवभक्तियुतोमर्त्यश्चांडालःपुल्कसोपिवा ॥ नारीन[illegible]रोवापारवंडोसद्यो
मुच्येतसंसृतेः ॥ किंकुलेनकिमाचारैःकिंशीलेनगुणेनवा ॥ भक्तिलेशायतःशंभोःसवंद्यःसर्वदेहिनां ॥ उज्जयिन्याबभूराजावं

द्रसेनसमाह्वयः॥ जातोमानवरूपेणद्वितीयइवराघवः॥ तस्मिन्कुळेमहाकाळंवसंतंपरमेश्वरं॥ सप्तजन्मन्यसौभक्त्याचंद्र
सेनोनृपोनाम॥ तस्याभवत्सखाराज्ञःशिवपारिषदाग्रणी॥ मणिभद्रोमहाभद्रःसर्वलोकनमस्कृतः॥ तस्यैकदामहीभर्तुःप्रसन्नःश्री
करानुगः॥ चिंतामणिंददौदिव्यंमणिभद्रोमहामतिः॥ समणिःकौस्तुभइवद्योतमानोऽर्कसन्निभः॥ दृष्टःश्रुतोवाध्यातोवानृणां
यच्छतिचिंतितं॥ तस्यैवकांतिसंस्पृष्टंकांस्यंताम्रमयस्त्रपुः॥ पाषाणादिकमन्यद्वासद्योभवतिकांचनं॥ सतंचिंतामणिंकंठेबिभ्रद्रा
ज्यासनंगतः॥ रराजराजलोकानांमध्येभानुरिवस्वयं॥ सदाचिंतामणिग्रीवंश्रुत्वातंराजसंमतं॥ अवहरोषाराजानःसर्वेक्षुब्धहृ
दोऽभवन्॥ स्नेहात्केचिद्भयाद्वापियाचंतेतेचदुर्महाः॥ दैवलब्धमजानंतोमणिमत्सरिणोनृपाः॥ सर्वेषांभूभृतांयाच्ञाप्यथाव्यर्थी
कृतामुना॥ राजानःसर्वदेशानांसंग्राममंचक्रिरेतदा॥ सौराष्ट्राःकैकयाःशाल्वाःकलिंगामद्रकास्तथा॥ पांचालावंतिसौवीरामागधा
मत्स्यसृंजयाः॥ एतेचान्येचराजानःसहस्ररथवाजिनः॥ चंद्रसेनस्यधेजेतुंसमरंचक्रुरोजसा॥ तत्रसर्वेसुसंरब्धाःकंपयंतोवसुंधरां॥
उज्जयिन्यावनुद्वारिरुरुधुर्बहुसैनिकाः॥ संरुध्यमानांस्वपुरींदृष्ट्वाराजाविरोधिभिः॥ चंद्रसेनोमहाकाळंतमेवशरणंययौ॥ निर्विक

त्योनिरातंकःसराज्ञाहृष्टनिर्भय॥अर्चयामासगौरीशंदिवानक्तमनन्यधीः॥एतस्मिन्नेवसमयेतत्रैवनगरोत्तमे।चरंतीगोपि
काकाचिन्महाकालांतिकंययौ॥सापंचहायनंबालंवहंतीगतभर्तृका।राज्ञाकृतांमहापूजांददर्शगिरिजापतेः॥सादृष्ट्वासर्वमा
श्चर्यंशिवपूजामहोदयं।प्रणिपत्यस्वतंराज्ञंपुनरेवाभ्यपद्यत॥एतत्सर्वमशेषेणसदृष्ट्वाबल्लवीसुतः॥कौतूहलेनविदधेशिवपूजावि
मुक्तिदां॥आनीयहृद्यपाषाणंशून्यात्तुशिबिरांतरात्॥नातिदूरेस्वशिबिराच्छिवलिंगमकल्पयत्॥यानिकानिचपुष्पाणिस्वहस्तेननिवा
त्मना।आनीयबाळस्तल्लिंगंपूजयामासभक्तितः॥गंधाऽळंकारवासांसिधूपदीपाक्षतादिकं।विधायकृत्रिमैर्दिव्यैर्नैवेद्यं
चाप्यकल्पयत्॥भूयोभूयःसमभ्यर्च्यपत्रैःपुष्पैर्मनोरमैः॥नृत्यंचविविधंकृत्वाप्रणनामपुनःपुनः॥एवंपूजांप्रकुर्वाणंशिवस्या
नन्यमानसं॥स्वपुत्रंप्रणयाद्गोपीभोजनायसमाह्वयत्॥यदाहूतोपिबहुशःसपूजासक्तमानसः॥बाळोपिभोजनंनैच्छत्तदामाता
समागता॥तंविलोक्यशिवस्याऽग्रेनिषण्णंमीलितेक्षणं।विकर्षपाणिंसंगृह्यकोपेनैनमताडयत्॥निकृष्टस्ताडितोवापिनागम
त्स्वसुतोयदा॥तांपूजांनाशयामासक्षिप्त्वालिंगंचदूरतः॥हाहेतिक्रंदमानंतंनिर्भर्त्स्यस्वसुतंतदा॥पुनर्विवेशास्वगृहंगोपीरोषस

स्का०

॥१८॥

मन्विता।।मात्राविनाशितांपूजांददर्शगिरिजापतेः।।देवदेवेतिचुक्रोशनिपपातसबाळकः।।प्रनष्टसंज्ञःसहसाबाष्पपूरित
लोचनः।।लब्धसंज्ञोमुहूर्तेनचक्षुषीउदमीळयत्।।ततोमणिस्तंभविराजमानंहिरण्मयंद्वारकपाटतोरणं।।महार्हना
ळामरवज्रवेदिकंतदैवजातंशिबिरंमहोदयं।।संतप्तहेमकलशैर्बहुभिर्विचित्रैः सौधंसमृद्धरन्तिंपरिवेष्टितंक।।रम्यंव
तच्छिवपुरंवृषपीठमध्येलिंगंवरत्नसंकृतंसददर्शबाळः।।सदृष्ट्वसहसोत्थायजातविस्मितमानसः।।निमग्नइवसंतो
षापरमानंदसागरे।।विज्ञायशिवपूजायामाहात्म्यंतस्यभावतः।।ननामदंडवद्भूमौस्वमातुरघशांतये।।देवक्षमस्वदुर्नी
तिंममममातुरुमापते।।मूढायास्त्वामजानंत्याःप्रसन्नोभवशंकर।।यद्यस्तिमयियत्किंचित्फलंत्वद्भक्तिसंभवं।।तेना
पिशिवमेमातातवकारुण्यमाप्नुयात्।।इतिप्रसाद्यगिरिशंभूयोभूयःप्रणम्यच।।सूर्येचास्तंगतेबाळोजगामशिवमंदिर
रं।।अथापश्यत्स्वशिबिरंपुरंदरगृहोपमं।।सद्योहिरण्मयीभूतंविचित्रविभवोज्वळं।।सोंतःप्रविश्यभवनंमोदमानो
निशामुखे।।महामणिगणाकीर्णंहेमराशिसमुज्वळं।।ततोपश्यत्स्वजननींस्वपंतीमकुतोभयां।।महार्हरत्नपर्यंके

सोपिधानेप्यधिष्ठितं॥ नानालंकारदीप्तांगी दिव्यांबरविराजिनी॥ दिव्यलक्षणसंपन्ना साक्षात्सुरवधूरिव॥ जैवेनोत्थापयामा
ससंभ्रमोत्फुल्ललोचना॥ अंबजागृहितागृहि पश्येदंमहदद्भुतं॥ इतिप्रबोधितागोपी स्वपुत्रेणमहात्मना॥ ससंभ्रमंसमुत्था
यतत्सर्वंप्रत्यदेक्षत॥ अपूर्वमिववासानमपूर्वमिवबालकं॥ अपूर्वंस्वस्वभवनंदृष्ट्वासीत्सुखविह्वला॥ ददर्शगोपिकासू
नोः प्रभावंशिवसंभवं॥ हिरण्मयंशिवस्थानंलिंगंमणिमयंतथा॥ गोपवध्वाश्चसदनंमाणिक्यकनकोज्वलं॥ दृष्ट्वामहीपतिः
सर्वःसामात्यःसपुरोहितः॥ समुद्भूतविस्मृतपरमानंदनिर्भरः॥ प्रेम्णाबाष्पजलंमुंचन्नृपःपरिरेभेतमर्भकं॥ एवमत्यद्भुतालोका
च्छिवमाहात्म्यकीर्त्तनात्॥ पौराणांसंभ्रमभाज्यापिसारात्रिःक्षणतामगात्॥ अथप्रभातमुत्थायपुरंसंतुष्यसंस्थिताः॥ राजानः
श्चारुवक्त्रोध्यःश्रुत्वात्वुःपरमाद्भुतं॥ तेत्यक्तवैराश्चकिताराजानःसहसाद्भुतं॥ न्यस्तशास्त्राःप्रविविशुश्चंद्रसेनानुमोदिताः॥
तांप्रविश्यपुरींरम्यांचंद्रसेनंप्रणम्यच॥ तत्रोपवनितागेहमाजग्मुःसर्वभूभुजः॥ तेतत्रचंद्रसेनेनप्रत्युद्गम्याभिपूजिताः॥
महार्हविष्टरगताःप्रत्यनंदन्सुविस्मिताः॥ गोपसूनोःप्रसादायप्रादुर्भूतंशिवालयं॥ लिंगंचवीक्ष्यसंप्रीताःशिवेचक्रुः
परांमतिं॥ तस्मैगोपकुमारायप्रीतास्तेसर्वभूभृतः॥ वासोहिरण्यरत्नानिगोमहिष्यादिकंधनं॥ गजानश्वान्रथान्रौक्मान्छ

न्वयान्नपरिच्छदान्॥ दासान्ग्रामाननेकांश्च दुदुः शिवकृतार्थिनः॥ ये ये सर्वेषु देशेषु गोपास्तिष्ठंति भूरिशः॥ तेषां तमेव राजा
नं चक्रिरे सर्वपार्थिवाः॥ अथास्मिन्नंतरे सर्वैस्त्रिदशैरभिपूजितः॥ प्रादुर्बभूव तेजस्वी हनुमान्वानरेश्वरः॥ तस्याभिगमनाद्देवरा
जानो जातसंभ्रमः॥ प्रत्युत्थाय नमश्चक्रुर्भक्तिनम्राः समंततः॥ह्रौ॥ तेषां मध्ये समासीनः पूजितः प्लवगेश्वरः॥ गोपात्मजं समालिं
ग्य राजानमिदमब्रवीत्॥ सर्वे शृणुत भद्रं वो राजानो ये च देहिनः॥ शिवपूजामृते नान्या गतिर्नास्ति शरीरिणां॥ एष गोपसुतो दृष्ट्वा
प्रदोषे मंदवासरे॥ अमंत्रेणापि संपूज्य शिवं शिवमवाप्तवान्॥ मंदवारे प्रदोषोयं दुर्लभः सर्वदेहिनां॥ तत्रापि दुर्लभस्तत्र कृष्णपक्षे
समागते॥ एष पुण्यतमो लोके गोपानां पुण्यवर्द्धनः॥ अस्यान्वये च ये जातास्ते महाभोगभोगिनः॥ अस्य वंशेऽष्टमो भावी नंदो
नाम महायशाः॥ प्राप्स्यते तस्य पुत्रत्वं कृष्णो नारायणः स्वयं॥ अद्यप्रभृति लोकेस्मिन्नेष गोपकनंदनः॥ नाम्ना श्रीकर इत्युच्चैर्बाढं
ख्यातिं गमिष्यति॥७६॥ सूत उवाच॥ ॥ एवमुक्त्वांऽजनीसूनुस्तस्मै गोपकसूनवे॥ उपादिश्य शिवाचारं तत्रैवांतरधीयत॥ ते
तु सर्वे महीपालाः संहृष्टाः प्रतिपूजिताः॥ चंद्रसेनं समामंत्र्य प्रतिजग्मुर्यथागतं॥ श्रीकरोपि महातेजा उपदिष्टो हनूमता॥ ब्राह्मणैः सह

37

धर्मात्माचक्रेशंभोःप्रपूजनं॥ कालेनश्रीकरोवापिचंद्रसेनोपिभूमिपः॥ समाराध्यशिवंभक्त्याप्रापतुःपरमंपदं॥ इदंपवित्रंपरमंरहस्यंयच्च
स्कारंस्वस्तिकरंमहेशं॥ आख्यातमाख्यानमघौघनाशनंगौरीशपादांबुजभक्तिवर्द्धनं॥ ॥०॥ शुभं॥ ४॥
॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेशिवभक्तिमहिमानामपंचमोऽध्यायः॥ ॥श्रीः॥ ॥४॥ ७॥ ऋषयऊचुः॥
यदुक्तंभवतासूतमहदाख्यानमुत्तमं॥ शंभोर्माहात्म्यकथनमशेषाऽघहरंपरं॥ भूयोपिश्रोतुमिच्छामस्तवदेवसमाहित॥
प्रदोषेभगवान्शंभुःपूजितस्तुमहात्मभिः॥ संप्रयच्छतिकांसिद्धिमेवंब्रूहिचसुव्रत॥ श्रुतेतस्मिन्सकृत्सूतभूयःश्रद्धा २०
प्रवर्त्तते॥ ॥ सूतउवाच॥ ॥ साधुसाधुमहाभागाभवद्भिर्लोकविश्रुतैः॥ तत्रपूज्योमहादेवोनान्योदेवःफलार्थिभिः॥ प्रदोषपू
जामाहात्म्यंकोनुवर्णयितुंक्षमः॥ यत्रसर्वेपिविबुधास्तिष्ठंतिगिरिशांतिके॥ प्रदोषसमयेदेवःकैलासेरजतालये॥ करोतिनृ
त्यंविबुधैरभिष्टुतगुणोदयः॥ अथपूजाजपोहोमस्तत्कथातद्गुणोदयः॥ कर्त्तव्योनियतंमर्त्यैश्चतुर्वर्गफलार्थिभिः॥ दारिद्र्यपर

मांधानामिदंहिपरमंज्ञानं॥ ऋणसागरमग्नानांप्लवोयंपरदर्शनः॥ दुःखशोकभयार्त्तानांक्लेशनिर्वाणकारकौ॥ प्रदोषेपार्वती
शस्यपूजनंमंगळोदयं॥ दुर्बुद्धिर्ध्यैवनीचोपिमंदभाग्योशठोपिवा॥ प्रदोषेपूज्यविश्वेशंविपद्भ्यःसंप्रमुच्यते॥ शत्रुभिर्हन्यमा
नोपिदंश्यमानोपिपन्नगैः॥ हिंस्रैराक्रम्यमानोपिपतन्नपिमहांबुधौ॥ आविद्धकाळदंडोपिनानारोगहतोपिवा॥ नविनश्य
तिमर्त्योसौप्रदोषेगिरिशार्चनात्॥ दारिद्र्यमरणंदुःखंऋणभारंनगोपमं॥ सद्योविधूयसंपद्भिर्युज्यतेशिवपूजनात्॥ अत्रवक्ष्येम
हापुण्यमितिहासंपुरातनं॥ यंश्रुत्वामनुजाःसर्वेप्रयांतिकृतकृत्यतां॥ आसीद्विदर्भविषयेनाम्नासत्यरथोनृपः॥ सर्वधर्मरतोधीरःसु
शीलःसत्यसंगरः॥ तस्यपाळयतोभूमिंधर्मेणमुनिपुंगवाः॥ महान्काळोप्यतीयायसुखेनैवमहामतेः॥ अथतस्यमहीभर्तुःशात्रवःशा
ल्वभूभुजः॥ बभूवुरुद्धतबळादुर्मर्षणपुरोगमाः॥ कदाचिदथतेशाल्वाःसंनद्धाबहुसैनिकैः॥ विदर्भनगरींप्राप्यरुरुधुर्विजिगीषवः॥
दृष्ट्वासंरुध्यमानांस्वांविदर्भाधिपतिःपुरीं॥ युद्धम ॥ योद्धुमभ्याययौतूर्णंबलेनमहताव्रतः॥ तस्यतैरभवद्युद्धंशाल्वैरतिमदोद्धतैः॥
पाताळेपन्नगैःसार्द्धंगंधर्वैरतिदुर्मदैः॥ विदर्भनृपतिःसोथकृत्वायुद्धंसुदारुणं॥ प्रणष्टोरुबलःशाल्वैर्निहतोरणमूर्द्धनि॥ तस्मिन्न

हारयेद्वीरैर्निहते मे त्रिभिः सह ॥ उडुकुसुमरेजन्मोढ तत्रोषास्कसैनिक ॥२१॥ अथ युद्धेषु विरतेन दृष्ट्वा रिपुमंत्रिषु ॥ नगर्यां युद्धमा
नायां जाते कोळाहळे वरे ॥ तस्य सस्वरथस्यैका विदर्भाधिपतेः सती ॥ २२ गार्या शोकसमाविष्टा कविपत्न्याधिनिर्ययौ ॥ सा
निशासमये यद्वा दंतर्वत्नी नृपांगना ॥ निर्गता शोकसंतप्ता प्रतीचिं प्रययौ दिशं ॥ अथ प्रभाते मार्गेण गच्छंती नानकैः स
ती ॥ अतीत्य दूरमध्वानं ददर्श विमळं सरः ॥ तत्रौस्य वरारोहा तप्तातापेन सत्यता ॥ निवासार्थं सरस्तीरे छायावृक्षसमाश्रि
ता ॥ तत्रैव दैववशात्तीव्रो विजने तरुकुट्टिमे ॥ असूत तनयं साध्वी मुहूर्ते सद्गुणान्विते ॥ अथ सा राजमहिषी पिपासाभिहतान्तरां ॥२७॥२९॥
सरोऽवतीर्णा सा राज्ञी यत्ताया हेणभूयसा ॥ जातमात्रकुमारोऽपि विनष्टपितृमातृका ॥ २८ रुरोदे सोसरस्तीरे क्षुत्पिपासातुरो बळः ॥
तस्मिन्नेवं क्रंदमाने जातमात्रे कुमारके ॥ काचिदभ्याययौ त्रा ध्वं धष्ट्वा विप्रवरांगना ॥ साप्येकहायनं बाळमुद्वहंती मिवात्मजं ॥३०
अंगनाभर्तृरहिता याचमाना गृहे गृहे ॥ एकात्मजा बंधुहीना यायावामार्गवशंगता ॥ उमानाम द्विजसती ददर्श नृपनंदनं ॥

मुत्कटंशब्दंराजात्यक्त्वाशिवार्चनं॥ निर्ययौराजभवनान्नगरक्षोभशंकया॥ एतस्मिन्नेवसमयेतस्यामात्योमहाबल:॥२ तत्रात्तसामंतराजांतिकमुपाययौ॥ अमात्येनसमानीतंशत्रुसामंतमुद्धतं॥ दृष्ट्वाक्रोधेननृपति:शिरश्छेदमकारय महीपालोविसृज्यशिवपूजनं॥ असमाप्तात्मनियमश्चकारशिवपूजनं॥ तत्पुत्रोऽपितथाचक्रेप्रदोषसमयेशिवं॥ अनर्चात्मानुविस्मृत्यपापदुर्मद:॥ सौ॥ जन्मांतरेसनृपतिर्विदर्भेक्षितिपोभवत्॥ शिवार्चनांतरायेणपरैर्भोगांतरेहत:॥ तत्पुत्रोयंपूर्वस्मिन्जन्मनितत्सुत:॥ त्वादरिद्रमापन्न:शिवपूजाव्यतिक्रमात्॥ अस्यमातापूर्वभवेसपत्नींछद्मनाहनत्॥ तेनपापेनमहताग्राहेणास्मिन्भवेहता॥ एषाप्रकृतिरेतेषांभूदेविपरिकीर्तिता॥ अनर्चितशिवमर्त्या:प्राप्नुवंतिदरिद्रतां॥ सत्यंब्रवाम्यपरलोकहितंब्रवीमिसारंब्रवाम्युपनिषद्धृदयंब्रवीमि॥ संसारमुल्बणमसारमवाप्यजंतो:सारोयमीश्वरपदाब्जयुगस्यसेवा॥ येनार्चयंतिमहतिप्रदोषेयेप्यर्चितंशिवपदंप्रणमंतिनान्यै:॥ एतत्कथांश्रुतिपुटैर्नपिबंतिधीरास्तेजन्मजन्मनिभवत्यरुदु:खभाजा:॥ येवैप्रदोषसमयेऽपरमेश्वरस्यकुर्वंत्यनन्यमनसोंघ्रिसरोजसेवां॥ नित्यंप्रवृद्धधनधान्यकलत्रपुत्रसौभाग्यसंपदधिकास्तइहैवलोके॥ कैलास

कैलसभवने त्रिजगज्जनित्रिं गौरी निवेश्य कनकाचितरत्नपीठे॥ नृत्यं विधातुमभिवांछति शूलपाणौ देवाः प्रदोषसमये ऽनुभजंति
सर्वे॥ वाग्देवी धृतवल्लकी शतमखो वेणुं दधत्पद्मजस्तालोन्निद्रकरो रमा भगवती गेयप्रयोगान्विता॥ विष्णुः सांद्रमृदंगलग्न
नपटो देवाः समंतात्स्थिताः सेवंते तमनु प्रदोषसमये देवं मृडानीपतिं॥ गंधर्वयक्षपतयोरगसि।द्धसाध्यविद्याधरामरवरा
रसांगणाश्च॥ येन्ये त्रिलोकनिलयाः सहभूतवर्गाः प्राप्ते प्रदोषसमये हरपार्श्वसंस्थाः॥ तस्मात्प्रदोषसमये शिव एव पूज्यो ना
न्ये तथा हि हरिपद्मजवासवाद्याः॥ तस्मिन्शिवेन विधिना परिपूज्यमाने सर्वे प्रसन्न भवतेति सुराधिनाथाः॥ एष ते तनयः पूर्वज
न्मनि ब्राह्मणोत्तमः॥ प्रतिग्रहैर्वयो निन्ये न दानाद्यैः सुकर्मभिः॥ अतो दारिद्र्यमापन्नः पुत्रस्ते द्विजभामिनी॥ तद्दोषपरिहारा
रणं यातु शंकरं॥ ८२॥ श्रीरस्तु॥ छ॥ ४॥ ॥ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे प्रदोषमहिमा नाम षष्ठोऽध्याय
॥ ६॥ ४॥ छ॥ ॥ सूत उवाच॥ इत्युक्ता मुनिना साध्वी सा विप्रवनिता पुनः॥ तं प्रणम्याऽथ पप्रच्छ शिवपू
मं॥ ॥ शांडिल्य उवाच॥ ॥ पक्षद्वये त्रयोदश्यां निराहारो भवेद्दिवा॥ परित्रयादयो स्तमात्पूर्वं स्नानं समाचरेत्॥ शुक्ल।१०

है

मयाकृतां ॥ इतिसंकल्पविधिवद्बाह्यपूजांसमारभेत् ॥ गुरुंगणपतिंचैवयजेत्सव्यापसव्ययोः ॥ क्षेत्रेशमीशकोणेचवह्नौकात्यायनींयजे
त् ॥ धर्मज्ञानंचवैराग्यमैश्वर्यंचनमोंतकैः ॥ स्वरैरग्न्यादिकोणेषुपीठपादमनुक्रमात् ॥ आभ्यांचबिंदुसर्गाभ्यामधर्मादीन्प्रपू
जयेत् ॥ मातृरूपाश्चतुर्दिक्षुमध्येनंतंसतारकं ॥ सत्वादींस्त्रिगुणांस्तत्र उपरीष्टुविन्यसेत् ॥ अतऊर्ध्वंह्रदेमायाविद्यालक्ष्योशिवेनच ३२॥
तद्यत्नेचांबुजंरूपःसकलंमंडलत्रयं ॥ पत्रकेसरकिंजल्कव्याप्तरक्ताक्षरैःक्रमात् ॥ आसनत्रयंसमभ्यर्च्यमध्येमंडलमादरात् ॥
ज्येष्ठांलक्ष्मींचरौद्रींचभागद्यैर्दिक्षुपूजयेत् ॥ वामाद्यानवशक्तिश्चनवस्वरयुतायजेत् ॥ दिव्यबीजत्रयाद्येनपीठमंत्रेणचार्चयेत् ॥ ३३॥
आवृत्तिःप्रथमांगैस्तुपंचाग्निर्न्निशक्तिभिः ॥ सिद्धिश्चैत्रिणिमाद्याभिरिंद्राद्यैस्तथाबुधैः ॥ वृषभक्षेत्रपचंडीशौदुर्गाचस्कंदनंदनौ ॥ गणे
शःसैन्यपश्चैवस्वस्वलक्षणलक्षिताः ॥३४॥ अणिमागणिमाचैवलघिमामहिमातथा ॥ ईशात्वंचवशित्वंचप्राप्तिःप्राकाम्यमेवच ॥ अ
ष्टैश्वर्याणिप्रोक्तानितेजोरूपाणिकेवलं ॥ पंचाग्निर्ब्रह्मभिःपूर्वंहृल्लेखाद्यादिभिर्नतु ॥ अंगैरुमाद्यैरिंद्राद्यैःपूजोक्तामुनिभिस्त्वतैः ॥
उमामाहेश्वरादींश्चपूजयेदुत्तरादितः ॥ यथाक्रमेणचैयुक्तंतेजोरूपंसदाशिवं ॥ उमयासहितंदेवंलक्ष्यस्कैःसमाहितः ॥ कल्पयेद्दिवि

५३

धैर्मैत्रैरासनाद्युपचारकान् ॥ सुप्रतिष्ठितशंखस्य तीर्थैः पंचामृतैरपि ॥ अभिषिंच्य महादेवमुपचारैः प्रपूजयेत् ॥ अर्घ्यमष्टगुणोपेतं पाद्यं शुद्धोदकेन च ॥ तेनैवाचमनं दद्यान्मधुपर्कमथोत्तमं ॥ पुनराचमनं दद्यात्स्नानं मंत्रैः प्रकल्पयेत् ॥ उपवीतं तथा वासो भूषणानि निवेदयेत् ॥ गंधमष्टांगसंयुक्तं फलं तत्राक्षतान्निवेदयेत् ॥ ततश्च बिल्वमंदार कल्हारसरसीरुहं ॥ धुत्तूरं कर्णिकारं च द्रोणपुष्पं च मल्लिका ॥ कुशाऽपामार्गतुलसीमाधवी बकुजातिकां ॥ बृहतीपुष्पवारिपि यथालब्धानि साधयेत् ॥ निवेदयेत्सुगंधीनि माल्यादीन्निविधानि च ॥ धूपं कृष्णागुरुतरं दीपं च विविधं शुभं ॥ अथ पायसनैवेद्यं सघृतं सोपदंशकं ॥ मोदकापूपसंयुक्तं शर्करागुडसंयुतं ॥ मधुनोक्तं दधियुतं जळपानसमन्वितं ॥ तेनैव हविषा वह्नौ जुहुयान्मंत्रभावितः ॥ आगमोक्तेन विधिना गुरुवाक्यनियंत्रितः ॥ नैवेद्यं त्वर्भवेद्भूयो दत्त्वा तांबूलमुत्तमं ॥ धूपं नीराजनं दिव्यं छत्रं दर्पणमुत्तमं ॥ समर्पयित्वा विधिवन्मंत्रैर्वैदिकतांत्रिकैः ॥ पद्यशालः स्वयं चिंत्सो यथा विभवमर्चयेत् ॥ भक्त्यास्तेन गौरीशः पूजामात्रेण तुष्यति ॥ अथांगभूतान् सकलान् गणेशादीन् प्रपूजयेत् ॥ सर्वैर्नामगुणैः स्तुत्वा साष्टांगप्रणमेद्बुधः ॥ ततः प्रदक्षिणीकृत्य वृषचंडेश्वरादिकान् ॥ पूजां समाप्य विधिवत्प्रार्थयेद्गिरिजापतिं ॥ जयदेव जयाऽजेय जय शंकर शाश्वत ॥ जय सर्वसुराध्यक्ष जय सर्वसुरार्चित ॥ जय सर्वगुणातीत जय सर्व

रप्रद॥ जयनिसनिराधार जय विश्वंभराऽव्यय॥ जयविश्वैकवंद्येश जयनागेंद्रभूषण॥ जयरुद्र विरूपाक्ष जयाऽविंसनिरामय॥ ज
यगौरीपतेशंभो जयचंद्रार्धशेखर॥ जयकोट्यर्कसंकाश जयाऽनंतगुणाकर॥ जयगंगाजटाजूट जयत्रैलोक्यरक्षक॥ जयना
थकृपासिंधो जयभक्तार्तिनाशन॥ जयदुस्तारसंसारसागरोत्तरणप्रभो॥ प्रसीदमेमहाभाग संसारार्त्तस्यखिद्यतः॥ सर्वपापक्ष
यंकृत्वारक्षमांपरमेश्वर॥ महादारिद्रनिमग्नस्यमहापापहतौजसः॥ महाशोकनिविष्टस्यमहारोगातुरस्यच॥ ऋणभारपरीतस्यद
ह्यमानस्यकर्मभिः॥ ग्रहैःप्रपीड्यमानस्यप्रसीदममशंकर॥ दरिद्रःप्रार्थयेद्देवंपूजांतेगिरिजापतिं॥ अर्थाढ्योवादरिद्रोवा
प्रार्थयेद्देवमीश्वरं॥ दीर्घमायुःसदारोग्यंकोशवृद्धिर्बलोन्नतिः॥ ममास्तुनित्यमानंदःप्रसादात्तवशंकर॥ रिपवः
संक्षयंयांतुप्रसीदंतुमहाग्रहाः॥ नश्यंतुदस्यवोराष्ट्रेजनाःसंतुनिरापदः॥ दुर्भिक्षचारिसंतापःशमंयांतुमहीत
ळे॥ सर्वसस्यसमृद्धिश्चभूयात्सुखमयादिशः॥ एवमाराधयेद्देवंप्रदोषेपार्वतीपतिं॥ ब्राह्मणान्भोजयेत्पश्चात्
दक्षिणाभिश्चपूजयेत्॥ सर्वपापक्षयकरीसर्वदारिद्र्यनाशिनी॥ शिवपूजेयमाख्यातासर्वाभीष्टफलप्रदा॥
महापातकसंघातमधिकंचोपपातकं॥ शिवद्रव्यापहरणादन्यसर्वंविनाशयेत्॥ ब्रह्महत्यादिदोषाणांपुराणे
षुश्रुतिष्वपि॥ प्रायश्चित्तानिचोक्तानिनशिवद्रव्यहारिणः॥ बहुनात्रकिमुक्तेनश्लोकार्धेनब्रवीम्यहं॥ ब्रह्महत्

ज्ञातं वापि तव पूजा विनाशयेत्॥ मया कथितमेतत्ते प्रदोषे शिवपूजनं॥ रहस्यं सर्वजंतूनामत्र नास्त्येव संशयः॥ एताभ्या
मपि बालकाभ्यां शिवपूजा विधीयतां॥ अतः सर्वेश्वरो देवः परां सिद्धिं प्रदास्यति॥ इति शांडिल्यवचनमाकर्ण्य द्विजभा
मिनी॥ ताभ्यां सह बालकाभ्यां प्रणनाम मुनेः पदे॥ ॥विप्रस्त्र्युवाच॥ ॥अहमद्य कृतार्थास्मि तव दर्शनमात्रतः॥
एतौ कुमारौ भगवंस्त्वामेव शरणं गतौ॥ एष मे तनयो ब्रह्मन् शुचिस्मितरैवश्रुतिः॥ एष राजसुतो नाम्ना धर्मगु
प्तः कृतो मया॥ एतावहं च भगवंस्तव चरणकिंकराः॥ समुद्धयस्मात्पतितान् घोरसंसारसागरे॥ इति प्रपन्नां शर
णां द्विजस्त्रीमाश्वास्य वाक्यैरमृतायमानैः॥ उपादिदेशाध्ययोः कुमारयोर्मुनिः शिवाराधनमंत्रविधिं॥ अथोपदिष्टौ
मुनिना कुमारौ ब्राह्मणी च सा॥ तं प्रणम्य समामंत्र्य जग्मुस्ते शिवमंदिरात्॥ ततः प्रभृति तौ बालौ मुनिवर्योपदे
शतः॥ प्रदोषे पार्वतीशस्य पूजां चक्रतुरंजसा॥ एवं पूजयतोर्देवं राजद्विजकुमारयोः॥ सुखेनैव व्यतीयाय तयो
र्मासचतुष्टयं॥ कदाचिद्राजपुत्रेण विनास्नौ द्विजनंदनः॥ स्नातुं गतो नदीतीरे चचार बकुलीलया॥ तत्र निर्झर
निर्घातप्रभिन्ने वप्रकुट्टिमे॥ निधानकलशं दिव्यं स्फुरंतं च ददर्श सः॥ स दृष्ट्वा सहसागत्य हर्षकौतुकविह्व
लः॥ दैवोपपन्नं मन्वानो गृहीत्वा शिरसादधौ॥ स्वसद्मनं समानीय निधानकलशं बालकात्॥ निधाय भवन
स्यांते मातरं समभाषत॥ मातर्मातरिदं पश्य प्रसादं गिरिजापतेः॥ निधानकुंभरूपेण दर्शितं करुणात्मना॥ प्र
घसा विस्मिता साध्वी समाहूय नृपात्मजं॥ स्वपुत्रं प्रतिनंघाह मानयंती शिवार्चनं॥ शृणुतामेव वःपुत्रौ नि

राम
॥२

धानवत्सशालिमं॥ समंविभज्यगृह्णीतांममशासनगौरवात॥ इतिमातुर्वचःश्रुत्वातुतोषद्विजसत्तमः॥ अत्य
हराजपुत्रस्तां विस्मितःशशंकरावर्धने॥ मातस्तवसुतस्यैवसुकृतेनसमागतं॥ नाहंविभक्तुमिच्छामिगृहीतुंधन
संचयं॥ आत्मनःसुकृताल्लब्धंस्वयमेवनयत्वसौ॥ यदाकदाविभ्रैरागत्रोकरिष्यतिकृपांमयि॥ एवमर्चय
तोःशंभुंभक्त्योपिपरयामुदा॥ संवत्सरोव्यतीयायतस्मिन्नेवगृहेतयोः॥ अथैकदाराजसूनुसहतेनद्विजन्मना॥
वसंतसमयेप्राप्तेविजहारवनांतरे॥ अतोदूरंगतोक्वापिवनेद्विजनृपात्मजो॥ गंधर्वकन्याःक्रीडंतीशतशस्त
वपश्यतां॥ ताःसर्वाःश्वासर्वांग्योविहरंत्योमनोहरं॥ दृष्ट्वाद्विजात्मजोदूरातउवाचनृपनंदनं॥ इतःपरंनगंतव्यं
विहरंत्ययमतःस्त्रियः॥ स्त्रीसंनिकर्षंविबुधात्यजंतिविमलाशयाः॥ एताःकैतवकारिण्योपनयोवनदुर्मदाः
मोहयंतिजनंदृष्ट्वावरानुनयकोविदाः॥ अतःपरित्यजेत्स्त्रीणांसंनिधिसमभाषणं॥ निजधर्मपरतोधीमान्
ब्रह्मचारीविशेषतः॥ अतोहंनोत्सहेगंतुंक्रीडास्थानमगीदृशा॥ इत्युक्त्वाद्विजपुत्रस्तुनिवृत्तोदूरतःस्थितः॥
अथासौराजपुत्रस्तुकौतुकाविष्टमानसः॥ तासांविहारपदवींएकएवययौतदा॥ तत्रगंधर्वकन्यानामध्ये
त्वेकैवरांगना॥ दृष्ट्वातंराजतनयंचिंतयामासचेतसा॥ अहोकोयमुदारांगोयुवासर्वांगसुंदरः॥ मत्तमातं
गगमनोलावण्यामृतवारिधिः॥ लीलालोलविशालाक्षोमधुरस्मितसेरवकः॥ मदनोपमरूपश्रीःसुकुमारः

ट

गलक्षणः॥ इत्याश्चर्यसुता बाल्या दूराद्दृष्ट्वा नृपात्मजं॥ सखीः सर्वाः समालोक्य वचनं चेदमब्रवीत्॥ इतो विदू
रे हे सख्यो वनमस्त्येकमुत्तमं॥ विचित्रं चंपकाशोकपुन्नागबकुलैर्युतं॥ तत्र गत्वा द्रुतं सर्वाः संचीय कुसुमोत्क
रं॥ सवंत्यः पुनरायांतु तावत्तिष्ठाम्यहं विदू॥ इत्यादिष्टः सखीवर्गो जगाम विपिनांतरं॥ सापि गंधर्वजा तस्मि
न्न्यस्तदृष्टिर्नृपात्मजे॥ राजपुत्रः समालोक्य कौतुकोत्फुल्ललोचनः॥ अवाप दैवयोगेन मदनस्य शरव्यतां॥ गं
धर्वतनया सा च प्राप्ताय नृपसूतवे॥ उत्थाय प्रददौ तस्मै तरसा पल्लवासनं॥ कृतोपचारमासीनं तमासाद्य सु
मध्यमः॥ पप्रच्छ तद्रूपगुणैर्ध्वस्तधैर्यं कुलेंद्रियः॥ कस्त्वं कमलपत्राक्ष कस्माद्देशादिहागतः॥ कस्य पुत्र इति प्रे
म्णा पृष्टः सर्वं न्यवेदयत्॥ विदर्भराजतनये विद्धि त्वं पितृमातृकं॥ शत्रुनिर्हृतमास्थानमात्मानं परराष्ट्रगं॥ स
र्वमावेद्य भूपस्तां पप्रच्छ नृपनंदनः॥ का त्वं वामोरु किं वात्र कार्यं ते कस्य चात्मजा॥ किमिह ध्यायसि हृदा किं वा
वक्तुमिहेच्छसि॥ इत्युक्त्वा सा पुनः प्राह शृणु राजेंद्रसत्तम॥ अस्त्येकाड्डाविको नाम गंधर्वाणां कुलाग्रणीः॥ तस्या
हमस्मि तनया नाम्ना चांभ्रमती स्मृता॥ त्वामायातं विलोक्याहं त्वत्संभाषणलालसा॥ इत्युक्त्वा सखीजनं सर्व
मेकैवास्मि महामते॥ सर्वसंगीतविद्यासु नमत्तोन्यास्ति काचन॥ मम गेयेन तुष्यंति सर्वा अपि सुरस्त्रियः॥ सा
हं सर्वकलाभिज्ञा ज्ञाता सर्वजनैर्गिता॥ तमाहमीप्सितं वेद्मि मयि ते संगतं मनः॥ तथा ममापि नो सख्य दैवेन

58

प्रतिपादितं॥ आवयोः स्नेहभेदोत्र भ नाभिभ्रयादितः परं॥ इति संभाष्य तेनाशु प्रेष्यमा गंधर्वनंदनी॥ मु- ८
क्ताहारं ददौ तस्मै स्वकुचांतरभूषणं॥ तमादायाद्भुतं हारं स तस्याः प्रणयाकुलः॥ गाढहर्षभरोसिक्त
इदमाह नृपात्मजः॥ सत्यमुक्तं त्वया भीरु तथाप्येकं वदाम्यहं॥ त्यक्तराज्यस्य निःस्वस्य कथं त्वं भवसि
प्रिया॥ सा त्वं पितृमती बाला विलंघ्यापि तच्छासनं॥ स्वछंदाचरणं कर्त्तुं मठेव कथमर्हसि॥ इति तस्य
वचः श्रुत्वा तत्प्रत्याहभ्रु विस्मिता॥ अस्तु नाम तथैवाहं करिष्ये पत्र्यकौतुकं॥ गच्छ तावत्स्वभवने परश्वः
प्रातरेव तु॥ आगच्छ पुनरत्रैव कार्यमस्ति च नो मृषा॥ इत्युक्त्वा तं नृपसुतं सा संगतसखीजनं॥ अपक्रा-
त्ये॰ मत चार्वंगी स चापि नृपनंदनः॥ समभ्यैहहर्षेण द्विजपुत्रस्य सन्निधिं॥ सर्वमाख्याय तेनैव सार्धं
स्वभवनं ययौ॥ तां च विप्रसती भृत्यो र्हर्षयित्वा नृपात्मजः॥ परश्वो द्विजपुत्रेण सार्धं तेन वनं ययौ॥
स तया पूर्वनिर्दिष्टं स्थानं प्राप्य नृपात्मजः॥ गंधर्वराजमद्राक्षीत्स्वदुहित्रा समन्वितं॥ स गंधर्वपतिः
प्राप्ता वभिनंद्य कुमारकौ॥ उपवेश्यासने रम्ये राजपुत्रमभाषत॥ ॥गंधर्व उवाच॥ ॥राजेंद्रपुत्र प-
वैधुः कैलासं गतवानहं॥ तत्रापश्यं महादेवं पार्वत्या सहितं विभुं॥ आहूय सांसदे चेन्द्राः सर्वेषां च दिवौ-
कसां॥ सन्निधावाह भगवान् करुँमृतवारिधिः॥ धर्मगुप्ताह्वयः कश्चिद्राजपुत्रोस्ति भूतले॥ अकिंचनो

मा

59

भ्रष्टराज्यो हतबंधुश्च शत्रुभिः॥ सत्यालोगुरुवाक्येन मद्भार्यायां रतः सदा॥ यथासौ निजराज्यस्थो हतश
त्रुर्भविष्यति॥ अपत्यत्मितरः सर्वे प्राप्तामां तत्प्रभावतः॥ तस्य त्वमपि साहाय्यं गुरु गंधर्वसत्तम॥ इत्या
ज्ञप्तो महेशेन संप्राप्त निजमंदिरं॥ अनया मे दुहित्रा च बहुशोऽभ्यर्थितः सदा॥ अत एनां प्रयच्छामि कन्यां
मंशुमती तव॥ हत्वा शत्रून्स्वराष्ट्रे च स्थापयित्वा शिवाज्ञया॥ सत्वेदं सकलं प्राप्तो नियोगं करुणात्मना॥ १८
आदाय मां दुहितरं प्राप्तोस्मीदं वनांतरं॥ तस्मिन्पुरे त्वमनया भुक्त्वा भोगान्यथेप्सितान्॥ दशावर्षस
हस्रांते गतासि गिरिजालयं॥ तत्रापि मम कन्येयं त्वामेव प्रतिपत्स्यते॥ अनेनैव स्वदेहेन दिव्येन नि
वसन्निधौ॥ इति गंधर्वराजस्तमाभाष्य नृपनंदनं॥ तस्मिन्वने स्वदुहितुः पाणिग्राहमकारयत्॥ पा
रिबर्हं मुदा तस्मै रत्नभारान्महोज्ज्वलान्॥ चूडामणिं चंद्रनिभं मुक्ताहारांश्च भासुरान्॥ दिव्यालंका
रवासांसि कार्त्तस्वरपरिच्छदान्॥ गजानामयुतं भूयो नियुनीलवाजिनं॥ स्यंदनानां सहस्राणि तूणौ चा ति राम
क्षयसायकौ॥ अभेद्यं चर्म सौवर्णं शक्तिं चारिप्रमर्दिनीं॥ दुहितुः परिचर्यार्थं कन्यानां तु सहस्रकं॥ ददौ ॥२०॥
प्रीतमना तस्मै धनानि विविधानि च॥ गंधर्वसैन्यमतुलं चतुरंगसमन्वितं॥ पुनश्च तत्सहायार्थं गं
धर्वाधिपतिर्ददौ॥ इत्थं राजेंद्रतनयः संप्राप्य श्रियमुत्तमां॥ अभीष्टजायासहितो मुमुदे निजसंपदा॥

कारयित्वास्वदुहितुर्विवाहंसमयोचितं॥ ययौविमानमारुह्यगंधर्वाधिपतिर्ध्रुवं॥ धर्मगुप्तःकृतोद्वाह
सहगंधर्वसेनया॥ विशोषितारातिबलः प्रविवेशनिजंपुरं॥ पुनःस्वनगरीप्राप्य जघानारिपुवाहिनी॥
दुर्धर्षणांरणेहत्वाशत्त्यागंधर्वसेनया॥ प्रदोषेशिवपूजायाः प्रविवेशनिजंपुरं॥ ततोभिषिक्तःसचि
वैब्राह्मणैश्चमहोत्तमैः॥ रत्नसिंहासनारूढः चक्रेराज्यमकंटकं॥ याविप्रवनिता पूर्वंतमपुत्रंस्वपुत्रवत्॥
सैवमाताभवत्तस्यसभ्राताद्विजनंदनः॥ गंधर्वःतनयांप्राप्यविदर्भाविषयंगतः॥ आराध्यदेवदेवेशं
धर्मगुप्तोनृपोभवत॥ एवमन्येसमाराध्यप्रदोषेगिरिजापतिं॥ लभंतेईप्सितांसर्वान्कामान्देहांतेपरमं
गतिं॥१५७॥ श्रीसूतउवाच॥ ॥ एतद्व्रतंमहापुण्यंप्रदोषेशंकरार्चनं॥ धर्मार्थकाममोक्षाणामेतत्प
रमसाधनं॥ एतद्यःशृणुयात्पुण्यमाख्यानंमहदद्भुतं॥ प्रदोषेशिवपूजांतेकथयेद्वासमाहितः॥ नैवेह
तस्यदारिद्र्यंजन्मांतरशतेष्वपि॥ ज्ञानैश्वर्यसमायुक्तःसोंतेमुक्तिमवाप्नुयात्॥ येप्राप्यदुर्लभमिदंमनु
जाशरीरंकुर्वंतिहंतिपरमेश्वरपादपूजां॥ धन्यास्तएवनिजपुण्यजितत्रिलोकास्तेषांपदांबुजरजोभु
वनंपुनाति॥१५८॥ श्रीः॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेप्रदोषमाहात्म्यंनामसप्तमोध्यायः॥
॥ ॥श्रीः॥ ॥श्रीसूतउवाच॥ ॥नित्यानंदमयंशांतंनिर्विकल्पंनिरामयं॥ शिवतत्वमनाद्यंतं

ST

येविदुस्तेपरंगताः॥ विरक्ताःकामभोगेभ्योयेचकुर्वंत्यहेतुकीं॥ भक्तिंपरांशिवेशैवेधीरास्तेषांमुक्तिर्नसंशयः॥ २॥
विषयान्नाभिसंध्यायैयेकुर्वैकुर्वंतिशिवेरतिः॥ किंपुनर्येनाभिलष्यंतेभुंजानास्तत्फलान्यपि॥ केनयेनापिभा
वेनशिवभक्तियुतोनरः॥ नविनश्यतिकुत्रापिभावेनापिपरांगतिं॥ आरुरुक्षुःपरंस्थानंविषयांस्त्यमक्षमः॥
पूजकैयेत्कर्मणानांभुभोगांतेशिवमाप्नुयात्॥ अशक्तःकश्चिदुत्स्रष्टुंप्रायोविषयवासनां॥ अतःकर्मम
यीपूजाकामधेनुःशारीरिणां॥ मायामयेपिसंसारेयेविहृत्यपरंसुखं॥ मुक्तिमिच्छतिदेहांतेतेषांधर्मोयमी
रितः॥ शिवपूजासदाकार्याहेतुःस्वर्गापवर्गयोः॥ सोमवारेविशेषेणप्रदोषादिगुणैर्युते॥ केवलेवापिये
कुर्युःसोमवारेशिवार्चनं॥ नतेषांविद्यतेकिंचिदिहामुत्रचदुर्लभं॥ उपोषितःशुचिर्भूत्वासोमवारेजिते
जितेंद्रियः॥ वैदिकेलौकिकेवापिविधिवत्पूजयेच्छिवं॥ ब्रह्मचारीगृहस्थोवाकन्यावापिसभर्तृका॥ विभर्तृ
कावासंपूज्यलभतेपरमांगतिं॥ अत्राहंकथयिष्यामिकथांश्रोत्रमनोरमां॥ शृणुतावहितधियःशंभोर्भक्तिकुर्वं
तिनिश्चलां॥ आर्यावर्तेनृपःकश्चिदासीत्परमधार्मिकः॥ चित्रवर्मेतिविख्यातोधार्मिकोराजसत्तमः॥ सगो
प्ताधर्मसेतूनांशास्तादुष्पथगामिनां॥ येषांसफलयज्ञानांत्राताशरणमिच्छतां॥ कर्त्तासकलपुण्यानांदा
तासफलसंपदां॥ जेतासफलवृंदानांभक्तिःशिवमुकुंदयोः॥ सोनुकूलासुपत्नीषुलब्ध्वापुत्रान्महोजसः॥

राम
॥२६॥

(52)

२

चिरेणप्रार्थितांलेभे कन्यामेकांवरांगनां॥ सएकदाज्ञातकलक्षणज्ञानाहूयसर्वोद्विजवृंदमुख्यान्
कुतूहलेनाभिविनिष्टचेताःपप्रच्छकन्याजननेफलानि॥ अथतत्राब्रवीदेकोबहुज्ञोद्विजसत्तमः॥ए
षासीमंतिनीनाम्नाकन्यातवमहीपते॥ उमेवमंगलवतीदमयंतीवरूपिणी॥ भारतीवकलाभिज्ञाल
क्ष्मीरिवमहागुणा॥ सुप्रजादेवमातेवजानकीवघृतव्रता॥ रविप्रभेवसत्कांतिश्चंद्रिकेवमनोरमा॥ ॥२०॥
दशावर्षसहस्राणिसहभर्त्राप्रमोदते॥ अस्यस्तनयानष्टौपरंसुखमवाप्स्यसि॥ इत्युक्तवंतंनृपतिर्ध
नैःसंपूज्यतंद्विजं॥ अवापपरमांप्रीतिंतद्वागमृतसेवया॥ अथान्योपिद्विजःप्राहधैर्यवानविशंकि
तः॥ एषाचतुर्दशेवर्षेवैधव्यंप्रतिपत्स्यति॥ इत्याकर्ण्यवचस्तस्यवज्रनिर्घातनिष्ठुरं॥ मुहूर्त्तमभव
द्राजाचिंताव्याकुलमानसः॥ अथसर्वान्समुत्सृज्यब्राह्मणान्ब्रह्मवत्सलः॥ सर्वदेवेवरांमत्वानि
श्चितंपार्थिवोभवत्॥ सापिसीमंतिनीबालाक्रमेणागतयौवना॥ वैधव्यमात्मनोभाविशुश्रावाप्त
सखीमुखात्॥ परंनिर्वेदमापन्नातदाकर्ण्यभृशविस्मिता॥ याज्ञवल्क्यमुनेःपत्नींमैत्रेयींपर्यपृच्छ
त्॥ मातस्त्वच्चरणांभोजंप्रपन्नास्मिभयाकुला॥ सौभाग्यवर्धनंकर्मममसंसितुमर्हसि॥ इतिप्रप
न्नांनृपतेःकन्यांप्राहमुनेःसती॥ शरणंव्रजतत्वंगौरीपार्वतींशिवसंयुतां॥ सोमवारेशिवगौरीपूज

53

स्कं॰१

येत्सुसमाहितः॥ उपोषिताचसुस्नाताविरजांबरधारिणी॥ यतवाग्भक्तिनमतिः पूजांकृत्वायथोचि
ता॥ ब्राह्मणान्भोजयित्वाचशिवंसम्यक्प्रसाद्य॥ पापक्षयोभिषेकेणसाम्राज्यंपीठपूजनात॥
सौभाग्यमक्षयंसौख्यंगंधमाल्याक्षतार्चनात॥ धूपदानेनसौगंध्यंकांतिदीपप्रदानतः॥ नैवेघेन
महाभोगोलक्ष्मीस्तांबूलदानतः॥ धर्मार्थकाममोक्षाणांनमस्कारःप्रसाधनं॥ अष्टैश्वर्यादिसिद्धी
नांजपएवहिकारणं॥ होमेनसर्वकामानांसमृद्धिरुपजायते॥ सर्वेषामेवदेवानांतुष्टिःस्याद्विजभो
जनात॥ इत्थमाराधयशिवंसोमवारेशिवामपि॥ अत्यापदमपिप्राप्ताविपद्भिर्नानुभूतवे॥ घोरा
घोरंप्रपन्नापिमहाक्लेशांभयानकं॥ शिवपूजाप्रभावेनतरिष्यसिमहद्भयं॥ इत्थंसीमंतिनीसम्यग
नुशास्यमुनेःसती॥ ययौसापिवरारोहाराजपुत्रीतथाकरोत॥ दमयंत्यानलस्यासीदिंद्रसेनोद्भवः
सुतः॥ तस्यचंद्रांगदोनामपुत्रोभूच्चंद्रसन्निभः॥ चित्रवर्मानृपश्रेष्ठस्तमाहूयनृपात्मजं॥ कन्यांसीमं
तिनीतस्मैप्रायच्छद्गुर्वनुज्ञया॥ सोभूज्जन्मोत्सवःस्तत्रतस्याउद्वाहकर्मणि॥ तत्रसर्वमहीपानांसमवा
योमहानभूत॥ तस्याःपाणिग्रहंकृत्वाचित्रांगदःकृती॥ उवासकतिचिन्मासांस्तत्रैवश्वशुरा
लये॥ एकदायमुनांतर्तुंसराजतनयोबली॥ आरुरोहतरीकेंश्चिद्वयस्यैःसहलीलया॥ तस्मिंस्त

राम
दा॥ ॥३०॥

54

इतिकालिंदीराजपुत्रोविधेर्वशात॥ ममज्जसहकैवर्त्तैरावर्त्तेसिहतातरीः॥ हाहेतिशब्दोस्तुमहानासी
त्तस्यास्तटद्वये॥ पश्यतांसर्वसैन्यानांप्रलापोदिवमस्पृशत॥ मज्जंतोमेनिरेकेचित्केचिद्ग्राहोदरंगताः॥
राजपुत्रादयःकेचिन्नादृश्यंतमहाजले॥ तदुपश्रुत्यराजापिचित्रवर्मातिविह्वळः॥ यमुनायास्तटंप्रा
प्यविशेषःसमपद्यत॥ श्रुत्वाचराजपत्न्यश्चबभूवुर्गतचेतनाः॥ साचसीमंतिनीश्रुत्वापपातभुवि
मूर्छिता॥ तथान्येमंत्रिमुख्याश्चनायकाःसपुरोहिताः॥ विह्वळाःशोकसंतप्ताप्रलेपुर्मुक्तमूर्द्धजान॥
इंद्रसेनोपिराजेंद्रपुत्रवार्त्तांचदुःसहां॥ आकर्ण्यसहपत्नीभिर्नष्टसंज्ञःपपातह॥ तन्मंत्रिणश्चतत्पौरा
स्तथातद्देशवासिनः॥ आबाळवृद्धवनिताश्चुक्रुशुःशोकविह्वळाः॥ शोकात्केचिदुरोजघ्नुःशिरोजघ्नु
श्चकेचन॥ हाराजपुत्रहाताततक्वासिक्वासीतिबभ्रमुः॥ एवंशोकाकुलंदीनमिंद्रसेनंमहीपतिः॥ शौ
नैर्नगरमागत्यसांत्वयामासचात्मजं॥ सराजाप्सिमग्नस्यजामातुस्तस्यबांधवैः॥ आगतैःकारयामा
ससाकल्यादौर्ध्वदेहिकं॥ साचसीमंतिनीबाळाभर्त्तृशोकमियेशाती॥ पित्रानिषिद्धास्नेहेनवैधव्यंप्रा
प्तवत्यपि॥ एवंचतुर्दशेवर्षेप्राप्यदुःखंसुदारुणं॥ ध्यायतीशिवपादाब्जंवासरान्नयत्यगात॥ मुनि
पत्न्युपदिष्टंयत्सोमवारव्रतंशुभं॥ नतत्त्याजभृशाबालावैधव्यंप्राप्तवत्यपि॥ पुत्रशोकादिवोऽसक्तेमिंद्र

५५

सेनं महीपतिं ॥ प्रसह्य तस्य दायादाः सप्तांगं जगृहोर्जसा ॥ हृतसिंहासनः शूरैर्दायादैः सोग्रजो नृपः ॥ निगृह्य
कश्चिद्वने सपत्नीको निवेशितः ॥ चंद्रांगदोपि तत्पुत्रो निमग्नो यमुनाजले ॥ अधो धोचरतन्नैको ददर्शो
रगकामिनीः ॥ जलक्रीडानुसक्तास्तु दृष्ट्वा राजकुमारकं ॥ विस्मिर्विंतास्ततमधो निन्युः पातालपन्नगालयं ॥
सनीयमानः सहसा पन्नगीभिर्नृपात्मजः ॥ तक्षकस्य पुरं रम्यं विवेशापरमाद्भुतं ॥ सोपश्यडानतनयोम
हेंद्रभवनोत्तमं ॥ महारत्नपरिभ्राजन्मयूरपरिदीपकं ॥ वज्रवैडूर्यविद्रुमप्रासादशतशोभितं ॥ माणिक्य
गोपुराट्टालं मुक्तादामभिरुज्वलं ॥ चंद्रकांतस्थलीरम्यहेमद्वारकपाटकं ॥ अनेकशतसाहस्रमणिदीप
विराजितं ॥ तत्रापश्यत्सभामध्ये निषण्णं रत्नसंस्तरे ॥ तक्षकं पन्नगाधीशं फणानेकशतोज्वलं ॥ दिव्यां
बरधरं दीप्तरत्नकुंडलमंडितं ॥ नानारत्नपरिक्षिप्तमुकुटद्युतिरंजितं ॥ फणामणिमयूखाद्यैरसंख्यैः
पन्नगोत्तमैः ॥ उपासितं प्रांजलिभिश्चित्रालंकारभूषणैः ॥ रूपयौवनगांभीर्यविलासगतिशोभिना ॥ ना
गकन्यासहस्रेण समंतात्परिवारितं ॥ दिव्याभरणदीप्तांगं दिव्यचंदनचर्चितं ॥ कालाग्निमिव दुर्धर्षं
तेजसादित्यसन्निभं ॥ दृष्ट्वा राजसुतो धीरः प्रणिपत्य स भूतले ॥ उत्थितः प्रांजलिस्तस्थौ तेजसाक्षिप्तलो
चनः ॥ नागराजोपि तं दृष्ट्वा राजपुत्रं मनोरमं ॥ कोयं कस्मादिहायात इति पप्रच्छ पन्नगीः ॥ ताऊचुर्यमुना

तोयेदृष्टेस्माभिर्यदृच्छया॥ अज्ञातकुलनामायमानीतस्तवसन्निधिं॥ अथपृष्टोराजपुत्रस्तक्षकेनमह
त्मना॥ कस्यासितनयःकस्त्वंकोदेशःकथयस्वमे॥ ॥राजपुत्रउवाच॥ ॥अस्तिभूमंडलेकश्चिद्देशो
निषधसंज्ञिकः॥ तस्याधिपोभवद्राजानलोनाममहायशाः॥ सुपुण्यकीर्तिक्षितिपोदमयंतीपतिःप्रभुः॥
तस्यासीदिंद्रसेनाख्यःपुत्रस्तस्यमहात्मनः॥ चंद्रांगदोस्मिनाम्नाहंनवोढःश्वशुरालये॥ विहरन्यमुनाती
येनिमग्नोदैवचोदितः॥ एताभिःपन्नगस्त्रीभिरानीतोस्मितवांतिकं॥ दृष्टवांस्तवपादाब्जंपुण्यैर्जन्मांतरा
र्जितैः॥ अद्यधन्योस्मिधन्योस्मिकृतार्थौपितरौमम॥ यत्त्वयेक्षितोहंकारुण्यात्त्वयासंभाषितोपिच॥ ॥
सूतउवाच॥ ॥इत्युदारमसंभ्रांतंवचस्तस्यातिपेशलं॥ तक्षकःपुनरौत्सुक्याद्बभाषेराजनंदनं॥ ॥
॥तक्षकउवाच॥ ॥भोभोनरेंद्रदायादमाभैषीर्धीरतांव्रज॥ सर्वदेवेषुकोदेवःयुष्माभिःपूज्यतेसदा॥ ॥
घत्र ॥राजैउवाच॥ ॥योदेवःसर्वभूतेषुमहादेवइतीरितः॥ पूज्यतेसहिविश्वात्माशिवोस्माभिरुमापतिः॥
यस्यतेजोंशलेशेनरजसाचप्रजापतिः॥ ततरूपोस्यजद्बीजंसनःपूज्योमहेश्वरः॥ यस्यांशांशात्सात्विकंदिव्यंवि
श्वद्विष्णुःसनातनः॥ विश्वंबिभर्तिविश्वात्मासशिवोस्माभिरिज्यते॥ यस्यांशात्तामसोजातोरुद्रःकाल
संप्लवः॥ विश्वमेतद्दहत्यंतेसपूज्योस्माभिरीश्वरः॥ योविधाताविधातुश्चकारणस्यापिकारणं॥ तेजसांप

परमंतेजः सशिवः परमागतिः॥ योंतिकस्थोपिहूरस्थो मायोपहतचेतसां॥ अपरिछेदधामासौ शिवोनः प
रमागतिः॥ योग्नौतिष्ठतिवायौवा योभूमौचजलेतथा॥ य आकाशेचविश्वात्मासपूज्योनः सदाशिवः॥
यः साक्षीसर्वभूतानामात्मस्थोपिनिरंजनः॥ यस्येछावशगोलोकः सोस्माभिः पूज्यतेशिवः॥ यमेकमा
घंपुरुषंपुराणं वदंतिभिन्नंगुणवेदतेन॥ क्षेत्रज्ञमेकंचतुरीयमेकंकूटस्थमन्येसशिवोगतिर्नः॥ यन्न
स्पृशंत्येनमचिंत्यतत्वंदुरंतधामानमसक्तरूपं॥ मनोवचोवृत्तय आत्मभाजां सएवपूज्यः सशिवोगति
र्नः॥ यस्यप्रसादंप्रतिलभ्यसंतोवांछंतिनैंद्रंपदमुज्वलंवा॥ निस्तीर्यकर्मार्णवकालचक्रात्स्मरत्यती
ताः सशिवोगतिर्नः॥ यस्यस्मृतिः सकलपापरुजांविघातं सद्यः करोत्यविचपुल्कशजन्मभाजां॥ यन्मू
र्द्धिलब्धनिलयासुरलोकसिंधुर्यस्यांकभागवतीजगदंबिकाच॥ यत्कुंडलेत्वहरुवासुकितक्षकौसो
स्माकमर्घराशिमौळिगतिः शिवोनः॥ जयन्निगमचूडेपूज्ययस्यांघ्रियुग्मंजयति॥ जयतिनित्यंयोगिनां
यस्यकीर्त्तिः॥ जयतिसकलतत्वोद्भासनंयस्यमूर्त्तिः सुविजितगुणसर्गः पूज्यतेस्माभिरीशः॥ ॥सूत
उवाच॥ ॥इत्याकर्ण्यवचस्तस्यतक्षकः प्रीतमानसः॥ जातभक्तिर्महादेवे राजपुत्रमभाषत॥ ॥
तक्षकउवाच॥ ॥परितुष्टोस्मिभद्रंते तवराजेंद्रनंदन॥ बालोपिचपरंतत्वंवेत्सित्वंपरात्परं॥ ए

घरत्नमयोलोकृएताश्चारुदृशोबकाः॥एतेकल्पद्रुमाःसर्वेवाप्योमृतरसांभस॥।नात्रमृत्युभयंघोरंनजरा
रोगपीडनं॥यथेष्टंविहरात्रैवभुंक्ष्वभोगान्यथेप्सितान्॥इत्युक्तेनागराजेनराजेंद्रकुमारकः॥प्रत्युवाच
रो१ परप्रीत्याहृत्वांजलिरुदारधीः॥तत्तदोस्म्यहंबालोसुव्रतागृहीपणिममा॥शिवपंजारतौनित्यंपितरावेक
पुत्रकौ॥तत्वघमांमृत्वंमत्वाशोकेनमहतार्दिताः॥प्रायःप्राणैर्वियुज्यंतेदेवात्प्राणान्वसंतिवा॥अतो
मयाबऊतिथंनात्रस्थेयंकथंचन॥तमेवलोकंकृपयामांप्रापयितुमर्हसि॥इत्युक्तवंतंनरदेवपुत्रंदि
व्यैर्वरान्नैःसुरपादपोत्थैः॥आप्यापयित्वावरगंधवासःस्त्रग्रत्नदिव्याभरणैर्विचित्रैः॥संतोषयि
त्वाविविधैश्चभोगैःपुनर्बभाषेभुजगाधिराजः॥यदायदामांस्मरसित्वदयेतदातदाविक्षिपतेतदेवि॥
पुनश्चरात्नपुत्रायतक्षकोश्वंचकामगं॥नानाद्वीपसमुद्रेषुनाकेषुतमतर्गकं॥दत्तवान्ररत्नभाराणं॥
दिव्यभारणवाससो॥सहायार्थंतदावेकंराक्षसंपन्नगेश्वरः॥तत्सखायोयमेकंचपन्नगेंद्रकुमारकं॥ गमा७
न्यपुक्तःतक्षकःप्रीत्यागच्छेतिविससर्जह॥इतिचंडांगदःसर्वंसंग्रह्यविविधंधनं॥अश्वकामेरुह्यतार्क्ष्या
सरुविनिर्ययो॥समुद्धत्तादिवोन्मज्ज्यतस्मादेवसरिज्जवात्॥विजहारतटेरम्येदिव्यमारुह्यवाजिनं॥अ
यास्मिंस्समयेतन्वीसाचसीमंतिनीसती॥स्नातुंसमाययौतत्रसखीभिःपरिवारिता॥सादद्रनदीतीरे

विहरंतं नृपात्मजं ॥११॥ रक्षसा नागरूपेण नागपुत्रेण चान्वितं ॥ दिव्यतल्पे समासीनं दिव्यमाल्यावतंसकं ॥१२॥ दि
हेन दिव्यगंधेन प्राक्षिपद्दृश्यमोहनं ॥ तमपूर्वाकृतिं प्रेक्ष्य दिव्याश्वमपि संश्रितं ॥ जडोन्मत्तेव भीतेव तस्थौ स
न्यस्तलोचना ॥ तां च राजेंद्रपुत्रोसौ दृष्टपूर्वामिव स्मरन् ॥ निर्मुक्ताकर्णाभरणां कंठसूत्रविवर्जितां ॥ असंय
मित धम्मिल्लां कुंकुमागरुणोज्झितां ॥ त्यक्तनीरांजनापांगीं कृशांगीं शोककर्शितां ॥ तां दृष्ट्वा रूपचतुरगाढुपवि
ष्टः सरित्तटे ॥ तामारूपवरारोहामुपविश्येदमब्रवीत् ॥ का त्वं कस्य कलत्रं वा कस्यासि तनया सती ॥ किम
द्यांगता बाल्ये दुःसहं शोकलक्षणं ॥ इति स्नेहेन संपृष्टा सा वधूरश्रुलोचना ॥ लज्जिता सर्वमाख्यातुं तत्स
खी सर्वमब्रवीत् ॥ इयं सीमंतिनी नाम्ना स्नुषा निषधभूपतेः ॥ चंद्रांगदस्य महिषी तनया चित्रवर्मणः ॥ अ
स्याः पतिर्दैवयोगान्निमग्नोस्मिन्महाजले ॥ तेनेयं प्राप्तवैधव्या बाला दुःखेन शोषिता ॥ एवं वर्षत्रयं नीत्वा शो
केनातिबलीयसा ॥२१॥ अद्येंदुवासरे प्राप्ते स्नातुमत्र समागता ॥ श्वशुरोस्याः स राजेंद्रो हृतराज्यः प्रमाथिभिः ॥२२॥ राम
बलाद्गृहीतो बद्धश्च सभार्यस्तद्भुवोस्थितः ॥ तथाप्येषा शुभाचारा सोमवारे महेश्वरं ॥ सांबिकं परयाभ ॥२३॥
क्त्या पूज्यते विमलाशया ॥ ॥ सूत उवाच ॥ ॥ इत्थं सखीमुखेनैव सर्वमाबोध्य सुव्रता ॥ ततः सीमंति
नी प्राह स्वयमेव नृपात्मजं ॥ कस्त्वं कंदर्पसंकाशः काविमौ तव पार्श्वगौ ॥ देवो नरो वा सिद्धो वा गंधर्वो वा

ता

धै ५

थकिंन्नरः॥ किमर्थंममवृत्तांतंस्नेहाद्वानिवपृच्छसि॥ किंमांवेत्सिमहाबाहो दृष्टःसन्किमुकुत्रचित्॥ दृ
ष्टपूर्व इवाभासि मयावस्त्वजनोयथा॥ सर्वंकथयतत्त्वेन सत्यसाराहिसाधवः॥ ॥सूतउवाच॥ ॥एता
वदुक्त्वानरदेवपुत्रीसबाष्पकंठीसुचिरंरुरोद॥ मुमोहभूयोपतिसरवीभिश्च तानकिंचित्कथिताराज्ञां
का॥ श्रुत्वाचेंद्रांगदःसर्वंप्रियायाःशोककारणं॥ मुहूर्त्तमभवत्तूष्णींस्वयंशोकसमाकुलः॥ अथाश्वा
स्यप्रियांतन्वींविविर्वाक्यनैपुणैः॥ सिद्धानामवपदेवाकामगाइतिसोब्रवीत्॥ क्वापिलोकेमयादृष्टस्त
वभर्त्तावरानने॥ त्वद्भुताचरणात्प्रीतः सद्यएवागमिष्यति॥ अपाकरोतितेशोकंद्वित्रैरेवदिनैःस्वयं॥ ३२॥
एतच्छंसितुमायातुस्तवभर्तुःसखास्म्यहं॥ अत्रकार्योनसंदेहस्त्वयामित्रिवपादयोः॥ तावत्स्वहृदये
स्थेयंनप्रकारेपकुतश्चन॥ इतितद्वचनंश्रुत्वासुधाधाराशताधिकं॥ संभ्रमात्स्वांतनयना तमेवमुहु
रैक्षत॥ प्रेमबंधानुगुणितं वाक्यंस्वादुरसायनं॥ विभ्रमोदारसंयुक्तंमधुरापांगवीक्षणं॥ स्वपाणिस्प
र्शनाच्छिन्नंपुलकांकितविग्रहं॥ पूर्वदृष्टानि चांगेषुलक्षणानिस्वरादिषु॥ वयःप्रमाणंवर्णंचप्रतीक्ष्य
यमतर्कयत्॥ एषएवपतिर्नान्यो ध्रुवंस्यात्पूर्वलक्षणैः॥ अस्मिन्नेवप्रविष्टंमेहृदयंप्रेमकारितं॥ पर
लोकादिहायातःकथमेषस्वरूपधृक्॥ दुर्भगायाःकथमेद्यद्रष्टुंनेष्टस्यदर्शनं॥ स्वप्नोयंकिमुनस्वप्नो

(67)

भ्रमोयंकिमनर्भ्रमः॥ एषधूर्त्तोथवाकश्चिद्यक्षोगंधर्वएववा॥ मुनिपत्न्यायउक्तंमेपरमापन्नतामि
व॥ व्रतमेतत्कुरुष्वेतितस्यबालासमघमे॥ जन्मकालेममपितुर्यद्दत्तंज्योतिषेनहि॥ प्रसन्नेपार्वतीना
थे किमसाध्यंशरीरिणां॥ इत्थंविस्मयरूपबहुधापुनेनमुक्तसंशयं॥ लज्जानम्रमुखीकर्णेशशंसान्यत्प्र
योजनं॥ इमंवृत्तांतमाख्यातुंतत्पित्रोःशोकतप्तयोः॥ गच्छामिस्वस्तिभद्रंतेसद्यःपतिमवाप्यसा॥ इ
त्युक्त्वातंसमारुह्यजवेननृपनंदनः॥ ताभ्यांसहनिजंराज्यंप्रत्यपद्यततत्क्षणात्॥ सपुरोपवनात्स्याद्येस्थित्वात
फणिपुत्रकं॥ विससर्जात्मदायादनृपासनगतानपि॥ सगत्वोवाचतान्क्षिप्रंइंद्रसेनोविमुच्यतां॥ चंद्रांग
दस्तस्यसुतःप्राप्तोयंपन्नगालयात्॥ नृपासनंविमुंचंतुभवंतोमाविचार्यतां॥ नोचेच्चंद्रांगदस्याग्र्यबाणाः
प्राणान्हरंतिवः॥ सम्यग्ज्ञात्वामुनातोयेगत्वातक्षकमंदिरं॥ लब्ध्वाचतस्यसाहाय्यंपुनर्लोकमिमंगतः॥ इत्या
ख्यातंविशेषेणतद्वृत्तांतंनिशाम्यते॥ साधुसाध्वितिसंभ्रांताःशत्रवःपरिपंथिनः॥ सइंद्रसेनायनिवेद्यसर्वे
नष्टस्यपुत्रस्यपुनःसमागमं॥ प्रसाद्यतंप्राप्तनरेश्वरासनंदायादमुख्याश्चभयंप्रपेदिरे॥ अथपौरजनाः
वेपुरोधानेनपात्मनां॥ दृष्ट्वाराजेंद्रवृंदंतंचोत्सुलेभिरेतंमहाधनं॥ आकर्ण्यपुत्रमायांतंराजानंदजलाप्लु
तः॥ नव्यजानन्निमंलोकंराजाचपरयामुदा॥ अथनागरिकाःसर्वेमंत्रीवृद्धाःपुरोधसः॥ प्रत्युद्गम्यपरिष्वज्य
तमानिन्युर्नृपांतिकं॥ अथोत्सवेनमहताप्रविष्टोनिजमंदिरं॥ राजपुत्रःपरिष्वज्यववंदेबाष्पसंततःजननं॥ तप

राम
॥३४॥

८२

दम्स्केपतितंस्वपुत्रंनिवेघनासोप्पृथिवीपतिःक्षपणं॥ प्रबोधितोमातृजनैःकथंचिदुत्थाप्यसंक्लिन्नहृदादि
लिंगे॥ क्रमेणमातृभिर्वंध्यताभिःसंवर्द्धिताभिश्शीःप्रणयाकुलाभिः॥ आलिंगितःपौरजनानशेषान्संभा
वयामाससराजसूनुः॥ तेषांमध्येसमासीनंसवृत्तांतमशेषतः॥ पित्रेनिवेदयामासतक्षकस्यसुमित्रतां॥ ५८॥
दत्तंभुजंगराजेनरत्नादिधनसंचयं॥ दिव्यंतद्वस्त्रसानीतंपित्रेसर्वंन्यवेदयेत्॥ राजास्वपुत्रचरितंदृष्ट्वाश्रु भ्रता ४
चविस्मितः॥ मेनेस्नुषायाःसौभाग्यंमहेशाराधनार्जितं॥ सीमंतिन्यमयीवार्त्ताभिर्मातानिषधभूपतिः॥ स्वाते
र्निवेदयामासचित्रवर्ममहीभुजे॥ श्रुत्वेमांनृपतिर्वार्त्तांसमुत्थायससंभ्रमात्॥ तेभ्योदत्वाधनंभूरिनन
र्त्तोनंदविक्लवः॥ अथाहूयस्वतनयांपरिष्वज्याश्रुलोचनः॥ भूषणैर्भूषयामासव्यक्तवैधव्यलक्षणां॥ अ
ति ५ थोत्सवोमहानासीद्राष्ट्रेग्रामपुरादिषु॥ सीमंतिन्याःशुभाचारंशशंसुःसर्वतोजनाः॥ चित्रवर्मापिनृपतिः
समाहूयेंद्रसेनकं॥ पुनरुद्वाहविधिनासुतामस्मैन्यवेदयत्॥ चंद्रांगदोपिरत्नौघैरानीतैस्तक्षकालयात्॥ स्वाप
लंकृतवपुश्चक्रेमर्त्यानामतिदुर्लभैः॥ अंगरागेणदिव्येनतत्तकोवनशोभन॥ शुशुभेसानुगंधेनदशयोजन
गंधिना॥ मालयाम्लानयाशश्वत्पद्मकिंजल्कवर्णया॥ कल्पद्रुमोद्भवयाबालाभूषिताशुशुभेसती॥ इंद्रसेनोपिराजें
द्रोराज्येस्थाप्यस्वमात्मजं॥ तपसाशिवमाराध्यलेभेसंयमिनांगतिं॥ दशावर्षसहस्राणिसीमंतिन्यास्वभार्यया॥

63

सार्धंचंद्रांगदोराजा बुभुजेविषयान्बहून्॥ प्रसूयतनयानष्टौ कन्यामेकांवरांगनां॥ रेमेसीमंतिनीसत्तीप्र
ज्ञयंतीमहेश्वरी॥ ।मे विचित्रमिदमाख्यानं मयासमनुवर्णितं॥ भूयोपिवक्ष्येमहात्म्यंसोमवारव्रतादिकं॥
॥७२॥ इतिश्रीस्कंदपुराणे ब्रह्मोत्तरखंडे सोमवारव्रतमाहात्म्यवर्णनंनामाष्टमोध्यायः॥ ॥श्रीः॥ ॥
॥ऋषयऊचुः॥ ॥विदर्भविषयेपूर्वमासीदेकोद्विजोत्तमः॥ वेदमित्रइतिख्यातोवेदशास्त्रार्थवित्सुधीः॥ त
स्यासीदपरोविप्रःसखासारस्वताह्वयः॥ तावुभौपरमस्निग्धावेकदेशनिवासिनौ॥ वेदमित्रस्यपुत्रोभूत्सु
मेधानामविश्रुतः॥ सारस्वतस्यतनयःसामवानितिविश्रुतः॥ उभौसवयसौबालौसमविद्यौसमौगुणैः॥ सु
तंचकृतसंस्कारौवटुघातेसमंचतौ॥ सांगानधीत्यतौवेदांस्तर्कव्याकरणानिच॥ इतिहासपुराणानिधर्म
शास्त्राणिकृत्स्नशः॥ सर्वविद्यासुनिष्णातौबालकौसमसिक्षकौ॥ प्रहर्षंददतुःपित्रोरतुलंस्वैर्गुणैः॥ ता
वेकदास्ततनयौतावुभौब्राह्मणोत्तमौ॥ आहूयावोचतांप्रीत्यापोऽस्राद्वौभ्रमाकृती॥ हे पुत्रकौयुवांबा
ल्येकृतविद्यौसुवर्चसौ॥ वैवाहिकोयंसमयोवर्त्ततेयुवयोःसमं॥ एवंप्रसाधराजानंविदर्भेशंस्वविद्यया॥ त
तःप्राप्यधनंभूरिकृतोद्वाहौभविष्यतः॥ एवमुक्तौचतौताभ्यांमुभौब्राह्मणनंदनौ॥ विदर्भराजमासाद्यपर्य
तोषयतांगुणैः॥ विद्ययापरितुष्टायतस्मैद्विजकुमारकौ॥ विवाहार्थंततोद्योगौधनहीनावशंसतां॥ तयोर

के ५
राम
॥८३५॥

भिहितं श्रुत्वा स विदर्भमहीपतिः ।। प्रहस्य किंचित्प्रोवाच लोकतत्त्वविवित्सया ।। १२ यतो निषधराजस्य राज्ञी
सीमंतिनी सती ।। सोमवारे महादेवं पूजयंत्यंबिकायुतं ।। तस्मिन्दिने सपत्नीकान्द्विजाग्र्यान्वेदसत्तमान् ।
संपूज्य परया भक्त्या धनं भूरि ददाति सा ।। अतोत्र युवयोरेका नारी विभ्रमवेषधृक् ।। एकस्तस्याः पतिर्भू-
त्वा जायापती विचित्रदंपती ।। युवां वधूवरौ भूत्वा प्राप्य सीमंतिनीगृहं ।। लब्ध्वा भूरि धनं चैव पुनर्यातं समं-
तिकं ।। इति राज्ञा समादिष्टौ सौ तौ द्विजकुमारकौ ।। प्रत्यूचतुरिदं कर्म कर्तुं नौ जायते भयं ।। देवतासु गुरौ
पित्रोस्तथा राजकुलेषु च ।। कौटिल्यमाचरन्मोहात्स सद्यो नश्यति सान्वयः ।। कथमंतर्गृहं राज्ञो छद्मना
प्रविशेत्पुमान् ।। गोप्यमानो यदा कश्चित्कदाचिद्व्यातिमेष्यति ।। ये गुणाः साधिताः पूर्वं शीलाचारश्रुता-
दिभिः ।। सद्यस्ते विलयं यांति कौटिल्यपथगामिनां ।। पापं निंदां भयं वैरं चत्वार्येतानि देहिनां ।। छद्ममार्ग-
प्रवृत्तानां तिष्ठंत्येव हि निश्चितं ।। अत आवां शुभाचारौ राजा तौ च गुणितां कुले ।। वृत्तं धूर्त्तं धनं श्लाघ्यं न
भयावः कथं च न ।। २२ ।। राजोवाच ।। ।। देवतानां गुरूणां च पित्रोश्च पृथिवीपतेः ।। शासनस्याविलंघ्यत्वा-
त्पदेज्ञो न च कर्हिचित् ।। एतैर्यत्तु समादिष्टं शुभं वा यदि वाशुभं ।। कर्त्तव्यं नियतं तैस्तैरप्रमत्तैश्च मु-
मुक्षुभिः ।। अतो वयं हि राजानः प्रजायस्यं हि संगताः ।। राजाज्ञया प्रवृत्तानां श्रेयः स्यादन्यथा क्षयः ।। अतो मया

स नं कार्यं भवद्भ्याम विलंबितं ॥ इत्युक्तौ नरदेवेन तौ तथेत्यूचतुर्भयात् ॥ सारस्वतस्य तेसैंय तनयं सामवं
तं नराधिपः ॥ स्त्रीरूपधारिणं चक्रे वस्त्राकल्पांजनादिभिः ॥ स कृत्रिमो धस्तनकेशबंधवत्स्यत्तकर्णा
भरणांगरागः ॥ मुग्धांगनाभिः स्वरूपीयरूपो बभूव सद्यः प्रमदोत्तमाभः ॥ तावुभौ दंपती भूत्वा द्विज
पुत्रौ नृपाज्ञया ॥ जग्मतुर्निषधं देशं यद्धा तद्धाभवलिति ॥ उपेत्य राज्ञः सदनं सोमवारे सह द्विजैः ॥ सपत्नी
कौ कृतातिथ्यौ धौतपादौ बभूवतुः ॥ सा राज्ञी ब्राह्मणान् सर्वान् स्वरूपविष्टान् वरासने ॥ प्रत्येकमर्चयां
चक्रे सपत्नीकान् द्विजोत्तमैः ॥ गंधमाल्यैः सुरभिभिः धूपैर्नीराजनादिभिः ॥ अर्चयित्वा द्विजश्रेष्ठानन
मभ्यक्रे समाहितान् ॥ हिरण्मयेषु पात्रेषु पायसं घृतसंयुतं ॥ शर्करामधुसंयुक्तं लाकैर्जुष्टं मनोहरैः ॥ २२।
गंधशाल्योदनं हृद्यं मोदकापूपराशिभिः ॥ शाष्कुलीभिश्च संयावैः कृशरैर्माषवटकैः ॥ तथान्यैरप्यसंख्यै
तैर्भक्ष्यभोज्यैर्मनोरसैः ॥ सुगंधिस्वादुभिर्धूपैः पानीयैरतिशीतलैः ॥ कृतं मत्वा द्विजाग्र्येभ्यः सा भक्त्या पर्य
तोषयत ॥ भुक्तवत्सु द्विजाग्र्येषु स्वाचांतेषु नृपांगना ॥ प्रणम्य दत्वा तांबूलं दक्षिणां च यथार्हतः ॥ धेनु राम ॥३६॥
हिरण्यवासांसि रत्नस्रग्भूषणानि च ॥ दत्वा भूयो नमस्कृत्य विससर्ज द्विजोत्तमान् ॥ तयोर्द्वयोर्भूसुर
वर्यपुत्रयोरेकस्तदा हेमवती धियार्चितः ॥ एको महादेवधिया नमस्कृतः कृतप्रणामो ययतुस्तदालयात् ॥

आवाह्यगिरिजांभक्त्यायस्तयापूजितःपरः॥ससामवानद्विजसुतोबभूवप्रमदोत्तमा॥सातविस्म
तपुंभावातस्मिन्नेवद्विजोत्तमे॥जातोस्पृहामहत्सिक्ताकंदर्पविवशाब्रवीत्॥एहिनाथबिनाकान्त
सर्वावयवसुंदर॥तिष्ठतिष्ठक्वपासीमांनपश्यपतितवप्रियां॥इदमेग्रेवनेरम्यंसुपुष्पेतलताडुमे॥अस्मि
न्विहर्तुमिच्छामित्वयासहयथासुखं॥इत्थंतस्योक्तमाकर्ण्यपुरोगच्छन्नुद्विजोत्तमः॥विचिंत्यपरिहासो
क्तिंगच्छन्निवयथापुरा॥पुनरप्याहसाबालांतिष्ठतिष्ठक्वपास्यसि॥दुरुत्सहस्मरावेशापरिभूताम
वैहिमां॥परिष्वज्यस्वमांकांतपाययस्वाधरामृतं॥नेहंतगंतुंसमर्थास्मिस्मरबाणप्रपीडिता॥इय
मभूतपूर्वंतन्निशम्यपरिशंकितः॥आयातींपृष्ठतोवीक्ष्यसहसाविस्मयंगतः॥एषापद्मविशाला
क्षीपीनोन्नतपयोधरा॥कृशोदरीबृहच्छ्रोणीनवपल्लवकोमला॥सएषकिंसखाकिंतुजाताचैववरां
गना॥पृष्ठाभ्येवामतःसाधीमितिसंचिंत्यसोब्रवीत॥किंमेपूर्वमिवाभासिसखेरूपगुणादिभिः॥अ
पूर्वैर्भाषसेवाक्यैःकामिनीवमदाकुला॥यस्त्वंवेदपुराणज्ञोब्रह्मचारीजितेंद्रियः॥सारस्वतात्मजः
शांतःकथमेवंप्रभाषसे॥॥इत्युक्त्वासापुनःप्राहनाहमस्मिन्पुमान्प्रभो॥नाम्नासामवतीबाकांत
वास्मिरतिदायिनी॥॥यदितेसंशयःकांतममांगानिविलोकय॥इत्युक्तेसहसामार्गेरहस्येनांव्यलोक

सा

यत॥ तामकृत्रिम धम्मिल्ल जघनस्तन शोभिनीं॥५३॥ सुरूपां वीक्ष्य कामेन किंचिद्व्याकुलतामगात्॥ पुन
संस्थाप्य यत्नेन चेतसो विकृतिं बुधः॥ मत्तवृत्तं विस्मयाविष्टो न किंचित्प्रत्यभाषत॥ ॥सामव
त्युवाच॥ ॥गतस्ते संशयः कांत तर्ह्यागच्छ वरस्व मां॥५५॥ परपेदं विपिनं कांत परस्त्रीसुरतोचित॥
॥सुमेधा उवाच॥ ॥मयैवं कथमर्यादं महिसीमदमत्तवद॥ आवां विवित्ता तत्रास्त्रापोत्वमेवं भा
षसे कथं॥ अपि तस्य चशास्त्रस्यपि विवेकस्य कुत्रस्य च॥ किमेव सदृशो धर्मो जारमार्गनिषेवणं॥
न त्वं स्त्री पुरुषो विद्वान्ज्ञानी ह्यात्मानमात्मना॥५८॥ अयं स्वयं पृच्छतो नर्थो भावाभ्यां यद्विचेष्टितं॥ वंचयि
त्वात्मपितरौ धूर्त्तराजानुशासनात्॥ कृत्वा वानुचितं कर्म्म तस्यैतत्प्राप्य तत्फलं॥ सर्वथानुचितं कर्मन्य
ण्णां श्रेयो विनाशनं॥ यस्त्वं विशालजो विद्वान्नग तस्त्री त्वं विगर्हितं॥ मार्गयित्वागतोरण्यं नरो विध्य
तकंटकैः॥ बिल्वाद्विस्पेत वाहिसैः सदात्यक्तसमागम॥ एवं विवेकमाश्रित्य तद्धीमोहि स्वकं गृहं॥ दे
वद्विजप्रसादेन स्त्रीत्वं तव विलीयते॥ अथ दैवेन योगेन स्त्रीत्वमेव तवस्थिरं॥ अहो चित्रं महो दुःख
महामायाबलं महत॥ अहोरात्रीप्रभावोयं विवाराधनसंभृतः॥ इत्युक्त्वाप्यसकृत्तेन सावधूः स्म
रहर्षिता॥ बलेन तं समालिंग्य चुचुंबाधरपल्लवं॥ धर्षितोपि तया धीरः सुमेधा नृतनस्त्रिया॥ यत्ना

राम
॥३१॥

68

६५

दानीयसदनं कृत्स्नं तत्रन्यवेदयत॥ तदाकर्ण्याथ तौ विप्रौ पतितौ शोकविह्वलौ॥ ताभ्यां सह कुमाराभ्यां
वैधव्यभीतिकमापतुः॥ तत्र सारस्वतः आह राजानं धूर्तवेष्टितं॥ राजन्नमात्मजं पश्य तव त्रासनयंत्रितं॥ एतौ ब
दालावगतौ चक्रतुः कर्मगर्हितं॥ मत्पुत्रस्तत्फलं प्राप्य स्त्रीत्वं प्राप्य जुगुप्सितं॥ अद्य मे संततिर्नष्टा नि
५ राशाः पितरोद्य मे॥ नापुत्रस्य च लोकोस्ति लुप्तपिंडस्य संस्कृतेः॥ निरस्तोपवीतमजिनं मौंजीदंडकमंडलु॥
ब्रह्मचर्योचितं चिह्नं विहायेमां दशां गतः॥ ब्रह्मसूत्रं च सावित्री स्नानसंध्याजपार्चनं॥ विसृज्य स्त्रीत्वं प्रा
प्तस्य का गतिर्वद पार्थिव॥ अद्य मे संततिर्नष्टा नष्टा वेदपथाश्च मे॥ एकात्मजस्य मे राजन् का गतिर्मम
शाश्वती॥ इति सारस्वतेनोक्तं वाक्यमाकर्ण्य भूपतिः॥ सीमंतिन्याः प्रभावेन विस्मयं परमं गतः॥ इति
सर्वान्समाहूय सऋषीनमितद्युतीन्॥ प्रसाद्य प्रार्थयामास तस्याः पुंस्त्वं महीपतिः॥ ते ब्रुवन्नथ पार्वत्याः शि
वस्य च समीहितं॥ तद्भक्तानां च संकल्पं कोन्यथा कर्तुमीश्वरः॥ अथ राजा भरद्वाजमाहूय मुनिपुंगवं॥
ताभ्यां सह द्विजाग्र्याभ्यां तत्सुताभ्यां समन्वितः॥ अंबिकास्तवनं प्राप्य भरद्वाजोपदेशतः॥ तां देवीं निय
मैस्तीव्रैरुपास्ते स्म यथाविधि॥ एवं त्रिरात्रं स विसृष्टभोजनो जपार्चनध्यानपरो महीपतिः॥ सम्यक्कृ

मैर्विविधैश्चसंस्तवैर्देवीप्रपन्नार्त्तिहरामतोषयत्॥ ततःप्रसन्नासादेवी भक्तस्यपृथिवीपतेः॥ स्वरूपंदर्शया
मास वेदकोटिसमप्रभं॥ अथाहगौरी राजानंकिंतेब्रूहिविकीर्षितं॥ सोथाहपुंस्त्वमेतस्याः कृपयादीयतामि
ति॥ भूयोप्याहमहादेवी मद्भक्तैः। कर्मयत्कृतं॥ शक्यतेनान्यथाकर्तुंवर्षायुतशतैरपि॥ ६॥ राजोवाच॥
एकात्मजेद्विजैर्ज्ञेयं कर्मणानष्टसंततिः॥ कथंसुखंप्रपद्येतविनापुत्रेणतादृशं॥ ७॥ श्री देव्युवाच॥ ॥
तस्यान्योमत्प्रसादेनभविष्यतिसुतोत्तमः॥ विद्याविनयसंपन्नोदीर्घायुरमकल्मषः॥ एषासामवतीना
मसुतामुष्यद्विजन्मनः॥ भूत्वासुमेधसःपत्नी कामभोगेनयुज्यतां॥ इत्युक्त्वांतर्हितादेवीदेवराजप्र
योगमाः॥ गत्वास्वंस्वंगृहंसर्वे चक्रुस्तच्छासनेस्थितिं॥ सोपिसारस्वतापुत्रंगुणवंतंसुतोत्तमं॥ लेभेदेव्याः
प्रसादेनअचिरादेव कालतः॥ र तांसारस्वतीकन्यां ददौ तस्मैसुमेधसे॥ तौदंपतीचिरंकालंबुभुजा राम
तेपरंसुखं॥ इत्येतच्छिवभक्तायाःसीमंतिन्यानृपस्त्रियः॥ प्रभावःकथितः त्रांभोमहात्म्यमपिवर्णितं॥ ६०॥ ।३९
भूयोपिशिवभक्तानांप्रभावंविस्मयावहं॥ सहस्रावर्णयिष्यामिश्रोतॄणांमंगलायणं॥ ६१॥ श्री॥ ॥
॥ इतिश्रीस्कंदपुराणे ब्रह्मोत्तरखंडे श्रीमत्सदाशिवभक्तिमहिमानवमोध्यायः॥ ॥सूतउवाच॥ ॥

विचित्रशिवनिर्माणंविचित्रंशिवचेष्टितं॥ विचित्रंशिवमहात्म्यंविचित्रंशिवभाषितं॥ विचित्रंशिव
भक्तानांचरित्रंपापनाशनं॥ स्वर्गापवर्गयोस्थानंसाधनंतद्ब्रवीम्यहं॥ अवंतिविषयेकश्चिद्ब्राह्मणो
मंदराह्वयः॥ बभूवविषयारामःस्त्रीजितोधनसंग्रही॥ संध्यास्नानपरित्यक्तोगंधमाल्यांबरप्रियः॥
कुस्त्रीसक्तकुमार्यस्थोयथाएवमजामिळः॥ सवेश्यांपिंगळांनामरममाणोदिवानिशं॥ तस्याएव
गृहेनित्यंतिष्ठत्यविजितेंद्रियः॥ कदाचित्तत्सदनेतस्यास्तस्मिन्नेवसतिद्विजे॥ ऋषभोनामधर्मात्मा
शिवयोगीसमाययौ॥ तमागतमभिप्रेक्ष्यसपुण्यमिवमूर्त्तिमंतं॥ सावेश्यासचविप्रश्चपर्यपूजय
तामुभौ॥ तमारोप्यमहापीठेकंबळांतरसंयुते॥ प्रक्षाल्यचरणौभक्त्यादधतुर्मूर्ध्नितज्जलं॥ स्वाग
तार्घ्यनमस्कारगंधपुष्पाक्षतादिभिः॥ उपचारैःसमभ्यर्च्यभोजयामासतुर्मुदा॥ तंभुक्तवंतमाचांत
पर्यंकेसुखसंस्तरे॥ उपवेश्यमुदायुक्तौतांबूलंप्रत्यपद्यतां॥ पादसंवाहनंभक्त्याकुर्वंतौदेवनो
दितौ॥ कल्पयित्वाचसुश्रूषांप्रणयामासतुश्चिरं॥ एवंसमर्चितस्ताभ्यांशिवयोगीमहामतिः॥ अ
तिवाह्यनिशामेकांययौप्रातस्तदाद्रुतः॥ एवंकालेगतप्रायेसविप्रोनिधनंगतः॥ साचवेश्यामृता
काळेययौकर्मार्जितांगतिं॥ सविप्रःकर्मणानीतोदशार्णधरणीपतेः॥ वज्रबाहोःकुटुंबिन्यांसु

मस्यांगर्भमाश्रितः॥१४॥ तांज्येष्ठपत्नींनृपतेर्गर्भवासंसमाश्रितां॥ अवेक्ष्यतस्यैगरलंसपत्न्यःछद्मनाददुः॥१५॥
साभुक्त्वापिगरंघोरंनमृतादैवयोगतः॥ अथकालेसमायातेपुत्रमेकमजीजनत्॥१६॥ गरेणमह
तासाध्वीपीडितावरवर्णिनी॥ सनिर्दग्धोराजपुत्रःसुष्टएवंगरेणायत्॥१७॥ तेनचापमहाक्लेशंक्रंदमानौ
दिवानिशं॥ सबालकश्चमाताचसर्वांगव्रणसंवृतौ॥१८॥ बभूवतुःपरिक्लिष्टौगरयोगप्रभावतः॥ तौ
राज्ञासमयातीतौवैद्यैश्चकृतभेषजौ॥१९॥ अस्वास्थ्यमापतुर्यत्नैरनेकैर्योजितामपि॥ नराज्ञीलभते
निद्रांसारात्रौविपुलव्यथा॥२०॥ स्वपुत्रस्यबहुदुःखेनदुःखितानितरांकृशा॥ नीत्वैवंकतिचिन्मासा
न्राजामातृबालकौ॥२१॥ जीवंतौचमृतप्रायौविलोक्याथविचिंतयत्॥ इतोमेगृहिणीपुत्रौनिरया
दागताविव॥२२॥ अत्यंतरोगौकृतदंतौनिद्रासंगविघायिनौ॥ मर्त्तुंवाजीवितुंवापिनक्षमौपापशोषि
नौ॥२३॥ अत्रोपायंकरिष्यामिपापयोःशीघ्रमेतयोः॥ इत्थंविनिश्चित्यसभूमिपालःसक्तःसपत्नीषुत
दात्मजेषु॥२४॥ आरुह्यसूतंनिजदारपुत्रौनिपात्तयामासरथेनदूरं॥ तौसूतेनपरित्यक्तौकुत्रचिद्विजने
वने॥२५॥ अवापतुःपरांपीडांक्षुत्तृष्णाभ्यांचविह्वलौ। सोद्वहंतीनिजंबालंनिपतंतीपदेपदे॥ निःश्वसंती
निजंकर्मनिंदंतीचरुदतीस्वरं॥ क्वचित्कंटकभिन्नांगीमुक्तकेशाभयाकुला॥ क्वचिच्छायाश्रवनेसीत।

राम
॥३६॥

क्वचिद्व्याघ्रैरनुद्रुता॥ भर्त्स्यमाना पिशाचैश्च वृता श्चैव स राक्षसैः॥२८॥ महागुल्मेषु धावंती भिन्नपादांकु
राङ्कुभिः॥ एवं घोरे महारण्ये भ्रमंती नृपगेहिनी॥ दैवात्प्राप वणिङ्मार्गं गोवाजिनिसेवितं॥ गच्छंती ते
न मार्गेण सुदूरमपि यत्नतः॥ ददर्श वैश्यपनगरं बहुस्त्रीनरशोभितं॥ तस्य गोप्ता महावैश्यो नगरस्य महा
धनः॥ आस्ते प्रभाकरो नाम राजराजेश्वापतेः॥ तस्य वैश्यपतेः काचिद्रूढ दासी वरांगना॥ आयांती दूरतो
दृष्ट्वा तदंतिकमपाययौ॥ सा दासी नृपतेः कांतीं सपुत्रां श्रमपीडितां॥ स्वयं विदितवृत्तांता स्वामिनो
प्रत्यवेदयत॥ स तां दृष्ट्वा विशां नाथो रुजार्त्तां क्लिष्टपुत्रकां॥ नीत्वा रहसि सुव्यक्तं तद्वृत्तांतमपृच्छत॥
तया निवेदिताशेषवृत्तांतः स वणिक्पतिः॥ अहो कष्टमिति ध्यात्वा निश्वास मुहुर्मुहुः॥ तामंति
के स्वगेहस्य सन्निवेश्य रहोगृहे॥ वासोन्नपानशयनैर्मातृसाम्यमपूजयत्॥ तस्मिन्नगृहे नृपवधू
निवसंती सुरक्षिता॥ क्षणायक्ष्मादिरोगार्ता न शांतिं प्रत्यपद्यत॥ ततो दिनैः कतिपयैः स बालो व्रण
पीडितः॥ विलंघितभिषक्सत्वाः समन्त्रैर्विधेर्बलात्॥ मृते स्वतनये राज्ञी शोकेन महता रुषा॥ मू
र्छिता न्यपतद्भूमौ गजभग्नेव वल्लरी॥ दैवात्संज्ञामवाप्याथ बाष्पस्विन्नपयोधरा॥ सांत्विता पि वणिक्
स्त्रीनिर्विन्ना पसुदुःखिता॥ हा तात पुत्र जीवेशा हा मम प्राणरक्षक॥ हा राजकुलपूर्णेंदो हा ममानंदव

73

र्धन॥इमामनाथां कृपणां त्वद्व्यापां सक्तबांधवां॥ मातरं मां परित्यज्य क्व गतोसि नृपात्मज॥ इत्यादिभिर्दिन
तरैर्वाक्यैः शोकविवर्धनैः॥ विलपंतां सुतापत्यां को न सांत्वयितुं क्षमः॥ एतस्मिन्समये तस्याः दुःखरोगविचिल्स
कां॥ ऋषभः पूर्वमाख्यातः शिवयोगी समाययौ॥ सयोगी वैश्यनाथेन सार्घ्यहस्तेन पूजितः॥ तस्याः सकारुणमा
गत्य शोचंत्या इदमब्रवीत्॥ ॥ऋषभउवाच॥ ॥अकस्मात्किमहो वत्से सोरवीसी विमूढधीः॥ को जातः प्रथम
लोके को मृतो वद सांप्रतं॥ आसीदरादयो भावास्तोयफेनसधर्मिणः॥ क्वचिद्यांति क्वचिद्भ्रांति क्वचित्पुनर्यांति वा
पुनः॥ अतोस्मिन्नमनसदृशो देहपंचत्वमागते॥ शोकस्य नावकाशो वा न रिवर्घंति विपश्चितः॥ गुणैर्भूतानि
सृज्यंते भ्राम्यंते निजकर्मभिः॥ कालेनार्थविरुध्यंते वासनायां बद्योरते॥ मायया योत्पत्तिमायांति गुणाः
सत्वादयस्त्रयः॥ तैरेव देहा जायंते जंतोस्तल्लक्षणाश्रयः॥ देवत्वं याति सत्वेन रजसा च मनुष्यतां॥ तिर्यक्त्व
तमसा जंतुर्वासनानुगतो वशः॥ संसारे वर्त्तमानेस्मिन् जंतुः कर्मानुबंधनात्॥ दुर्विभाव्यां गतिं याति सुख
दुःखमयीं विभुः॥ अपि कल्पायुषां वत्से देवानामपि कल्पितः॥ अथायः कर्मबद्धानां का कथा नरदेहिनां॥ के
चिद्वदंति देहस्य काल एव हि कारणं॥ कर्म केचिद्गुणान्केचित्देहस्या धारणोदयं॥ कालकर्मगुणाधीनं
पंचात्मकमिदं वपुः॥ जातं दृष्ट्वा न हृष्यंति न शोचंति मृतं बुधः॥ अव्यक्ताज्जायते जंतुरव्यक्ते प्रलीयते॥ म
ध्ये व्यक्तवदाभाति जलबुद्बुदसंन्निभः॥ यदा गर्भगतो देही विनाशः कल्पितस्तदा॥ देवाज्जीवति वा जातोम्त्री॥

यतेसहसेवह्नि॥ गर्भस्थाएवनश्यंतिजातमात्रास्तथापरे॥ केचिद्युवानोनश्यंतिम्रीयंतेकेपिवार्धके॥ याद
ृशंप्राक्तनंकर्मतादृशंविंदतेवपुः॥ भुंक्तेतदनुरूपाणिसुखदुःखानिदेहसौ॥ मायानुभावैरितयोःपित्रोः
सुरतसंगमात्॥ देहउत्पद्यतेकेचित्पुंयोषित्क्लीबलक्षणः॥ आयुःसुखंचदुःखंचपुण्यपापंश्रुतंधनं॥ लला
टलिखितंधात्रावहुजंतुःप्रजापते॥ कर्मणामविलंघ्यत्वात्कावस्थाप्यतिसत्वतः॥ अनित्यत्वाच्चभावानां
नत्रोकंकर्त्तुमर्हसि॥ कस्यचनेनियतत्वंस्थैर्यमिंद्रजालेकुतस्त्यता॥ क्वचित्त्वंचचारन्मेधेकदाचित्त्वंकलेवरे॥
तवजन्मान्यतीतानिज्ञातकोवद्युतानिच॥ अज्ञानंतापरंप्राप्तंसंप्राप्तोयंमहाश्रयः॥ कस्यकस्या
सितनयाजननीकस्यकस्यवा॥ कस्यकस्यासिगृहिणीभवकोटिषुवर्त्तिनी॥ पंचभूतात्मकोदेहस्त्वग
सृङ्मांसबंधनः॥ मेदोमज्जास्थिनिचितोविण्मुत्रश्लेष्मभाजनं॥ शरीरांतमभिप्रेप्येतनिजदेहोद्भवेम
कं॥ मृत्वास्वतनयंमूढेमाशोकंकर्त्तुमर्हसि॥ यदिनामजनःकश्चिन्मर्त्येतरतियत्नतः॥ कथंतन्नप्रतरंती
हपर्वैःपर्वैर्विपश्चितः॥ तपसाविद्ययाबुध्यामंत्रौषधिरसायनैः॥ अतिपातिपरंमृत्युंनकश्चिद्दपिपं
डितः॥ नम्रतिर्वाधवाजन्मपरश्चोवावरानने॥ तस्मादनित्यात्वयवैनलंशोचितुमर्हसि॥ नित्यंसन्निहितोमृ
त्युःकिंसुखंवदंदेहिनां॥ व्याघ्रेपुरःस्थितेयासःपश्नामिवरोचते॥ अतोजन्मन्मृतीजंतुंयदीछसिवरा

75

ननें॥ ७३ शरणं व्रज सर्वेशं मृत्युंजयमुमापतिं॥ तावन्मृत्युभयं घोरं तावज्जन्मजराभयं॥ ७४ यावन्नोपैति शरणं
देही शिवपदांबुजं॥ अनुभूयेह दुःखानि संसारेस्मिन्सुदारुणे॥ मनो यदि विरज्येत तदा ध्यायेन्महेश्वरं॥ मनसा
पिबतः पुंसः शिवध्यानरसामृतं॥ स्वपः स्वल्पज्ञानजायेत संसारविषयासवे॥ विमुक्तसर्वसंगस्य मनो वैराग्य
यंत्रितं॥ यदा शिवपदे मग्नं तदा नास्ति पुनर्भवः॥ तस्मादिदं मनो भद्रे शिवध्यानैकसाधनी॥ लोकमोहसमा
विष्टमा कुरुष्व शिवं भज॥ ॥सूत उवाच॥ ॥एवं सानुनयं तस्या धीबोधिता शिवयोगिना॥ प्रत्याचष्टे गुरो
स्तस्य प्रणम्य चरणांबुजं॥ ॥राज्ञ्युवाच॥ ॥भगवन्मृतपुत्राया स्पृक्तायाः प्रियबंधुभिः॥ महारोगातुरा
या मे का गतिं मरणं विना॥ अतोहं मर्तुमिच्छामि सहैव शिशुनामुना॥ कृतार्थास्मि यदद्य त्वामपश्यं मरणो
न्मुखी॥ इति तस्या वचः श्रुत्वा शिवयोगी भै दयान्वितः॥ पूर्वोपहारं संस्मृत्य मृततस्यांतिकमाययौ॥ स
तदा भस्मसंगृह्य शिवमंत्राभिमंत्रितं॥ विदीर्णे तन्मुखे क्षिप्त्वामृतं प्राणैरयोजयत्॥ स बालकः संगतः प्रा
णैः शनैरुन्मील्य लोचने॥ प्राप्तसर्वेंद्रियबलो रुरोद स्तनकांक्षया॥ मृतस्य पुनरुत्थानं वीक्ष्य बालकस्य वि
स्मिता॥ जना मुमुदिरे सर्वे नगरेषु सविस्मयः॥ अथानंदजलासारी विह्वलोन्मत्तविभ्रमा॥ नेयारु तन
यं शीघ्रं बाष्पव्याकुललोचना॥ उपगुह्य तदा तन्वी परमानंदनिर्वृता॥ नावेदात्मानमन्यं वा सुषुप्तेव

राम

॥४

परिभ्रमात्॥ पुनश्च ऋषभो योगी तयोर्मातृकुमारयोः॥ शिवव्रणघ्नं तद्देहं भस्मनैव परामृशत्॥ तौ तदा
भस्मनास्पृष्टौ प्राप्तदिव्यकलेवरौ॥ देवानां सदृशां रूपं धं दधःतुः कांतिभूषितं॥ संप्राप्ते त्रिदशैर्वीर्यैर्यत्सु
खं पुण्यकर्मणां॥ तस्माच्छतगुणं प्राप सा राज्ञी सुखमुत्तमं॥ तां पादयोर्निपतितामृषभः प्रेमविक्लवां॥ ९९
उत्थाप्याश्वासयामास दुःखैर्मुक्तामुवाच ह॥ अयि वत्से महाराज्ञी जीव त्वं शाश्वतीः समाः॥ यावज्जी
वसि लोकेस्मिन्तावत्प्राप्यसे ज्जरां॥ एष ते तनयः साध्वी भद्रायुरिति नामतः॥ ख्यातिं प्राप्स्यति लोके
षु निजराज्यमवाप्स्यति॥ अस्यैवे ऋषभस्य वने तावत्तिष्ठ शुचिस्मिते॥ यावद्देवकुमारस्ते प्राप्तवि
द्यो भविष्यति॥ इति तामृषभो योगी तं च राजकुमारकं॥ संजीव्य भस्मवीर्येण ययौ देशान्यपेक्षि
तान्॥ [illegible]५॥ श्रीः॥ ॥इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे शिवभक्तमहिमानाम दशमोध्यायः॥ ॥श्रीः॥
॥सूत उवाच॥ ॥पिंगलानाम या वेश्या मया पूर्वमुदाहृता॥ शिवभक्तार्चनात्पुण्यात्त्यक्त्वा पूर्वकले
वरं॥ चंद्रांगदस्य सा भूयः सीमंतिन्यामजायते॥ रूपौदार्यगुणोपेता नाम्ना वै कीर्तिमालिनी॥ भद्रायु
रपि तत्रैव राजपुत्रो वणिक्पतेः॥ ववृधे सदने तस्य वैश्यपस्यापि महात्मनः॥ तस्यापि वैश्यनाथस्य कुमा
रो तीव चोत्तमः॥ स नाम्ना सुनयः प्रोक्तो राजसूनोः सखाभवत्॥ तावुभौ परमस्निग्धौ राजवैश्यकुमा

रकौ ॥ विक्रीडतुरुदारांगौरत्नकुंडलमंडितौ ॥ तस्यराजकुमारस्यब्राह्मणैःसवर्णिन्यस्यपतिः ॥ संस्कारान्कार
यामासस्वपुत्रस्यापिविस्तरात् ॥ कालेकृतोपनयनौगुरुशुश्रूषणेरतौ ॥ चक्रतुःसर्वविद्यानांसंग्रहंविन
यान्वितौ ॥ अथराजकुमारस्यप्राप्तेषोडशहायने ॥ सहसाऋषभोयोगीतस्यवेश्मसमाययौ ॥ साराज्ञीत
कुमारस्यशिवयोगिनमागतं ॥ मुहुर्मुहुःप्रणम्योभौपूजयामासतुर्मुदा ॥ ताभ्यांसंपूजितश्चाथयोगीन्द्रो
हृष्टमानसः ॥ तंराजपुत्रमुद्दिश्यबभाषेकरुणार्द्रधीः ॥१०॥ शिवयोग्युवाच ॥ ॥ कच्चित्तेकुशलंतातत्व
न्मातुश्चाप्यनामयं ॥ कच्चित्त्वंसर्वविद्यानांसंग्रहंकुरुषेघनं ॥ कच्चिद्गुरूणांसततंशुश्रूषापरमोभवा
न् ॥ कच्चित्स्मरसिमांताततवप्राणप्रदंगुरुं ॥ एवंवदतियोगीन्द्रेसाराज्ञीविनयान्विता ॥ स्वपुत्रंतस्यप
दयोर्निपात्येदमभाषत ॥ एषवत्सस्तवगुरोस्त्वमसिःप्राणदःपिता ॥ एषशिष्यस्त्वयायोग्योभवताकरुणा
त्मना ॥ अतोबंधुभिरुत्सृष्टमनाथंपरिपालय ॥ अस्मैसम्यक्सतांमार्गमुपदेष्टुंत्वमर्हसि ॥ इतिप्रसा
दितोराज्ञ्याशिवयोगीसदामतिः ॥ तस्मैराजकुमारायसन्मार्गमुपदिष्टवान् ॥१५॥ ऋषभउवाच ॥ ॥ श्रुति
स्मृतिपुराणेषुप्रोक्तोधर्मःसनातनः ॥ वर्णाश्रमानुरूपेणनिषेव्यःसर्वदाजनैः ॥ भजवत्ससतांमार्गंत
देवचरितंचर ॥ नदैवाज्ञांविलंघ्येथामाकार्षीर्दैवहेलनं ॥ गोदेवगुरुविप्रेषुभक्तिमान्भवसर्वदा ॥ त्वां

उळमपिसंप्राप्तंसदासंभावयातिथिं॥ सत्यंनत्यजसर्वत्रप्राप्तेपिप्राणसंकटे॥ गोब्राह्मणानांवारक्षार्थंम
सत्यंवावदकर्हिचित्॥ परस्वेषुपरस्त्रीषुदेवब्राह्मणवस्तुषु॥ त्यतृष्णांत्यजमहाबाहोदुर्लभेष्वपिवस्तुषु॥ सेळ
थ्यापांसदाचारोसद्वृत्तैःसत्समागमे॥ धर्मादिसंचयहेनित्यंनिष्ठांकुरुमहामते॥ स्नानेजपेवहोमेचस्वाध्यायेपि
त तर्पणे॥ गोविप्रानळ्पजासुनिरालस्योभवानघ॥ क्रोधंलोभंतथाग्रा[illegible]भुन्यमसदाग्रहं॥ कौटिल्यं
दंभमुद्वेगंयत्नेनपरिवर्जयेत्॥ स्वजनधर्मेधृतोपित्वंवृथाहिंसांपरित्यज॥ शुष्कवैरंवृथालापंपरनिंदां
चवर्जय॥ मृगयाद्यूतपानेषुस्त्रीषुस्त्रीविजितेषुच॥ अत्यासक्तिंचमाकर्षिस्तपाउविर्नयेषुच॥ मैत्रींकु
रुसुखाढ्येषुदुःखितेषुदयांकुरु॥ पुण्यवत्सुचसंतोषंमौदासीन्यंकुत्सितेषु॥ अल्पाहारमतिक्रोध
मतिनिंदामतिश्रमं॥ अत्यालसमतिक्रीडांसर्वदापरिवर्जय॥ अतिविद्यामतिश्रद्धामतिपुण्यमतिस्मृतिं॥
अत्युत्साहमतिख्यातिंमतिंधैर्यंचसाधय॥ सकामोनिजदारेषुसक्रोधोदुष्टशत्रुषु॥ सलोभःपुण्यनिच
येसभ्यस्पोलधर्मिषु॥ सद्वेषोभवपाखंडेसरागःसज्जनेषुच॥ दुर्बोधोभवदुर्मंत्रेबधिरपिशुनोक्ति
षु॥ धूर्त्तंशठंशाठंक्रूरंकितवंचपळंखळं॥ पतितंनास्तितंस्त्रिजघ्नंहरतःपरिवर्जय॥ आत्मप्रशंसामाका
र्षीरविज्ञातेंगितोभव॥ कुटुंबपुत्रवित्तेषुनात्यासक्तःसदाभवत्॥ पत्न्याःपतिव्रतायाश्चजनन्याश्च

रस्यैतांगुरोश्चवचनेविश्वासंकुरुसर्वदा॥ आत्मरक्षापरोनित्यमप्रमत्तोदृढव्रतः॥ विश्वासंनैवकुर्वी
थास्वभृत्येषुपिकुत्रचित्॥ विश्वासान्मावधीःकंचिदपिचौरंमहामते॥ अपापेपुनरशंकेथाःसत्यान्न
चलितोभव॥ अनाथंकृपणंवृद्धंस्त्रियंबालंनिरागसं॥ परिरक्षधनैःप्राणैर्बुध्याशक्तिर्बलेनच॥ अपि
शत्रुवधस्पार्हंमावधीःशरणागतं॥ अर्घ्यपात्रंसुरापात्रंदानावोवापिमहत्तमः॥ योवाकोवापियाचे
पाःकारुण्यात्त्वशिरोपिच॥ देहिकीर्त्तिंप्रयत्नेनसर्वदात्वंसाधयानिशं॥ सत्कीर्त्तिप्रभवालक्ष्मीःपुण्यं
सत्कीर्त्तिसंभवं॥ सत्कीर्त्याराजतेलोकश्चंद्रश्चंद्रिकयायथा॥ राज्ञांचविदुषांचैवकीर्त्तिरेवहिभूषणं॥
कीर्त्याचजीवनंलोकेस्वर्गएवनसंशयः॥ गजाश्वहेमनिचयंरत्नंचैवनगोपनं॥ अकीर्त्यापहृतंसर्वंत्व
पावन्नुचसत्वरं॥ मातुःकोपंपितुःकोपंगुरोःकोपंघनव्ययं॥ ब्राह्मणानांक्षमस्वत्वंमनपेचमहामते॥ य
थाद्विजाःप्रसादेयुस्तथातेषांहितंचर॥ राजानंसंकटेमग्नमुद्धरेयुर्द्विजोत्तमाः॥ आयुर्यशोबलंसौख्यंधनं
पुण्यंप्रजोन्नतिं॥ कर्मणायेनजायेततत्सेव्यंभवतानघ॥ सम्यक्विचार्यकार्याणियत्नेनकुरुसर्वदा॥
नकुर्याःकस्यचिद्बाधांपरबाधांनिवारय॥ चौरंदुष्टंचराजंचबोधयेःशक्तिमत्तया॥ स्नानेजपेचरो
मेचदैवेपित्र्येचकर्मणि॥ अत्वरोभवनिद्रायांभोजनेभवसत्वरः॥ दाक्षिण्ययुक्तमशठंवचनंसर्व

राम
॥८३॥

दावदः॥२३॥ अभीतोभवसर्वत्र विपक्षे पतसु च॥ प्रीतोभव ब्रह्मकुले पापेषु गुरुशासने॥२४॥ ज्ञातिबंधुषु विप्रेषु भार्यो
यां च तथैव च॥ समभावेन वर्त्तेथास्त्वं प्राप्तो जनपंक्तिषु॥ सतां हितोपदेशेषु तथा पुण्यकथासु च॥ विद्यागो
ष्ठीषु धर्मासु कश्चिन्मा भूः परांमुखः॥२५॥ भुवो पुण्यजनस्थाने प्रख्याते ब्रह्मसंकुले॥ महादेवशिवमये वस्त
व्यं भवता सदा॥२६॥ कुरुक्षगणिका यत्र यत्र तिष्ठंति कामुकाः॥ दुर्देशो नीचसंस्थाने कदाचिदपि माविश॥२७॥ एक
एवाश्रितोपि त्वं शिवं त्रिभुवनेश्वरं॥ सर्वान्देवानुपासीथास्त्वद्दिनानि वमानयं॥ सदा शुचिः सदा दक्षः सदा
शांतः सदा स्थिरः॥ सदा विजितसद्वर्गः सदेकांतो भवानघ॥२८॥ विप्रान्वेदविदः शांतान्प्रपतीश्च नियमोज्वला
न्॥ पुण्यवृक्षान्पुण्यतीर्थं नदीं पुण्यां महत्सरः॥ धेनुं च वृषभं रत्नं युवतीं च पतिव्रतां॥ आत्मनो गृह
देवानि सम्यक्सेव नमस्कुरु॥२९॥ उत्थाय समये ब्राह्म्ये स्नात्वा ते विमले जले॥ नमस्कृत्वात्मगुरवे ध्यायेद्देवमुमाप
तिं॥ नारायणं च लक्ष्मीशं ब्रह्माणं च विनायकं॥ स्कंदं कात्यायनीं देवीं महालक्ष्मीं सरस्वतीं॥३०॥ इंद्रादिलोकपा
लांश्च पुण्यश्लोकान् ऋषीनपि॥ चिंतयित्वा धर्मात्तेडमुघं तं प्रमेमेणोत्सदा॥३१॥ गंधं पुष्पं च तांबूलमन्यत्पक्व
फलादिकं॥ शिवाय दत्वा भुंक्षस्व यच्च पद्ज्यं प्रियं वनं॥ यद्भुक्तं यत्कृतं जप्तं यत्त्वापं यद्भुतं कृतं॥ यच्च तप्तं तपः स
र्वं तच्छिवाय निवेदय॥ भुंजान पर्यटन्तिष्ठन्नद्दार्यो॥ नोपिरमन्नपि॥ पश्यन्शृण्वन्वदन्गच्छन्शिवमेवानु

ऽंतय॥ रुद्राक्षकंकणलसत्करदोर्युग्मोभालांतरालधृतभस्मसितत्रिपुंड्रः॥ पंचाक्षरंपरिजपन्परिमंत्र
राजंध्यायत्सदापशुपतेश्चरणंरमेथाः॥ इतिसंक्षेपतोवत्सकथितोधर्मसंग्रहः॥ अन्येषुचपुराणेषुविस्तरेण
प्रकीर्त्तितः॥ अथापरंसर्वपुराणगुह्यंनिःशेषपापौघहरंपवित्रं॥ जयप्रदंसर्वविपद्विमोक्षंवक्ष्यामिशैवं
कवचंहिताय॥ ७०॥ ॥इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेशिवधर्मवर्णनंनामएकादशोध्यायः॥ श्रीः॥
॥ऋषभउवाच॥ ॥नमस्कृत्यमहादेवंसर्वव्यापीनमीश्वरं॥ वक्ष्येशिवमयंवर्मसर्वरक्षाकरंनृणां॥ शुचौदे
समासीनोयथावत्कल्पितासनः॥ जितेंद्रियोजितःप्राणश्चिंतयेच्छिवमुत्तमं॥ हृत्पुंडरीकांतरसंन्निविष्टं
स्वतेजसाव्याप्तनभोवकाशं॥ ध्यानावधूताखिलकर्मबंधःश्चिरंचिदानंदनिमग्नचेताः॥ षडक्षरंन्यास
समाहितात्माशैवेनकुर्यात्कवचेनरक्षां॥ मांपातुदेवोखिलदेवतात्मासंसारकूपेपतितंगभीरे॥ तन्ना
मदिव्यंपरमंत्रमूलंधुनोतिमेसर्वमघंहृदिस्थं॥ सर्वत्रमांरक्षतुविश्वमूर्त्तिर्ज्योतिर्मयानंदघनश्चिदात्मा॥ ५॥
अणोरणीयानुरुशक्तिरेकःसईश्वरःपातुस्सपादशेषात॥ योभूस्वरूपेणबिभर्तिविश्वंपायात्सभूमेर्गिरिशो
ष्टमूर्त्तिः॥ योपांस्वरूपेणनृणांकरोतिसंजीवनंसोवतुमांजलेभ्यः॥ कल्पावसानेभुवनानिदग्ध्वासर्वाणि
योनृत्यतिभूरिलीलाः॥ सकालरुद्रोवतुमांदवाग्नेर्वात्यादिभीतेरखिलाच्चतापात॥ प्रदीप्तविद्युत्कनकावभासो

राम
॥४८॥

विद्यावराभीतिकुठारपाणिः॥ चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यांदिशोरक्षतुमामजस्रं॥ कुठारखट्वांकु
शपाशाभयः खट्वांगभुजोक्षगुणांदधानः॥ चतुर्मुखोनीलरुचिस्त्रिनेत्रः पायादघोरोदिशिदक्षिणा
स्यां॥ कुंदेंदुशंखस्फटिकावभासोवेदाक्षमालावरदाभयांकः॥ त्र्यक्षश्चतुर्वक्त्रउरुप्रभावोसद्योधि
जातोवतुमांप्रतीच्यां॥ वराक्षमालाभयटंकहस्तः सरोजकिंजल्कसमानवर्णः॥ त्रिलोश्चारुचतुर्मुखोमां चन ४
पायादुदीच्यांदिशिवामदेवः॥ वेदाभयेष्टांकुशपाशटंककपालढक्काक्षगुणांदधानः॥ शीतद्युतिः पं
चमुखोवतात्मामीशानऊर्ध्वंपरमप्रकाशः॥ मूर्धानमव्यान्ममचंद्रमौलिर्भालंममव्यादथभालनेत्रः॥ १३॥
नेत्रेममव्याद्भगनेत्रहारीनासांसदारक्षतुविश्वनाथः॥ पायाच्छ्रुतीमेश्रुतिगीतिकीर्त्तिकपोलमव्यात्सत
तंकपाली॥ वक्त्रंसदारक्षतुपंचवक्त्रोजिह्वांसदारक्षतुविश्वनाथः॥ कंठंगिरीशोवतुनीलकंठःपाणि
द्वयंपातुपिनाकपाणिः॥ दोर्मूलमव्यान्ममधर्मबाहुर्वक्षःस्थलंदक्षमखांतकोव्यात्॥ ममोदरंपातुगि
रींद्रधन्वामध्यंममव्यान्मदनांतकारिः॥ हेरंबतातोममपातुनाभिंपायात्कटिंधूर्जटिरीश्वरोमे॥ ऊरु
द्वयंपातुकुबेरमित्रोजंघायुगंपुंगवकेतुरव्यात्॥ जानुद्वयंमेजगदीश्वरोव्यात्पादौममव्यात्सुरवंद्य

पादः॥ महेश्वरःपातुदिनादियामेमांमध्ययामेवतुवामदेवः॥ त्रियंबकःपातुतृतीययामेवृषध्वजःपा
तुदिनांतयामे॥ पायान्निशादौशशिशेखरोमांगंगाधरोरक्षतुमांनिशीथे॥ गौरीपतिःपातुनिशावसा
नेमृत्युंजयोरक्षतुसार्वकाळं॥ अंतःस्थितंरक्षतुशंकरोमांस्थाणुःसदारक्षतुमांबहिस्थं॥ तदंतरेपातु
पतिःपशूनांसदाशिवोरक्षतुमांसमंतात्॥ तिष्ठंतमव्याद्भुवनैकनाथःपायाद्व्रजंतंभुवनाथदिनाथः॥२२॥
वेदांतवेद्योवतुमांनिषण्णंमामव्ययःपातुशिवःशयानं॥ मार्गेषुमांरक्षतुनीलकंठःशैलादिदुर्गेषुपुरत्रया
रिः॥ अरण्यवासादिमहाप्रवासेपायान्मृगव्याधउदारशक्तिः॥ कल्पांतकालोग्रपटुप्रकोपःस्फुटा
ट्टहासोच्चलितांडकोशः॥ घोरारिसेनार्णवदुर्निवारोमहाभयाद्रक्षतुवीरभद्रः॥ पत्त्यश्वमातंगघटा
सहस्रवरूथलक्षायुतकोटिरिणां॥ अक्षौहिणीनांशतमाततायीनांछिन्द्यान्मृडोघोरकुठारधारया॥ नि
हंतुदस्यून्प्रलयानलार्चिर्ज्वलत्त्रिशूलंत्रिपुरांतकस्य॥ शार्दूलसिंहर्क्षवृकादिहिंस्रान्संत्रासयत्वीं राम
शधनुःपिनाकः॥ दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यंदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि॥ उत्पाततापविष ॥४५॥
भीतिरसद्ग्रहार्त्तिंव्याधींश्चनाशयतुमेजगतामधीशः॥ ॐनमोभगवतेसदाशिवायसकळतत्वात्म
कायसकळतत्वविहारायसकळलोकैककर्त्रेसकळलोकैकभर्त्रेसकळलोकैकहर्त्रेसकळलोकैकगु

८५

न

त्रेसकळलोकैकपित्रेसकळलोकैकमात्रेसकळनेत्रैकगुरवेसकळलोकैकसाक्षिणेसकळनिगमगुह्या
यसकळवरप्रदायसकळदुरितभंजनायसकळजगदभयकरायसकळलोकैकशंकरायशशांकशेखरा
यशाश्वतनिजाभासायनिर्गुणायनिराभासायनिरूपायनिःप्रपंचायनिःकळंकायनिरातंकायनिर्द्वंद्वा
यनिःसंगायनिर्मळायनिर्ममायनिरूपविभवायनित्यशुद्धाद्वैतपरिपूर्णसच्चिदानंदायपरमशांतिप्रका
शतेजोरूपाय॥ जयजयमहारुद्रमहारौद्रदुःखद्रावणभद्रावतारमहाभैरवकाळभैरवकपाळमाळाध
रखट्वांगचर्मपाशांकुशडमरुशूळचापबाणगदाशक्तिभिंडिमाळातोमरमुसलमुद्गरप्रासपट्टिशप
रशुभ्रशुंडीशतघ्नीचक्रायुधभीषणकरसहस्रमुखदंष्ट्राकराळातिकटाट्टहासविस्फारितब्रह्मांड
मंडळनागेंद्रकुंडलनागेंद्रहारनागेंद्रचर्मधरमृत्युंजयत्र्यंबकत्रिपुरांतकविरूपाक्षविश्वेश्वरवृषभवा
हनविभूतिभूषणविश्वतोरक्षरक्षतुमां॥ ज्वलज्वलमहामृत्युभयनाशयनाशयरोगभयंनाशयनाश
यनाशयमुत्सादय२विषसर्पभयंशमय२चोरभयंमारय२ममशत्रूनुच्चाटय२शूळेनविदारय२कुठा
रेणाभिंधि२खट्वांगेनव्यापोथय२मुसळेननिष्पेषय२बाणैःसंताडय२रक्षांसिभीषय२भूतानिविद्रा
वय२कूश्मां[illegible] वेताळमारीचीगणब्रह्मराक्षसान्संत्रासय२ममाभयंकुरु२वित्रस्तमाश्वासय२नरकमहा

४८

सयान्मुद्धारय२संजीवय२क्षुतृष्णांआप्यायय२दुःखातुरमानंदय२शिवकवचेनममाछादयाछादयत्र्यंब
कनमस्तेनमस्ते॥ ॥ऋषभउवाच॥ ॥इत्येतत्कवचंशैवंवरदंव्याहृतंमया॥ सर्वबाधाप्रशमनंरहस्यंसर्व
देहिनां॥ यःसदाधारयेन्मर्त्यःशैवंकवचमुत्तमं॥ नतस्यजायतेक्वापिभयंशंभोरनुग्रहात्॥ क्षीणायुर्मृत्युमा
पन्नमहारोगहतोपिवा॥ सद्यःसुखमवाप्नोतिदीर्घमायुश्चविंदति॥ सर्वदारिद्र्यशमनंसौमंगल्यविवर्धनं॥ यो
धीतेकवचंशैवंदेवैरपिसपूज्यते॥ महापातकसंघातैमुच्यतेचोपपातकैः॥ देहांतेमुक्तिमाप्नोतिशिववर्मा
नुभावतः॥ त्वमपिश्रद्धयावत्सशैवंकवचमुत्तमं॥ धारयस्वमयादत्तंसद्यश्रेयोह्यवाप्स्यसि॥ सूतउवाच॥
॥इत्युक्त्वाऋषभोयोगीतस्मैपार्थिवसूनवे॥ ददौशंखंमहारावंखड्गंचारिनिषूदनं॥ पुनश्चभस्मसं
मंत्र्यतदंगंसर्वतोस्पृशत्॥ गजानांषट्सहस्रस्यद्विगुणंचबलंददौ॥ भस्मप्रसादात्संप्राप्तबलैश्वर्यधृतिः
स्मृतिः॥ सराजपुत्रःशुशुभेशारदर्कइवश्रिया॥ तमाहप्रांजलिर्भूयःसयोगीराजनंदनं॥ एषखड्गोमया
दत्तस्तपोमंत्रप्रभावतः॥ शीतधारामिमंखड्गंयस्मैदर्शयसेस्फुटं॥ ससद्योम्रियतेशत्रुःसाक्षान्मृत्युरपि
स्वयं॥ अस्यशंखस्यनिर्ह्रादंयेशृण्वंतितवाहिताः॥ तेमूर्छिताःपतिष्यंतिन्यस्तशस्त्राविचेतनाः॥ खड्गशं
खाविमौदिव्यौपरसैन्यविनाशनौ॥ आत्मसैन्यस्वपक्षाणांशौर्यतेजविवर्धनौ॥ एतयोश्चप्रभावेनशैवेन

राम
॥४६

कवचेनच॥ द्विषट्सहस्रनागानांबलेनमहतापिच॥ भस्मधारणसामर्थ्याच्छत्रुसैन्यंविजेष्यसि॥ प्राप्यसिं
हासनंपित्र्यंगोप्तासिपृथिवीमिमां॥ इतिभद्रायुषंसम्यक्कृत्वारक्षांसमातृकं॥ ताभ्यांसंपूजितःसोथयोगीस्वै
रगतिर्ययौ॥६०॥ ॥इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेशिववर्मकथनंनामद्वादशोध्यायः॥ ॥श्रीः॥
॥सूतउवाच॥ ॥दशार्णाधिपतेस्तस्यवज्रबाहोर्भुजः॥ बभूवुःशत्रुबलवान्राजामगधराट्स्मृतः॥ सवै
हेमरथोनामबाहुरः॥ वीरथोत्कटः॥ बलेनमहतावृत्यदशार्णान्स्पूर्णबली॥ चमूपास्तस्यदुर्घर्षाःप्राप्यदे
शांदशार्णकं॥ व्यलुंपन्वसुरत्नानिगृहाणिददहुःपरे॥ केचिद्धनानिजगृहुःकेचिद्बालस्त्रियोधनं॥ आय
युःस्तस्यनगरींवज्रबाहोस्तुमागधाः॥ एवंपर्याकुलंवीक्ष्यराज्यंन्तर्गेहमेवच॥ युद्धायनिर्जगामाशुवज्र
बाहुःससैनिकः॥ वज्रबाहोस्तुभूपालास्तथामंत्रिपुरस्सराः॥ युयुधुर्मागधैःसार्धंनिघ्नंतोरिपुवाहिनीं॥
वज्रबाहुर्महेष्वासोदंशितोरथमास्थितः॥ विकिरन्बाणवर्षाणिचकारकदनंमहत्॥ दशार्णराजयुध्य
तंदृष्ट्वायुद्धेषुदुस्सहं॥ तमेवतरसावव्रुःसर्वेमागधसैनिकाः॥ कृत्वातुसुचिरंयुद्धंमागधाहृतविक्रमः॥
तत्सैन्यंनाशयामासुर्लेभिरेजयश्रियं॥ केचित्तस्यरथंजघ्नुःकेचित्तद्धनुराच्छिनत्॥ सूतंतस्यन्यघ्नन्नेकः
त्वत्परःखड्गमाच्छिनत्॥ तंछिन्नखड्गंधन्वानंविरथंहतसारथिं॥ बलाद्गृहीत्वाबलिनोबबंधुर्नृपतिंरुषा॥

८८

तस्यमंत्रिगणांसर्वंतत्सैन्यंचविहन्यते॥ मागधास्तस्यनगरींविविशुर्जितकांक्षिणः॥१२॥ अश्वान्गजान्
रथान्उष्ट्रानंशुकानिधनानिच॥ जगृहुर्युवतीःसर्वाश्चवेगीरपिकन्यकाः॥ राज्ञोवरोधमहिषीदा
सीश्चैवसहस्रशः॥ कोशंचरत्नसंपूर्णंजगृहुस्त्वाततोपिनः॥ एवंविनश्यनगरींभ्रष्टास्त्रीगोधनादि
कं॥ वस्त्रबाहुबल्याद्यंध्वारथेस्थाप्यविनिर्ययुः॥ एवंकोलाहलेजातेराष्ट्रनाशेसुदारुणे॥ राजपुत्रोथ
भयायुस्तद्वार्तामतिदुःसहां॥ सन्नाहंखवंखड्गमादायवैश्यपुत्रंसहायवान्॥ कुमारोहयमारुह्यदंशितोवि
जिगीषया॥ जवेनागत्यतद्देशंमागधैरावृतंतदा॥ राज्यमाक्रंदमानंचहृतस्त्रीगोधनंगृहं॥ दृष्ट्वारा
ष्ट्रंजनंशून्यंसर्वत्रैवभयावहं॥ क्रोधात्मासनृपस्तूर्णंप्रविवेशरिपुवाहिनीं॥ आकर्णकृष्टकोदंडोव
वर्षेच्छरसंततिं॥ तेहन्यमानारिपवोराजपुत्रेणसायकैः॥ तमभिद्रुत्यवेगेनशरैर्विव्यधुरुल्बणैः॥ ह
न्यमानोस्तुवेगेनरिपुभिर्युद्धमर्दनैः॥ नचचालरणेधीरःशिववर्माभिरक्षितः॥ सोस्त्रवर्षंप्रगृह्याशु
प्रविश्यगजलीलया॥ जघानाश्वान्रथांश्चनागान्पदातीनतिकोपितः॥ तत्रैकंनृपतिंहत्वाससूतंनृपनं
दनः॥ तमेवरथमास्थायवैश्यनंदनसारथिः॥ सचचाररणेधीरःसिंहोमृगकुलेयथा॥ अथसर्वेसुसं
रब्धाश्शूराःप्रोतकार्मुकाः॥ अभिषस्तेतमेवैकंचमूपाबलशालिनः॥ तेषामापततामग्रेखड्गमुद्यम्य

राम
॥४७॥

८९

दारुणं॥अभ्याययो महावीरो दर्शयन्निजपौरुषं॥करालांतकजिह्वाभंतस्यखड्गंमहोज्वलं॥दृष्ट्वैवसह
सानम्रुःश्चमपास्तत्प्रभावतः॥येयेपतङ्गपतितंखड्गंप्रस्फुरंतरणांगणे॥तेसर्वेनिधनंजग्मुर्वह्निंप्राप्य
ववकीटकाः॥अथासौसर्वसैन्यानांविनाशायमहाभुजः॥शंखंदध्मौमहारावंपूरयन्निवरोदसी॥ते
नशंखनिनादेनविक्षुब्धानैवभूरपसा॥श्रुतमात्रेणरिपवोमूर्छितान्पतितंभुवि॥येश्वपृष्ठेरथेयेचयेचदं
तिषुसंस्थिताः॥तेविसंज्ञाःक्षणाल्येनशंखेनादहतौजसः॥तान्भग्नोपपतितान्सर्वान्नष्टसंज्ञानिरायु
धान्॥विगणय्यमतप्रायान्नवधीद्धर्मशास्त्रवित्॥आत्मनःपि।पतरंबद्धंमोचयित्वारणाजिरे॥तत्प
त्नीःशत्रुवशगाःसर्वाःसद्यो व्यमोचयत्॥पत्नीश्चमंत्रिमुख्यानांतथान्येषांपुरौकसां॥स्त्रियोबाल
श्चवृद्धांश्चगोधनान्यप्यनेकशः॥मोचयित्वारिपुभयात्त्रणमश्वास्यपीडितान्॥मरुन्मनोजवान
श्चान्मातंगाद्रिसंनिभान्॥स्यंदनानिरोक्माणिदासीश्चारुचिराननाः॥सर्वमाहृत्यवेगेनगृहीत्वाच
धनंबहु॥मागधेशंहेमरथेनिबद्धंचपराजितं॥तन्मंत्रिणस्तत्रभूपास्तत्रमुख्याश्चनायकाः॥गृहीत
त्वातरसाबध्वापुरंप्रावेशयद्रुतं॥पूर्वंयेसमरेभग्नाविद्रुताःसर्वतोदिशं॥तेमंत्रिमुख्याअश्वस्थाना
पकाश्चसमायथुः॥कुमारविक्रमंदृष्ट्वासर्वेतेचविचेतसः॥तेनेमिरेसुरश्रेष्ठंकारणादागतंभुवि॥

९०

अहोनःसुमहद्भाग्यमहोनःसुमहत्फलं॥ केनाप्यनेनवीरेणमृताःसंजीवितापुनः॥ एषकिंयोगसिद्धोवा
योगीवाप्यमरश्चकिं॥ अमानुषमिदंकर्मयदनेनकृतंमहत्॥ नूनमस्यभवेन्मातासागौरीसशिवःपिता॥ ८२
अक्षौहिणीनांनवकंजघानांतकरूपधृक्॥ इत्याश्चर्ययुतैर्दृष्टैःप्रशंसद्भिःपरस्परं॥ पृष्टोयामजनेनासौ
आत्मानंचाहतत्ववित्॥ सोप्यागत्यस्वपितरंविस्मयाह्लादविह्वलः॥ मुंचंतमानंदजलंनवेदप्रेमविह्व
लः॥ सराजानिजपुत्रेणप्राणपादभिवंदितः॥ आश्लिष्यगाढंतरसाबभाषेनपनंदनं॥ कस्त्वंदेवो
मनुष्योवागंधर्वोवामहामते॥ कामाताजनकःकोवाकोदेशस्तवनामकिं॥ कस्मात्त्वंशत्रुभिर्बद्धा
मृतानिवहतौजसः॥ कारुण्यादिहसंप्राप्यसपत्नीकानमोचयत्॥ कुतोलब्धमिदंशौर्यंधैर्यंतेजो
बलोन्नतिः॥ विजेष्यसित्रिलोकांश्चसदेवासुरमानुषान्॥ अपिजन्मसहस्रेणतवानृण्यंमहामे
ते॥ कार्त्तुनाहंसमर्थोस्मिसहैभिर्भ्रातृबांधवैः॥ इमांपुत्रानिमांपत्नीमिदंराज्यमिदंपुरं॥ सर्वंविहा — राम
यमहितंत्वय्येवप्रेमबंधनं॥ सर्वंकथयमेतातमत्प्राणपरिरक्षक॥ एतन्ममचपत्नीनांत्वदधीनंचजी — ॥४८॥
नंचजीवितं॥ ॥सूतउवाच॥ ॥इतिपृष्टःसभद्रायुस्तपित्रासमभाषत॥ एषवैश्यसुतोनाम्नासुन
योमत्सखानृप॥ अहमस्यगृहेरम्येवसामिसहमातृकः॥ भद्रायुर्नाममद्वृत्तंपश्चाद्विज्ञापयामितत्॥

पुरंप्रविश्यभद्रंतेसदारःससुहृज्जनः॥ सैत्यक्त्वाभयमरातिभ्योविहरस्वयथासुखं॥ नेतुंत्वामंबुजरिपुस्त्वाव
घावदागमनंमम॥ अरुमद्यगमिष्यामिशीघ्रमात्मनिवेशनं॥ इत्युक्त्वानृपमामंत्र्यभद्रायुर्नृपनंदनः॥ आज
गामस्वभवनंमात्रेसर्वंन्यवेदयत्॥ सापिहृष्टास्वतनयंपरिरेभेसुलोचना॥ संचवैश्यपतिःप्रेम्णापरिषज्याभ्य
पूजयत्॥ वज्रबाहुश्चराजेंद्रप्रविष्टोनिजमंदिरं॥ स्त्रीपुत्रमात्यसहितःप्रहर्षमतुलंययौ॥ तस्यांनिशायांच
पुनःऋषभोयोगिनांवरः॥ चंद्रांगदंसमणसीमंतिन्याःपतिंनृपं॥ भद्रायुषःसमुत्पत्तिंतस्यकर्मातिमानुषं॥ ६०
आवेद्यरहसिप्रेम्णावत्सुतंकीर्त्तिमालिनी॥ भद्रायुषेप्रयच्छेतिबोधयित्वाचनैषधं॥ ऋषभोनिर्जगामा
यदेशकालार्थतत्त्ववित्॥ अथचंद्रांगदोराजामुहूर्त्तेमंगलान्विते॥ भद्रायुषंसमाहूयप्रायच्छत्कीर्त्तिमा
लिनीं॥ कृतोद्वाहःसराजेंद्रकुमारःसहभार्यया॥ हिमासनस्थःशुशुभेरोहिण्येवनिशाकरः॥ वज्रबाहुस्ततस्त्वि ६५
तरंसमाहूयसनैषधः॥ पुरंप्रवेश्यसामात्यःप्रत्युत्थाप्यपूजयत्॥ तत्रापश्यत्कृतोद्वाहंभद्रायुषमरिंदम॥
पादयोःपतितंप्रेम्णाहर्षात्तपरिषस्वजे॥ एषमेप्राणदोवीरएषशत्रुनिबर्हणः॥ अथाप्यज्ञातवंशोयंम
यानंतपराक्रमः॥ एषतन्नृपजामाताचंद्रांगदमहाबलः॥ अस्यवशामथोत्पत्तिंश्रोतुमिच्छामितत्त्वतः॥ इत्थंद
शार्णराजेनप्रार्थितोनिषधापतिः॥ विविक्तउपसंगम्यप्रहसन्निदमब्रवीत्॥ एषतेतनयोराजरोशावीर

गपीडितः॥ त्वयावनेपरित्यक्तः सहमात्रारुजर्जितः॥ परिभ्रमंतीसानारीविपिनःशिशुनासह॥ दैवाद्वैश्य
गृहंप्राप्यतेनवैश्येनरक्षिता॥ अपासौबकुरोगार्चौम्रृतस्तवकुमारकः॥ केनापियोगीराजेनमृतःसंजीवि
तःपुनः॥ ऋषभाख्यस्यतस्यैवप्रभावाच्छिवयोगिनः॥ रूपंतद्वसंहृत्यप्राप्तौमातृकुमारकौ॥ तेनदत्तेनरा
खेनखड्गेनारिविघातिना॥ जिगायसमरेशत्रून्शिववर्माभिरक्षितः॥ द्विःषट्सहस्रनागानांबलमेकोवि
भर्त्यसौ॥ सर्वविद्यासुनिष्णातोममजामातृतांगतः॥ अतएनंसमादायमातरंचास्यसुव्रतां॥ गच्छस्वन
गरींराजन्प्राप्स्यसिश्रेयउत्तमं॥ इतिचंद्रांगदःसर्वमाख्यायांतर्गृहेस्थितां॥ तस्यायपत्नीमाहूयदर्शया
मासभूषितां॥ इत्यादिसर्वमाकर्ण्यदृष्ट्वाचसमहीपतिः॥ व्रीडितोनितरांमोहात्कृतंकर्मजुगुप्सितं॥
प्राप्तश्चपरमानंदंतयोर्दर्शनकौतुकात्॥ पुलकांकितसर्वांगस्तावुभौपरिषस्वजे॥ एवंनिषधराजेनप
जितश्चाभिनंदितः॥ सभोजयितासम्यक्कृतंस्वयंचसहमंत्रिभिः॥ तांजायांचतथापुत्रंस्नुषांचैवयथाक्रमं॥
आदायपरिवारेणवज्रबाहुःपुरींययौ॥ ससंभ्रमेणमहताभद्रायुःपितृमंदिरं॥ संप्राप्यपरमानंदंसचकार
पुरौकसां॥ कालेनदिवमारूढेपितरिप्राप्तयौवनः॥ भद्रायुःपृथिवींसर्वांशशासाद्भुतशासनः॥ मागधेशं
हेमरथंमोचयामासबंधनात्॥ संध्यायमैत्रीपरमांब्रह्मर्षीणांचसन्निधौ॥ इत्थंत्रिलोकमहतींशिवयोगि

राम
॥४३

९३

पूजांकृत्वापुरातनभवेपिसराजसूनुः॥ निस्तीर्यदुःसहविपत्कृतमाप्तराज्यभ्रंशंदांगदस्यसुतयासहसाधु
रेमे॥ ८८॥ ॥ इतिश्रीस्कंदपुराणेब्रम्होत्तरखंडेभद्रायूपाख्यानंनामत्रयोदशोध्यायः॥ ॥श्रीः॥ ॥
॥सूतउवाच॥ ॥ प्राप्तसिंहासनेवीरोभद्रायुःसमहीपतिः॥ प्रविवेशावनंरम्यंकदाचित्प्रिययासह॥ तस्मि
न्विकसिताशोकप्रसूननवपल्लवे॥ प्रोत्फुल्लमल्लिकाखंडकूजद्भ्रमरसंकुले॥ नवकेसरसौरभ्यबंधुरालिजनो
त्सुके॥ सघःकौरकिताशोकतमालगरुनांतरे॥ प्रसूनप्रकरानम्रमाधवीवनमंडपे॥ प्रवालकुसुमघोत
चूतशाखाभिरंजिते॥ पुन्नागवनविभ्राजत्पुंस्कोकिलविरागिणी॥ वसंतसमयेरम्येविजहारस्त्रिया
सह॥ अथाविदूरेक्रंदंतौधावंतौद्विजदंपती॥ अन्वीयमानौव्याघ्रेणददर्शन्नृपसत्तमः॥ पाहिपाहिम
हाराजहानाथकरुणानिधे॥ एषआयातिशार्दूलोदग्धुमावांमहारवः॥ एषपर्वतसंकाशोनेकप्राणिभ
यंकरः॥ यावन्नस्यादतिप्राप्पुतावन्नौरक्षभूपते॥ रसमाक्रंदितंश्रुत्वासराजाधनुराददे॥ तावदभ्येत्य
शार्दूलोमध्येजयाहतांवधु॥ हानाथनाथहाकांतहाशंभोहाजगद्गुरो॥ इतिरोरूयमाणांतांव्याघ्रोजग्रा
हभीषणः॥ तावत्सराजानिशितैर्भल्लैर्व्याघ्रमताडयत्॥ शराशार्दूलोमहासत्वोराज्ञोस्त्रैरक्षतव्यथः॥ बला
दाकृष्यतांनारीमपात्क्रूरसत्वरः॥ व्याघ्रेणोपहृतांपत्नींवीक्ष्यविप्रोथदुःखितः॥ रुरोदहाप्रियेबाले

हाकांतेहापतिव्रते॥ मामेकाकिनमुत्सृज्य क्वयता लोकांतरंगता॥ त्वांप्रियांयोषितांत्यक्त्वा कथंजीवितुमुत्सहे॥ राजन्कृतेन शास्त्राणि कृतंश्लाघ्यंन रुधनुः॥ कृतेद्वादशसाहस्रमहानागातिगंबलं॥ किंतेखड्गेनशारेण किंतेमंत्रास्त्रविद्यया॥ किंसत्वेनप्रतापेन किंप्रभावेनभूयसा॥ तत्सर्वंविफलंजातं यत्त्वान्यत्वयितिष्ठति॥ यस्त्वेवंनकसंजंतुंन निवारयतुंक्षमः॥ क्षत्रस्यायंपरोधर्मः सताघत्परिरक्षणं॥ तस्मिन्कुलोचितेधर्मेनष्टेत्वंजीवितेनकिं॥ आर्त्तानांशरणार्त्तानां त्राणंकुर्वंतिपार्थिवाः॥ प्राणैरर्थैश्च धर्मैस्तास्तद्धिहीनाम्रतोपमाः॥ आर्त्तत्राणविहीनानांजीवितान्मरणंवरं॥ वरंविषाशनंप्राप्तंवरमग्नौप्रवेशनं॥ अनाथानांप्रपन्नानांरूपणानामरक्षणात्॥ इत्थंविलपितंतस्य स्ववीर्यस्यविगर्हणं॥ निशम्यनृपतिःशोकादात्मन्येवमचिंतयत्॥ अहोमेपौरुषंनष्टंममदैवविपर्ययात्॥ अघकीर्तिश्चनष्टामेपातकंप्राप्तमुल्कटं॥ धर्मोमेप्युचितोनष्टोमंदभाग्यस्यदुर्मतेः॥ ननंमेसंपदोराज्येमायुष्यंक्षयमेष्यति॥ आयुषिसंपदोभोगाः पुत्रदारधनानिच॥ दैवेनक्षणमुत्पंतिक्षणाद्वस्तंव्रजंतिच॥ अतूरनंदिजंन्मानं हतदारंश्चवायुतं॥ गतशोकंकरिष्यामिदत्वाप्राणानतिप्रियान्॥ इतिनिश्चित्यमनसाभद्रायुर्नृपसत्तमः॥ पतित्वापादयोस्तस्यबभाषेपरिसांत्वयन्॥ कृपांकुरुमयिब्रह्मन्क्षत्रबंधोहतौजसि॥ त्यज्यशोकंमहाबालोदास्याम्यर्थंतवेप्सितं॥ इदंराज्यमियंराज्ञीममचेदंकलेवरं॥ त्वदधीनमिदंसर्वंकिंतेभिलषितंवद॥ २८॥

॥ब्राह्मण उवाच॥ ॥किं मादर्शो न वांधस्य किं गेहे भैक्ष्य जीविनः॥ किं पुस्तकेन मूर्खस्य नस्त्रिकस्य धनेन
किं॥ अतो हृतपत्नीको भुक्तभोगो न कर्हिचित्॥ इमां तव अग्रमहिषीं कामये दीपतां मम॥३१॥ राजोवाच॥
ब्रह्मन् किमेष धर्मस्ते किं मे तद्गुरुशासनं॥ अस्वर्ग्यमयशस्यं च परदाराभिमर्षणं॥ दातारः संति वित्तस्य रा
ज्यस्य गजवाजिनां॥ आत्मदेहस्य वा कापि कलत्रस्य न कर्हिचित्॥ परदाराभिभोगेन यत्पापं समुपार्जितं॥
न तत्क्षालयितुं शक्यं प्रायश्चित्तशतैरपि॥३२॥ ब्राह्मण उवाच॥ ॥अपि ब्रह्मवधं घोरमपि मद्यनिषेव
णं॥ तपसा तारयिष्यामि किं पुनः पारदारिकं॥ तस्मात्प्रयच्छ ते भार्यामिमां मामघन चान्यथा॥ अरक्षणाद्धि पा
र्त्तानां गतासि नरकं ध्रुवं॥ इति विप्रगिरा भीतश्चिंतयामास पार्थिवः॥ अरक्षणान्महत्पापं पत्नीदानं तु तो
वरं॥ अतः पत्नीं द्विजायाय दत्वा किल्बिषमुक्तये॥ सद्यो वह्निं प्रवेक्ष्यामि कीर्त्तिश्चागर्हिता भवेत्॥ इति
निश्चित्य मनसा समुज्वाल्य हुताशनं॥ तं ब्राह्मणं समाहूय ददौ पत्नीं सहोदकं॥ स्वयं स्नानं शुचिर्भूत्वा
प्रणम्य विबुधेश्वरान्॥ तमग्निं त्रिः परिक्रम्य ध्यात्वा देवं महेश्वरं॥ तमग्नौ पतिष्यंति प्रपातासक्तचे
तसं॥ प्रतिषिध्याय विश्वेशः॥ प्रादुर्भूतो जगत्पतिः॥ तमीश्वरं पंचमुखं त्रिनेत्रं पिनाकिनं चंद्रकलावतं
सं॥ प्रलंबितपिंगजटाकलापं मध्यंगतं भास्करकोटितेजसं॥ मृणालगौरं गजचर्मवाससं गंगातरंगे

स्मितमौक्तिदंतं॥ नागेंद्रहारावलिकंकणोर्मिका। किरीटकांसंगदकंकणोज्वलं॥ स्रक्कासिखट्वांगकु
ठारचर्ममृगाभयेष्टाक्षपिनाकहस्तं॥ वृषोपरिस्थं सितनीलकंठं प्रोद्भूतमग्रे नृपतिर्ददर्श॥ अथांबरा
न्निपेतु दिव्याः कुसुमवृष्टयः॥ प्रणेदुर्दुंदुभयो दिव्याश्च ननृतुर्जगुः॥ तत्राजग्मुर्नारदाद्याः सनका
द्याः सुरर्षयः॥ इंद्रादयश्च लोकेशास्तथा ब्रह्मर्षयोऽमलाः॥ तेषां मध्ये समासीनो महादेवः सहोमया॥ ववर्ष क
रुणासारं भक्तिनम्रे महीपतौ॥ तं दृष्ट्वानानंदविजृंभितात्माय प्रवृद्धबाष्पांबुपरिप्लुतांगः॥ प्रहृष्टरोमा मा
लगद्गदाक्षरं तुष्टाव गीर्भिर्मुकुलीतलांजलिः॥ राजोवाच॥ ॥ नतोस्म्यहं देवमनादिमव्ययं प्रधा
नमव्यक्तगुणं महांतं॥ अकारणं कारणकारणं परं शिवं चिदानंदघनप्रकाशं॥ त्वं विश्वसाक्षी जगतो
स्य कर्त्ता निगूढधामा हृदि संनिविष्टः॥ अतो विचिन्वंति धिया विपश्चितो योगैरनेकैः कृतरोधैः॥ ए
कात्मना भावयितुं त्वमेको नानाधियाप्यस्य मतेकरूपः॥ अतींद्रियं त्वां रक्षि दयास्तविश्रम मनो यथा
संधिप्यते हि ते पदं॥ त्वं वाङ्गुरापं मनसोऽधिपश्च व्यपेतरूपं परमात्मरूपं॥ गुणैकनिष्ठं प्रकृतौ विली
नं कथं पुनस्तोतुमलं गिरो मे॥ तथापि भव्याश्रयतामुपेयुषस्तवांघ्रिपद्मं शरणार्त्तितं जनं॥ सुघो
रसंसारदवाग्निपीडितो भजामि नित्यं परवशीति ज्ञातयो॥ सर्वत्र क्षेत्रे निरासायद्वैतं भिन्नात्ममूर्त्तये॥

राम
॥५१॥

97

भसक्तायनमस्तुभ्यंसक्ताभासायभूयसे॥५३॥निराभासायनिस्सायसत्यज्ञांतरात्मने॥विशुद्धायविदूराय
विमुक्ताशेषवर्मणे॥नमोनंतायमहतेशांतायशिवरूपिणे॥अघोरायसुघोरायघोराघौघविदारणे॥५४॥
भर्गायभवबीजानांभर्जनायगरीयसे॥नमोविधूतमायायविपदात्मगुणायते॥५५॥त्राहिमांजगतांनाथ
पाहिशंकरशाश्वत॥पाहिरुद्रविरूपाक्षपाहिमृत्युंजयव्यय॥५६॥शंभोशशांककृतशेखरशांतमूर्त्ते
गोरीशमोपृविनिवेशकृताशनेत्रः॥गंगाधरागजविदारणपुण्यकीर्त्ते भस्मवेशाभ्रधरनिवाससदा
नमस्ते॥५७॥सूतउवाच॥ ॥एवंसभगवान्राज्ञादेवदेवोमहेश्वरः॥प्रसन्नःसहपार्वत्याप्रत्युवाचद
यानिधिः॥५८॥श्रीसदाशिवउवाच॥ ॥राजन्नतेपरितुष्टोस्मिभक्त्यापुण्यस्तवेनच॥अनन्यचे
तास्त्वंनित्यंसदामांपरिपूजय॥तवभावपरीक्षार्थंद्विजोभूत्वेहचागतः॥व्याघ्रेणयापरीग्रस्तासाक्षा
द्देवीगिरिजा॥व्याघ्रोमायामयोयस्तेशरीरक्षतविग्रहः॥धीरतांद्रष्टुकामस्तेपत्नीयाचितवानहं॥५९॥
अस्याश्चकीर्त्तिमालिन्यास्तवभक्त्याचमानद॥तुष्टोहंसंपरीतस्यममप्रत्यक्षतांगतः॥विद्यपभाक
रोनामतत्पुत्रःसुनयाधिपः॥ ॥राजोवाच॥ ॥सर्वमेतान्महादेवसदात्वत्पार्श्वगान्कुरु॥६०॥सूतउवाच॥

अथराज्ञीमहाभागाप्रणताकीर्त्तिमालिनी॥ भक्त्याप्रसाद्यगिरिशंप्रययाचेवरमुत्तमं॥७२॥ राज्ञ्युवाच॥
त्वंह्यंगदोममपितामातासीमंतिनीचमे॥ तयोर्याचैमहादेव त्वत्पार्श्वेसन्निधिसदा॥ एवमास्त्विति
गौरीशःप्रसन्नोभक्तवत्सलः॥ तयोःकामवरंदत्वाक्षणानंतर्हितोभवत्॥ सोपिराजामरैःप्राम्यंप्रदप्रा
प्यवभ्रूलिनः॥ सहितःकीर्त्तिमालिन्याबुभुजेविषयान्प्रियान्॥ कृत्वावर्षायुतंराज्यमव्याहतबलोन्नतिः॥
राज्यंपुत्रेषुविन्यस्यभेजेशंभोःप्रियपदं॥ चांगदोपिराजेंद्रोराज्ञीसीमंतिनीचसा॥ भक्त्यासंपूज्यगि
गिरिशंजग्मतुःशांभवंपदं॥ एतत्पवित्रमघनाशकरंविचित्रंशंभोर्गुणानुकथनंपरमंरहस्यं॥ यःश्रा
वद्बुधजनाग्रपतःपठेद्वासंप्राप्यभोगविभवःशिवमेतिसोंते॥८०॥ ॥ ॥इतिश्रीस्कंदपुराणेब्रह्मो
त्तरखंडेशिवमाहात्म्यकथनंनामचतुर्दशोध्यायः॥ ॥श्रीः॥ ॥सूतउवाच॥ ॥ऋषभस्यानुभा
वोपंवर्णितःशिवयोगिनः॥ अथान्यस्यापिवक्ष्यामिप्रभावंशिवयोगिनः॥ यस्मिन्नश्चापिमाहात्म्यंव राम
र्णयामिसमासतः॥ कृतकृत्याभविष्यंतियच्छ्रुत्वापापिनोहिपि॥ अस्त्येकोवामदेवाख्यःशिवयोगी ॥५२
महातपाः॥ निर्द्वंद्वोनिर्ममःशांतोनिःसंगःसमदर्शनः॥ आत्मारामोजितक्रोधोगृहदारविवर्जितः॥ अ
तर्कितगतिर्मौनीसंतुष्टोनिःपरिग्रहः॥ भस्मोद्धूलितसर्वांगोजटामंडलमंडितः॥ वल्कलाजिनसंवीतो

भिक्षापात्रपरिग्रहः॥ स एकदा चरंल्लोके सर्वानुग्रहतत्परः॥ क्रौंचारण्यं महाघोरं प्रविवेश यदृच्छया॥ ९
तस्मिन्निर्मनुजेरण्ये तिष्ठत्येको ति भीषणः॥ क्षुत्तृषाक्लितो नित्यं परः कश्चिद्ब्रह्मराक्षसः॥ तं प्रविष्टं शिवा
त्मानं संदृष्ट्वा ब्रह्मराक्षसः॥ अभिदुद्राव वेगेन जग्धुं क्षुत्परिपीडितः॥ व्यात्ताननं महाकायं घोरदंष्ट्रभ
नकं॥ तमायांतमभिप्रेक्ष्य योगीशोनु च राक्षसः॥ अथाभिद्रुत्य सहसा स घोरो वनगोचरः॥ दोर्भ्यां नि
ष्पीड्य जग्राह निःशंकं शिवयोगिनं॥ तदंगस्पर्शनादेव स चो निर्धूतकिल्बिषः॥ स ब्रह्मराक्षसो घोरो वि घो ५
षदां स्मृतिमाययौ॥ यथा चिंतामणिं स्पृष्ट्वा लोहः कांचनतां व्रजेत्॥ यथा जांबुनदीं प्राप्य मृत्तिका स्व
र्णतां व्रजेत्॥ यथा मानससमाश्रित्य वायसोपाति हंसतां॥ यथामृतं नरः पीत्वा स घो देवत्वमाप्नुयात्॥ १२
तथैव हि महात्मानो दर्शनस्पर्शनादिभिः॥ सद्यः शुद्धिं समायातः पूर्णानंदो बभूव ह॥ तद्गात्रलग्नसित
भस्मकणानुविद्धो स घो विधूतघनपापतमः स्वभावः॥ संप्राप्य पूर्वभवसंस्मृतिरुग्रकायस्तत्पाद
पद्मयुगुले पतितो वभाषे॥ प्रसीद मे महायोगिन् प्रसीद करुणाकर॥ प्रसीद भवतप्तानां संमानंदामृ
तवारिधे॥ क्वाहं पापमहाघोरः सर्वलोकभयंकरः॥ क्व ते महानुभावस्य दर्शनं करुणात्मनः॥ उद्धरोद्धर
मां घोरपतितं दुःखसागरे॥ तव सन्निधिमात्रेण ममानंदोभिवर्धते॥ १८॥ वामदेव उवाच॥ ॥क

त्वंवनचरोघोरोराक्षसोत्रकिमास्थितः॥ कथमेतांहमहाघोरांकष्टांगतिमवाप्तवान्॥ २१॥ ब्रह्मराक्ष
सउवाच॥ ॥पार्थिवोहमितःपूर्वंपंचविंशतिमेभवे॥ गोप्तायवननराष्ट्रस्यदुर्जयोनामवीर्यवान्॥ सोहं
जगत्सुपापीयान्स्वैरचारीमदोत्कटः॥ दंडधारीदुराचारःप्रजाघ्नोनिर्घृणःसदा॥ पुत्रबंधुकलत्रोपिका
मसक्तोजितेंद्रियः॥ इमांपापीयसींचेष्टांपुनरेकांगतोस्म्यहं॥ प्रसह्यहृतनामन्यांनारीभ्रष्टोकुमनःसदा॥
आहृतासर्वदेशेभ्यो नार्योभ्रत्यैर्मदाज्ञया॥ भुक्त्वांभुक्त्वांपरित्यज्यमेकामेकांदिनेदिने॥ अंतर्गेहेषु
संस्थाप्यपुनरन्याःसमाहिताः॥ एवंस्वराष्ट्रात्परराष्ट्रतश्चदेशांतरग्रामपरवृत्तेभ्यः॥ आहृत्यना
र्योरमितादिनेदिने भुक्त्वापुनःक्वापिनभुज्यतेमया॥ तथान्यैश्चनभुज्यंतेमयाभुक्ताश्चयाःस्त्रियः
अंतर्गेहेषुनिहितास्ताश्चतेवदिवानिशं॥ ब्रह्मविट्क्षत्रशूद्राणांयदानार्योहृतामया॥ ममराज्यस्थित
विप्रासहदूराप्रदंडवत्॥ सभर्तृकाश्चकन्याश्चविधवाश्चरजस्वला॥ आहृत्याहृत्यरमितामयाकाम
हतात्मना॥ त्रिशतंद्विजनारीणांराजस्त्रीणांचतुःशतं॥ षट्शतंवैश्यनारीणांशूद्रस्त्रीणांसहस्रकं॥ २२॥ राम ॥५३
शतंचांडालनारीणांपुलिंदानांसहस्रकं॥ शैलूषाणांपंचशतंरजकीनांचतुःशतं॥ असंख्यावारमु
ख्यानांमयाभुक्तदुरात्मना॥ तथापिममकामस्यनतृप्तिःसमजायत॥ एवंदुर्विषयासक्तोमत्तपानरत

सदा ॥ यौवनेपिमहाघोरारोगाविविधुर्यक्ष्मकादयः ॥ रोगार्दितोनपत्यैश्च शत्रुभिःपरिपीडितः ॥ त्यक्तोमा
त्रैश्चभृत्यैश्चमतोहस्वेनकर्मणा ॥ आपुर्विनश्यत्ययशोविवर्धते भाग्यंक्षयंपापाभिपातिदुर्गतिं ॥ स्व
र्गश्चवंतेपितरःपुरातनाःधर्मव्यपेतस्यनरस्यनिश्चितं ॥ अथाहंपुरुषैर्याम्यैर्नीतोवैवस्वतंक्षयं ॥ क्रु
द्धेनतेननरकेरेतःकुंडेनिपातितः ॥ तत्राहंनरकेघोरेवर्षाणामयुतत्रयं ॥ रेतःपिंडैःपीड्यमानोन्यवसंय
मकिंकरैः ॥ ततःपापावशेषेणपिशाचोनिर्जनेवने ॥ सहस्रशीर्षास्संजातोनित्यंक्षुत्तृस्समाकुलः ॥
पैशाचींगतिमाश्रित्यनीत्वादिव्यंशरच्छतं ॥ द्वितीयेहंभवेजातोरक्षःप्राणिभयंकरं ॥ तृतीयेजगरो
घोरः ॥ चतुर्थेहंभवेवृकः ॥ पंचमेविड्वराहश्चषष्ठेहंकृकलासकः ॥ सप्तमेसारमेयश्चशृगालोऽ
ष्टमेभवे ॥ नवमेगवयोप्तीयोदशमेहंमृगोभवेत् ॥ एकादशेमर्कटश्चगृध्रोहंद्वादशेभवेत् ॥ त्रयो
दशोहंनकुलोवायसश्चचतुर्दशे ॥ अष्टभल्लःपंचदशेषोडशेवनकुक्कुटः ॥ गर्दभोहंसप्तदशेमार्जारो
ष्टादशेभवेत् ॥ एकोनविंशेमंडूकःकूर्मोविंशतिमेभवेत् ॥ एकविंशेभवेन्मत्स्योद्वाविंशेमूषकस्तथा ॥
उलूकोहंत्रयोविंशेचतुर्विंशेवनद्विपः ॥ पंचविंशेभवेचास्मिंजातोहंब्रह्मराक्षसः ॥ क्षुत्परीतोनिरा

102

हारोवसाम्यत्रमहावने॥ इदानीमागतंदृष्ट्वाभवंतंजगद्गुमुघतः॥ त्वदंगास्पर्शमात्रेणप्राप्तःपूर्वभवस्मृतिः॥ ७।
गतजन्मसहस्राणि स्मराम्यघतवंतिके॥ निवेदश्चपरोजातः प्रसन्नंहृदयंमम॥ ईदृशोयंप्रभावस्तेकथंल
ब्धोमहामते॥ तपसाब्रह्मचर्येण किमुतीर्थनिषेवणात्॥ योगेनदेवशक्त्यावामंत्रैर्दानैस्तशक्तिभिः॥ ततो
मेब्रूहि भगवन्त्वामहंशरणंगतः॥५॥ वामदेवउवाच॥ ॥एषमद्गात्रलग्नस्यप्रभावोभस्मनोमहान्॥
यत्संपर्कात्तमोनष्टंतवेषंगतिरुत्तमा॥ कोवेदभस्ममाहात्म्यंमहादेवादृतेपरः॥ दुर्विभाव्यंयथाशंभोर्मा
हात्म्यंभस्मनस्तथा॥ पुराभवाद्याःकश्चिद्ब्राह्मणोधर्मवर्जितः॥ द्राविडेषुस्थितोमूढःकर्मणाशूद्रतांग
तः॥ चौर्यवृत्तिनेष्ठुतिःकोवृषलीरतिलालसः॥ कदाचिज्जारतांप्राप्यशूद्रेणानिहतोनिशि॥ तच्छवस्यबहि
र्ग्रामाक्षिप्तस्यापेतकर्मणः॥ बचारसारमेयांगेभस्मपादोपदृष्ठ॥ भैनरस्तंनरकेघोरेपतितंशिवकिंकरः॥ राम
निन्युर्विमानमारुह्यप्रसह्ययमकिंकरात्॥ शिवदूतान्समभ्येत्ययमोघपपरिपृछ्छवान्॥ महापातककर्त्तारंक
पमेनंजिगीर्षथ॥ अथोचुःशिवदूतास्तेपश्यास्तेरावविग्रहे॥ ललाटवक्षोदोर्मूलान्यंकितान्निसुभस्मना॥ ५८ ॥५४॥
अतएनंसमानेतुमागताःशिववासनात्॥ नास्मिन्निरोधुंशक्तोस्मिमास्त्वत्रतवसंशयः॥ इत्युक्त्वाप्याप्ययम
शंभोर्दूतास्तेब्राह्मणंततः॥ पश्यतांसर्वलोकानांनिन्युलोकमनामयं॥६॥ वामदेवउवाच॥ ॥तस्माद्दशेष

१०३

पापानांसंघःसंत्रोधनंपरं॥ शंभोर्विभूषणंभस्मसततंधार्यतेमया॥ ६९॥ राक्षसउवाच॥ ॥साधुसाधुमहा
योगिन्धन्योस्मितवशासनात्॥ मांविमोचयपुण्यात्मन्घोरादस्मात्कुजन्मनः॥ किंचिदस्तीतिमेभातिम
मपुण्यंपुरातनं॥ अतोहंत्वत्प्रसादेनमुक्तस्यांभवबंधनात्॥ एकस्मैद्विजमुख्यायतस्मिन्पार्थिवजन्म
नि॥ भूमिवृत्तिकरीदत्तासस्याढ्यामवतीमया॥ यमेनापितदेवोक्तंपंचविंशतिमेभवेत्॥ कस्यचिद्योगिनः
संगात्मोक्षसेसंसृतेरिति॥ तं तदघफलितंपुण्यंयत्किंचित्प्राभवार्जितं॥ यतोमेनिर्जनेरण्येसंप्राप्तस्त
वसंगमः॥ अतोमांघोरपाप्मानंसंसरंतंकुजन्मनि॥ समुद्धरमहासिंधोदत्वाभस्मसमंत्रकं॥ कथंधा
र्यमिमंभस्मकोमंत्रःकोविधिःस्मृतः॥ ककालःकश्चिवादेवःसर्वंकथयमेगुरो॥ भवादृशामहात्मानः
सर्वलोकहितेरताः॥ नात्मनोहितमिछंतिकल्पवृक्षसधर्मिणः॥ इत्युक्तस्तेनयोगेशोघोरेणावनचारिणा॥
ऋषभोपिभस्ममाहात्म्यंवर्णयामासतत्वतः॥ ७०॥ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेभस्ममाहात्म्यवर्णनं
नामपंचदशोध्यायः॥ ॥श्रीः॥ ॥वामदेवउवाच॥ ॥पुरामंदरशैलेंद्रेनानाधातुविचित्रिते॥ न
नासिद्धसमाकीर्णेनानाद्रुमलतान्विते॥ कालाग्निरुद्रोभगवान्कदाचिद्दिव्यवंदितः॥ समास्तेसादवि
श्वेशःस्वेच्छयापरमेश्वरः॥ समंतात्समुपातिष्ठन्रुद्राणांशतकोटयः॥ तेषांमध्येसमासीनोदेवदेवस्त्रिलो

(105)

वनः॥३ तत्रागच्छत्सुरश्रेष्ठो सह देवैः पुरंदरः॥ तथाग्निर्वरुणो वायुस्तथा वैश्रवणश्च सः॥ गंधर्वाश्चित्रसेना
द्याः किंनराः समहोरगाः॥ विद्याधराः किंपुरुषाः सिद्धाः साध्याः सगुह्यकाः॥ ब्रह्मर्षयो वसिष्ठाद्या नारदाद्याः
सुरर्षयः॥ पितरश्च महात्मानो दक्षाद्याश्च प्रजेश्वराः॥ उर्वश्याद्याश्चाप्सरसश्चंडिकाद्याश्च मातरः॥ आ
दित्या वसवो दस्त्रौ विश्वेदेवा महौजसः॥ अथान्ये भूतपतयो लोकसंरक्षणे पराः॥ महाकालश्च नंदीच
तथा शंकरपार्श्वगौ॥ वीरभद्रो महातेजाः शंकुकर्णो महाबलः॥ घंटाकर्णश्च भद्रेशो मणिभद्रो वृकोदरः॥ ॥८॥
कुंडोदरश्च विकटो महाकुंभोदरो बली॥ महोदरः कुंडधारः केतुर्भृंगीरिटिस्तथा॥ भूतनाथास्तथान्ये
व मायाकाया महौजसः॥ कृष्णवर्णाश्च सुश्वेताः केचिन्मंडूकसंन्निभाः॥ हरिता धूसरा धूम्राः कब्रु
राः पीतलोहिताः॥ विचित्रवर्णाश्चित्रांगाश्चित्रनीलांबरोत्कराः॥ नानायुधोद्यतकरा नानावाहनभूषणाः॥
केचिद्व्याघ्रमुखाः केचित्सूकरास्या मृगाननाः॥ केचिन्नक्रवदनाः सारमेयामुखाः परे॥ शृगालवदनाव
न्ये उष्ट्राश्ववदनाः परे॥ केचिच्छरभेरुंडसिंहगृध्रोरगाननाः॥ एकहस्ता द्विहस्ताश्च पंचहस्तास्त्वहस्तकाः॥ ॥१५॥ ॥५५॥ राम
अपादा बहुपादाश्च बहुवर्णैककर्णकाः॥ एकनेत्राश्चतुर्नेत्रा दीर्घाः कुब्जवामनाः॥ एकवक्त्राश्च बहुव
क्त्रा बहुवक्त्राश्च निर्मुखाः॥ समंतात्परिवार्येशं भूतनाथमुपासत॥ अथागच्छन्महातेजाः मुनीनां प्र

वरःसुधीः॥ सनत्कुमारो धर्मात्मा तं दृष्ट्वा जगदीश्वरं॥ सदेवदेवं विश्वेशं सूर्यकोटिसमप्रभं॥ महाप्रल
यसंक्षुब्धसप्तार्णवघनस्वनं॥ संवर्त्ताग्निसमायेपजटोपटलशोभितं॥ अक्षीणभालनयनं ज्वाला
म्लानं निजविषा॥ प्रदीप्तखड्गमपिनाशशिखंडेनमंडितं॥ तक्षकं वामकर्णे तु दक्षिणेन च वासुकिं॥ वि
भ्राणकुंडलयुगं रत्ननीलमहाहस्तं॥ नीलग्रीवं महाबाहुं नागहारविराजितं॥ फणिराजपरिभ्राजत्कं
कणांगदमुद्रिकं॥ अनंतफणिसाहस्र्यतूपिरंजितमेखलं॥ व्याघ्रचर्मपरीधानं घंटादर्पणभूषितं॥
कर्कोटकमहापद्मधृतराष्ट्रधनंजयैः॥ कूजनुपुरसंघुष्टपादपद्मविराजितं॥ प्रासतोमरखड्गांग
टंकशूलगदाधरं॥ अप्रधृष्यमनिर्देश्यमचिंत्याकारमीश्वरं॥ रत्नसिंहासनारूढं प्रणनाम महामुनि॥ ५८॥
तं भक्तिभावोच्चलितांतरात्मा संस्तूपगीर्भिः स्तुतिसंयताभिः॥ कृतांजलिः प्रश्रयनम्रकंधरः पप्रच्छ
धर्मानखिलान्शुभप्रदान्॥ यान्यानपृच्छतमुनिस्तांस्तान्धर्मानशेषतः॥ प्रोवाच भगवान्रुद्रो भूयो
मुनिरपृच्छत॥ ५९॥ सनत्कुमारोवाच॥ ॥श्रुतास्ते भगवान्धर्मास्त्वंमुखान्मुक्तिहेतवः॥ येर्युक्ताः
पापमनुजास्तरंति च भवार्णवं॥ अथापरं महाधर्ममल्पायासं महत्फलं॥ ब्रूहि कारुण्यतो मह्यं संसघो
प्रदं नृणां॥ आयासबहुला धर्माः शास्त्रदृष्टाः सहस्रशः॥ सम्यक्संसेविताः कालान्सिद्धिं यच्छंति

वानवा॥३३॥ अतोलोकहितंगुल्यहं भुंक्तेमुक्तेश्चसाधनं॥ धर्मंविज्ञातुमिछामि त्वत्तोहिपरमेश्वर॥३४॥
॥श्रीशंकरउवाच॥ ॥सर्वेषामेवधर्माणां मुत्तरंश्रुतिनोदितं॥ रहस्यंसर्वजंतूनां त्रिपुंड्रस्यचधा
रणं॥३५॥ सनत्कुमारउवाच॥ ॥त्रिपुंड्रस्यविधिंब्रूहि भगवन्जगतांपते॥ तत्वतोज्ञातुमिछामि
त्वत्प्रसान्महेश्वर॥ कैस्तिस्थानानि किंद्रव्यं काशक्तिः कावदेवता॥ किंप्रमाणंचकः कर्त्ता केमंत्रास्त
स्यकिंफलं॥ एतत्सर्वमशेषेण त्रिपुंड्रस्यचलक्षणं॥ ब्रूहिमेजगतांनाथ लोकानांहितकाम्यया॥
॥श्रीमहारुद्रउवाच॥३६॥ आग्नेयमुच्यतेभस्मदग्धगोमयसंभवं॥ तदेवद्रव्यमित्युक्तं त्रिपुंड्रस्य
महामुने॥ सद्योदिति ब्रह्ममयेमंत्रैश्चैवचपंचभिः॥ परिगृह्याग्निरित्याद्यैमंत्रैर्भस्माभिमंत्रये
त्॥ मानस्तोकेतिसंघर्षेछिरोलिंपेत्र्यंबकैः॥ त्रियायुषादिभिर्मंत्रैर्ललाटोरुभुजद्वये॥ स्कंधेचले
पयेद्भस्मसजलंमंत्रभावितं तिस्रोरेखाःसवंगुष्ठल्योमध्येनप्रतिलोमतः॥ अंगुष्ठेनकृतारेखा त्रिपुं
ड्रस्यचधीमतः॥ तिसृणामपिरेखाणां प्रत्येकंनवदेवताः॥ अकारोगार्हपत्याग्निर्भूर्लोकोरजोगु
णः॥ ऋग्वेदश्चक्रियाशक्तिः प्रातःसवनमेवच॥ महादेवस्तुरेखायाः प्रथमायाश्चदेवताः॥ उ
कारोदक्षिणाग्निश्च नभःसत्वंयजुस्तथा॥ मध्यंदिनंतुसवनमिछाशक्तिस्तथात्मको॥ महेश्वर

राम
॥५६॥

रस्तुरेखायाः द्वितीयायाश्च देवता ॥ मकाराहवनीयोच परमात्मातमोदिवो ॥ ज्ञानशक्तिः सामवेदस्तृतीयं
सवनं मतं ॥ शिवश्चेति तृतीयायां रेखायाश्चैव देवता ॥ एतन्नित्यं नमस्कृत्य त्रिपुंड्रं धारयेच्छुचिः ॥ महेश्व
रव्रतमिदं सर्वलोकेषु कीर्तितं ॥ मुक्तिकामैर्नरैः सेव्यं पुनस्तेषां न संभवः ॥ त्रिपुंड्रं कुरुते यस्तु भस्मना वि
धिपूर्वकं ॥ ब्रह्मचारी वानस्थो वा गृहस्थोथवा यतिः ॥ महापातकसंघातैर्मुच्यते चोपपातकैः ॥ तथा
न्ये क्षत्रविट्शूद्रस्त्रीगोहत्यादिपातकैः ॥ वीरहत्याश्वहत्याभ्यां मुच्यते नात्र संशयः ॥ अमंत्रेणापि य
कुर्याज्ज्ञात्वा च महिमोन्नतिः ॥ त्रिपुंड्रंभालफलकेर मुच्यते सर्वपातकैः ॥ परद्रव्यापहरणं गृहदारादि
कर्म च ॥ असत्यं वाक्यं पैशुन्यं पारुष्यं वेदविक्रियं ॥ कूटसाक्ष्यं व्रतत्यागः कैतवं नीचसेवनं ॥ गोभू
रण्यमहिषीतिलकंफलवाससां ॥ अन्नधान्यजलादीनां नीचेभ्यश्च प्रतिग्रहं ॥ दासीवेश्याभुजं
गीषु वृषलीषु नदीषु च ॥ रजस्वलासु कन्यासु विधवासु च मैथुनं ॥ मांसचर्मरसादीनां लवणस्य च
विक्रयः ॥ एवमादीन्यसंख्यानि पापानि विधा । विधानि च ॥ सद्य एव विनश्यंति त्रिपुंड्रस्य च धारणात् ॥
शिवद्रव्यापहरणं शिवनिंदा च कुत्रचित् ॥ निंचा । दा च शिवभक्तानां प्रायश्चित्तैर्न शुध्यति ॥ रुद्राक्ष

108

न्यस्यगात्रेषुललाटेतुत्रिपुंड्रकं॥ सचांडालोपिसंपूज्यः सर्ववर्णोत्तमोत्तमः॥ यानितीर्थानिलोकेस्मिन्गं
गाद्याःसरितस्तथा॥ स्नातोभवतिसर्वत्रललाटेयस्त्रिपुंड्रधृक्॥ सप्तकोटिमहामंत्राःपंचाक्षरपुरःसराः॥ ॥५९॥
तथान्यकोटिकोमंत्राःशैवाःकैवल्यहेतवः॥ तेसर्वेतेनजप्तास्युर्योबिभर्त्तित्रिपुं६५ड्रकं॥ सहस्रंपू
र्वजातानांसहस्रंवर्जनिष्पता॥ स्ववंशजातानांज्ञातीनामुद्धरेद्यस्त्रिपुंड्रधृक्॥ इहभुक्त्वाखिलान्भो
गान्दीर्घायुर्व्याधिवर्जितः॥ जीवितांतेचमरणंसुखेनैवप्रपद्यते॥ अष्टैश्वर्यगुणोपेतंप्राप्यदिव्यंव
पुःशिवं॥ दिव्यंविमानमारुह्यदिवंत्रिदशसेवितं॥ विद्याधराणांसिद्धानांगंधर्वाणांमहौजसां॥ इंद्रा
लोकपालानांलोकेषुचयथाक्रमं॥ भुक्त्वाभोगान्सुविपुलान्प्रजेशानांपदेषुच॥ ब्रह्मणःपदमासाद्य
पत्रकल्पशतंरमेत॥ विष्णुलोकेचरमतेयावद्ब्रह्मशतात्ययः॥ शिवलोकेततःप्राप्यरमतेकालमक्षयं॥ ॥५८॥ राम
शिवःसायुज्यमाप्नोतिसनभूयोपिजायते॥ सर्वोपनिषदांसारंसमालोक्यमुमुक्षुः॥ इदमेवहिनि
पीतंपरंश्रेयस्त्रिपुंड्रकं॥ अतस्त्रिपुंड्रमाहात्म्यंसमासात्कथितंमया॥ रहस्यंसर्वजंतूनांगोपनीयमिदं ॥५०
त्वया॥ इत्युक्त्वाभगवान्रुद्रस्तत्रैवांतरधीयत॥ सनत्कुमारोपिमुनिर्ब्रह्मलोकंजगामसः॥ ॥वामदेव
उवाच॥६॥ तवापिभस्मसंसर्गात्संजाताविमलामतिः॥ त्वमपिश्रद्धयापुण्यंधारयस्वत्रिपुंड्रकं॥१

॥सूतउवाच॥ ॥इत्युक्त्वावामदेवस्तुशिवयोगीमहातपाः॥ अभिमंत्र्यददौभस्मघोरायब्रह्मराक्षसे॥ तेन
सोभालफलकेतिर्यक्चक्रेत्रिपुंड्रकं॥ ब्रह्मराक्षसतांसद्योजहौतस्यानुभावतः॥ सबभौसूर्यसंकाशोते
जोमंडलभास्करः॥ दिव्यावयवरूपश्री दिव्यमाल्यांबरोज्वलः॥ भक्त्याप्रदक्षिणीकृत्यतंगुरुंशिवयोगिनं॥ दि
व्यंविमानमारुह्यपुण्यलोकानजगामसः॥ वामदेवोमहायोगीदत्वातस्यपरांगतिं॥ चचारलोकेगूढात्मासा
क्षादिवशिवःस्वयं॥ यएतद्भस्ममाहात्म्यंत्रिपुंड्रंशृणुयान्नरः॥ श्रावयेद्वापठेद्वापिसयातिपरमांगतिं॥ कृधयति
शिवकीर्तिंसंस्तते मुक्तिदंतंप्रणमतिशिवयोगी ध्येयमर्त्यांघ्रिपद्मं॥ रचयतिसितभस्मोद्भासिभालेत्रिपुंड्रं
पुनरिहजननत्यागर्त्तंवासंजघन्यं॥७१॥ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेभस्ममाहात्म्यकथनंनामषोडशो
ध्यायः॥ ॥श्रीः॥ ॥ऋषयउवाच॥ ॥वेदवेदांगतत्वज्ञैर्गुरुभिर्ब्रह्मवादिभिः॥ नृणांकृतोपदेशा
नांसिद्धिर्भवतिकीदृशी॥१॥ सूतउवाच॥ श्रद्धेयंसर्वधर्मस्यमातेवहितकारिणी॥ श्रद्धयैवनृणांसिद्धिर्जाय
तेलोकयोर्द्वयोः॥ श्रद्धयाभजतःपुंसःशिलापिफलदायिनी॥ मूर्खोपिपूजितोभक्त्यागुरुर्भवतिपूजितः॥ श्र
द्धयाभजतोमंत्रःस्वबद्धोपिफलप्रदः॥ श्रद्धयापूजितादेवानीचस्यापिफलप्रदाः॥ अश्रद्धयाकृतापूजादानय
ज्ञतपोव्रतं॥ सर्वंनिःफलतांयातिपुष्पंवंध्यतरोरिव॥ सर्वत्रश्रद्धयायुक्तःश्रद्धाहीनोतिवंचकः॥ परमार्थपरि
भ्रष्टःसंसृतेर्नहिमुच्यते॥ मंत्रेतीर्थेद्विजेदेवेदैवज्ञेभेषजेगुरौतथा॥ यादृशीभावनायस्यसिद्धिर्भवतितादृशी॥७॥

110

अतोभावमयंविश्वंपुण्यंपापंचभावतः॥ तेउभेभावहीनस्यनभवेतांकदाचन॥ अत्रेदंपरमाश्चर्यमाख्यानम
नुवर्ण्यते॥ अश्रद्धासर्वमर्त्यानांनाशमाप्नोतिनिश्चितं॥ आसीत्पांचालराजस्यसिंहकेतुरितिश्रुतः॥ पुत्रःसर्वगु
णोपेतःशक्रस्येवधनंजयः॥ सएकदाकतिपयैःभटैर्गुप्तोमहाबलः॥ जगाममृगयाहेतोर्बहुसत्वान्वितंवनं॥ ॥११॥
तद्भृत्यःशबरःकश्चिद्विचरन्मृगयावने॥ ददर्शजीर्णंस्फुटितंपतितंदेवतालयं॥ तत्रापश्यच्छिन्नपीठंपतितंस्थंडि
लोपरि॥ शिवलिंगंसुसूक्ष्मंमूर्त्तंभाग्यमिवात्मनः॥ ससमादायवेगेनपूर्वकर्मप्रणोदितः॥ तस्मैसंदर्शया
मासराजपुत्रायधीमते॥ पश्यैतद्रुचिरंलिंगंमयादृष्टमिदंप्रभो॥ तदेतत्पूजयिष्यामियथाविभवमादरा
त्॥ अस्यपूजाविधिंब्रूहियथादेवोमहेश्वरः॥ अमंत्रकैःपरंनीचैःप्रीतोभवतिशंकरः॥ इतितेननिषादे
नपृष्टःपार्थिवनंदनः॥ प्रत्युवाचमहस्येनपरिहासविशारदः॥ संकल्पेनसदाकुर्यात्तदभिषेकंनवांभ
सा॥ उपवेश्यासनेशुद्धेशुभगंधाक्षतैर्नवैः॥ वनैःपत्रैश्चपुष्पैश्चधूपदीपैःप्रपूजयेत्॥ चिताभस्मोप
हारंचप्रथमंपरिकल्पयेत्॥ आत्मोपयोग्येनान्नेननैवेद्यंकल्पयेत्ततः॥ पुनश्चधूपदीपादीन्उपचारान्प्र राम
कल्पयेत्॥ नृत्यवादित्रगीतादीन्यथावत्परिकल्पयेत्॥ नमस्कृत्वाथविधिनाप्रसादंधारयेत्ततः॥ एष ॥५८
साधारणःप्रोक्तःशिवपूजाविधिस्तव॥ चिताभस्मोपहारेणसघःस्तुष्यतिशंकरः॥२२॥ सूतउवाच॥ ॥
सचस्वभवंप्राप्यलिंगमूर्त्तिमहेश्वरं॥ प्रत्यहंपूजयामासचिताभस्मोपहारकृत्॥ यच्चात्मनःप्रियंवस्तु

गंधपुष्पाक्षतादिकं।। नैवेद्यं शंभवे नित्यमुपायुंक्त ततः स्वयं।। एवं महेश्वरं भक्त्या सहपत्न्याभ्यपूज
यत्।। एवं च सुखमाराध्य निनायकतिचित्समाः।। एकदा शिवपूजायां प्रवृत्तः शांबरोत्तमः।। न ददर्श चि
ताभस्म पात्रे पूरितमण्वपि।। अथासौ त्वरितो गेहमन्वेष्टुं परितोऽभ्रमत्।। न लब्धवान्स चिताभस्म भ्रां
तोमगृहात्पुनः।। अथाहूय सपत्नीं च शांबरो वाक्यमब्रवीत्।। न लब्धं मे चिताभस्म किं करोमि वद प्रिये।। २८
शिवपूजांतरायो मे जातो घसमम पाप्मनः।। पूजां विना क्षणमपि नाहं जीवितुमुत्सहे।। उपायं नात्र पश्या
मि पूजोपकरणे हते।। न गुरोश्च विहन्येत शासनं सकलार्थदं।। इत्येवं व्याकुलं दृष्ट्वा भर्तारं शां
बरांगना।। प्रत्यभाषत मा भैषीस्त्वमुपायं वदामि ते।। इदमेव गृहं दग्ध्वा बहुकाष्ठोपबृंहितं।। अहम
ग्निं प्रवेक्ष्यामि चिताभस्म भवेत्ततः।। ३०।। शांबर उवाच।। ।। धर्मार्थकाममोक्षाणां देहः परमसाध
नं।। कथं त्यजसि तद्देहं सुखार्थं नवयौवनं।। अधुना त्वनपत्या त्वमभुक्तविषयः सवा।। भोगयोग्यमि
दं देहं कथं दग्धुमिहेच्छसि।। ३१।। शांबर्युवाच।। ।। एतावदेव साफल्यं जीवितस्य महात्मनः।। परार्थे यस्त्य
जेत्प्राणान्शिवार्थे किमुतच्छिवं।। किं न तप्तं तपो घोरं किं वा जप्तं त्वया पुनः।। किं वार्चनं पुरा शंभोर्जन्मां
तरशतेष्वपि।। किं वा पुण्यं मम पितुः किं वा मातुः कृतार्थदा।। यच्छिवार्थे समिद्धेग्नौ त्यजाम्येतत्कलेव

वरं॥ इथं स्थिरां मतिं कृत्वा तस्याभक्तिभ्रुतां करे॥ तथेति दृढसंकल्पः शंबरः प्रतिपद्य च॥ सा पश्चात्तारमनु
साप्यस्नाता शुचिरलंकृता॥ गृहमुद्दीप्य तं वह्निं भक्त्या चक्रे प्रदक्षिणं॥ नमस्कृत्वात्मगुरवे ध्यात्वा
हृदि सदाशिवं॥ अग्निप्रवेशाभिमुखी कृतांजलिरिदं जगौ॥ ॥ शंबर्युवाच॥ ॥पुष्पाणि संतु मम
मदैवसदेंद्रियाणि धूपोगरुर्वपुरिदं हृदयं प्रदीपः॥ प्राणा हवींषि करणानि नवाक्षताश्च पूजाफल
ञ्च जनु सांप्रतमेष जीवः॥ वांछामि नाहमपि संरसाधिपत्यं नेष्ये पुरंदरपदं न पदं विधातुः॥ भूयो भ
वाभिपदि जन्मनि जन्मनि स्यात्वत्पादपंकजलःसन्मकरंदभृंगी॥ जन्मानि संतु मम देव शताधिका
निमायान मे विशातु चित्तमबोधहेतुः॥ किं विलक्षणा धर्मपि ते चरणारविंद ध्याने स्तु मे हृदयमीशान
मोनमस्ते॥ इति प्रसाद्य देवेशं शंबरी दृढनिश्चया॥ विवेशाज्वलितं वह्निं भस्मसादभवत्क्षणात्॥ शं
बरोपि च तद्भस्म यत्नेन परिसंचयत्॥ चक्रे दग्धगृहोपांते शिवपूजां समासतः॥ अथ संस्मार पूजां
ते प्रसाद्य हरणोन्मुखी॥ दयितां नित्यमायातीं प्रांजलिं विनयान्वितां॥ स्मृतमात्रां तदापश्यदागतां
पृष्ठतः प्रियां॥ पूर्वेणावयवेनैव भक्तिनम्रां शु विस्मितां॥ तां वीक्ष्य शंबरः पत्नीं प्रांजलिं पूर्ववत्स्थितः॥
भस्मावशेषं च गृहं यथापूर्वमिव स्थितं॥ किं मयस्वप्न आहोस्वि किं वा मायाभ्रमालिका॥ इति विस्म

यसंभ्रांतस्तां वधूं पर्यपृच्छत ॥ ५० ॥ शांबर उवाच ॥ ॥ अयि प्रिये कथं प्राप्ता भस्मीभूतोसि पावके ॥
दग्धं तु भवनं भूयः कथं पर्ववदास्थितं ॥ ५१ ॥ शांबर्युवाच ॥ ॥ यदाग्रहं समुद्दीप्य प्रविष्टाहं हुताशने ॥
तदात्मानं न जानामि न पश्यामि च पावकं ॥ न तापलेशोप्यासीन्मे प्रविष्टाया यथामृतं ॥ सुसुप्तेव क्ष-
णार्धं प्रबुद्धास्मि क्षणात्पुनः ॥ तावद्भवनमद्राक्षं न दग्धमिव सुस्थितं ॥ अधुना देव पञांते प्रसादं
लब्धुमागतौ ॥ एवं परस्परं प्रेम्णा दंपत्योर्भाषमाणयोः ॥ प्रादुरासत्तयोरग्रे विमानं दिव्यमद्भुतं ॥ तस्मि-
न्विमाने तदा तत्र चंद्रभासुरे चत्वार ईशानुचराः पुरस्थिताः ॥ हस्ते गृहीत्वाथ निषाददंपती आरोपयामासुर-
मुक्तविग्रहौ ॥ तयोर्निषाददंपत्योस्तत्क्षणाद्देवतद्वपुः ॥ शिवदूतकरस्पर्शात्तत्सारूप्यमवापह ॥ एवं तौ
शिवमाराध्य भक्त्या शांबरदंपती ॥ शिवलोकं समासाद्य परमानंदमापतुः ॥ तस्माच्छ्रेष्ठेषु सर्वेषु विधे-
यापुण्यकर्मसु ॥ नीचोपि शांबरः प्राप श्रद्धया योगिनां गतिं ॥ किं जन्मना कुलकवर्णजनोत्तमेन किं
विघयाश्रुतिपुराणविचारवत्या ॥ यस्यास्ति चेतसि सदा परमेश्वरे भक्तिः कोन्यस्ततस्त्रिभुवने पुरुषो-
स्ति धन्यः ॥ ६० ॥ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे शिवभक्तिमाहात्म्यं नाम सप्तदशोध्यायः ॥ ॥
॥ श्रीः ॥ ॥ अथ रुद्राक्षमाहात्म्यं वर्णयामि समासतः ॥ सर्वपापक्षयकरं पठतां शृण्वतामपि ॥ १ ॥

अभक्तोवापिभक्तोवानीचोनीचतरोपिवा॥ रुद्राक्षान्धारयेद्यस्तुमुच्यतेसर्वपातकैः॥ रुद्राक्षधारणंवैनपुण्येनसदृशंभवेत॥ महाव्रतमिदंप्राहुर्मुनयस्तत्वदर्शिनः॥ सहस्त्रंधारयेद्यस्तुरुद्राक्षाणांधृतव्रतः॥ तंनमंतिसुराःसर्वेयथारुद्रस्तथैवसः॥ अभावेतुसहस्त्रस्यबाह्वोःषोडशषोडश॥ एकंशिखायांकरयोर्द्वादशद्वादशैवच॥ द्वात्रिंशत्कंठदेशेतुचत्वारिंशच्चमस्तके॥ एकैकंकर्णयोःषट्षड्वक्षस्यष्टोत्तरंशतं॥ योधारयतिरुद्राक्षान्रुद्रवत्सोपिदृश्यते॥ मुक्ताप्रवालस्फटिकैरौप्यवैडूर्यकांचनैः॥ समेतान्धारयेद्यस्तुरुद्राक्षान्सशिवोभवेत॥ केवलानपिरुद्राक्षान्मनालब्धान्बिभर्तियः॥ तंनस्पृशंतिपापानितमांसीवविभावसुं॥ रुद्राक्षमालयाजप्तोमंत्रोनंतफलप्रदः॥ रुद्राक्षंमस्तकेकृत्वाजपेच्चसुसमाहितः॥ अरुद्राक्षोजपत्तुसोतावन्मात्रफलप्रदः॥ यस्यांगेनास्तिरुद्राक्षएकोपिबहुपुण्यदः॥ तस्यजन्मनिरर्थस्यात्रिपुंड्ररहितंयदि॥ रुद्राक्षंमस्तकेकृत्वाशिरःस्नानंकरोतियः॥ गंगास्नानफलंतस्यजायतेनात्रसंशयः॥ रुद्राक्षंपूजयेद्यस्तुविनातोयाभिषेचनं॥ तत्फलंलिंगपूजायास्तदवाप्नोतिनिश्चितं॥ एकवक्त्राःपंचवक्त्राएकादशमुखाःपरे॥ चतुर्दशमुखाःकेचिद्रुद्राक्षालोकपूजिताः॥ भक्त्यासंपूजितोनित्यंरुद्राक्षःशंकरात्मकः॥ दरिद्रंनचरंकुर्यात

राम
॥६॥

115

राजराजसमश्रियं॥ अत्रेदं पुण्यमाख्यानं वर्णयामि समासतः॥ महापापक्षयकरं श्रवणात्की
र्त्तनादपि॥ राजा काश्मीरदेशस्य भद्रसेन इति श्रुतः॥ तस्य पुत्रोप्यभूद्धीमान्सुधर्मा नाम वीर्यवान्॥ ।१०॥
तस्यामात्यसुतो नाम तारकः सोपि सद्गुणः॥ बभूव राजपुत्रस्य सखा परमशोभनः॥ तावुभौ पर
मस्निग्धौ कुमारौ रूपसुंदरौ॥ विद्याभ्यासपरौ बाल्ये सह क्रीडां प्रचक्रतुः॥ तौ सदा सर्वगात्रेषु रु
द्राक्षकृतभूषणौ॥ हेमरत्नमयं त्यक्त्वा रुद्राक्षान्दधतुश्च तौ॥ रुद्राक्षमालिनौ नित्यं रुद्राक्षकरकंक [illegible]
णौ॥ रुद्राक्षकंठाभरणौ कृतरुद्राक्षकुंडलौ॥ रुद्राक्षहारकेयूरकुंडलादिविभूषणौ॥ हेमनारा
नाद्यलंकारं लोष्ठपाषाणवद्दृशितौ॥ बोध्यमानावपि सदा रुद्राक्षान्नैव मुंचतः॥ तस्य काश्मीररा
जस्य गृहं प्राप्तो यदृच्छया॥ पाराशरो मुनिवरः साक्षादिव पितामहः॥ तमर्चयित्वा विधिवद्राजा ध
र्मभृतां वरः॥ पप्रच्छ सुखमासीनं त्रिलोकज्ञं महामुनिं॥ ॥राजोवाच॥ भगवन्नेष पुत्रो मे सोपि
मंत्रीसुतश्च मे॥ रुद्राक्षधारिणौ नित्यं रत्नाभरणनिस्पृहौ॥ नास्यमानावपि जनै रत्नाकल्पप
रिग्रहे॥ विलंघितास्मद्वचनौ रुद्राक्षेष्वेव तत्परौ॥ नोपदिष्टाविमौ बालौ कदाचित्केनचित्क्वचित् ॥२०॥
एषा स्वाभाविकी वृत्तिः कथमासीत्कुमारयोः॥ ॥पराशर उवाच॥ ॥शृणु राजन्प्रवक्ष्यामि

116

पुत्रस्य तव धीमतः॥ तथा त्वं त्रिपुत्रस्य वृत्तिं विस्मयदायकां॥ नंदिग्रामे पुरा कोचिन्महानंदेति विश्रु
ता॥ वेश्यैव वारवनिता शृंगारललिताकृतिः॥ छत्रं पूर्णेंदुसंकाशं यानं स्वर्णविभूषणं॥ चमराणि
सुदंडानि पादुके च हिरण्मये॥ अंबराणि विचित्राणि महार्हाणि कनंति च॥ चंद्ररश्मिनिभाः शय्याः प
र्यंकाश्च हिरण्मयाः॥ गावो महिष्यश्चरा तत्रो दास्यश्च बहुसंमताः॥ सर्वाभरणदीप्तांगो दासाश्च ब
लवत्तराः॥ भूषणानि पराध्यानि नवरत्नोज्ज्वलानि च॥ गंधकुसुमकस्तूरीकर्पूरागरुलेपनं॥ चित्रमा
ल्यानुलेपश्चावतंसो मृषभूषणं॥ नानाचित्रवितानाढ्यं नानाधान्यमयं गृहं॥ वज्ररत्नसहस्राढ्यं
कोटिसंख्याधिकं धनं॥ एवं विभवसंपन्ना सा वेश्या नाट्यमध्यगा॥ रुद्राक्षैर्भूषयित्वैकं मर्कटं
चैव कुक्कुटं॥ करतालैश्च गीतैश्च सदा नर्त्तयति द्वयं॥ पुनश्च विहसत्युच्चैः सखीभिः परिवारिता॥ ॥ राम।
रुद्राक्षैः कृतकेयूरकर्णाभरणकुंडलः॥ मर्कटः शिक्षया तस्याः पुरो नृत्यति बालवत्॥ शिखाग्र ॥६१॥
बद्धरुद्राक्षः कुक्कुटः कपिना सह॥ चिरं नृत्यति नृत्यंतः पश्यतां चित्तमाहरत्॥ एकदा भवनं तस्याः
कश्चिद्वैश्यः शिवव्रती॥ आजगाम सरुद्राक्षः त्रिपुंड्रोटिलकः कृती॥ स बिभ्रद्भस्मविशदप्रकोष्ठे
करकंकणं॥ महारत्नपरिस्तीर्णं ज्वलिततरुणार्कवत्॥ तमागतं सा गणिका संपूज्य परया मुदा॥

तत्रकोषेगतंवीक्ष्यकंकणंव्याहविस्मिता॥ मेहारत्नमयंदिव्यंकंकणंत्वत्करेस्थितं॥ मनोहरतिमेसाधु
दिव्यस्त्रीभूषणोचितं॥ इतितांनवरत्नाघेस्पृहांकंकणभूषणे॥ वीक्ष्योदारमतिर्वैश्यःसस्मितंसम
भाषत॥ अस्मिन्रत्नवरेदिव्येयदितेसस्पृहंमनः॥ त्वमेवधत्स्वसुप्रीतामौल्यमस्यददासिकिं॥[illegible]॥
वारवतिनोवाच॥ ॥वयंकुबेरचारिण्योवेश्यास्तुनपतिव्रतः॥ अस्मत्कुलोचितोधर्मोव्यभिचारो
नसंशयः॥ यद्येतद्रत्नखचितंददासिकरभूषणं॥ दिनत्रयमहोरात्रंतवपत्नीभवाम्यहं॥ ॥वै
श्यउवाच॥ ॥तथास्तुयदितेसत्यंवचनंवीरवल्लभे॥ ददामिरत्नवलयंत्रिरात्रंभवमेवधूः॥ एत
स्मिन्व्यवहारेतुप्रमाणंशशिभास्करौ॥ त्रिरात्रंसत्यमित्युक्त्वाहृदयंमेस्पृशात्प्रिये॥ ॥महानंदो
वाच॥ ॥दिनत्रयमहोरात्रंपत्नीभूत्वातवप्रभो॥ सहधर्मंचरामीतिसातंहृदयमस्पृशत्॥ अ
थतस्यैहवैश्यस्तुप्रददौरत्नकंकणं॥ लिंगंरत्नमयंतस्यहस्तेदत्त्वेदमब्रवीत्॥ इदंरत्नमयंलिंगं
शैवंमत्प्राणसंनिभं॥ रमणीयंत्वयाकांतेतस्यहानिर्मृतिर्मम॥ सातेनसंगतारात्रौवैश्येनवि
टधर्मिणा॥ सुखंसुष्वापपर्यंकेमृदुतल्पोपशोभिते॥ ततोनिशीथसमयेनाट्यमंडपिकांतरे॥

118

अकस्मादुत्थितोवह्निस्तमेवसहसावृणोत्॥५४॥ मंडपेदह्यमानेतुसहंसोप्यायसंप्नमात्॥ मर्कटंमोच
यामाससावैश्यातत्रबंधनात्॥ मर्कटोपिमुक्तबंधस्तुकुर्कुरेनमहात्मना॥ भीतोदूरंविदुद्रावविधू
याग्निकणान्बहून्॥ स्तंभेनसहनिर्दग्धंलिंगंवैश्यपतिस्तदा॥ स्वयमप्याप्तनिर्वेदोमरणायम
तिंदधे॥ निर्विण्णोनितरांखेदोवैश्यपास्तामाहदुःखिता॥ शिवलिंगेतुनिर्भिन्नेनाहंजीवितुमत्सहे॥ ५८॥
चितांकारयतेभद्रंतवभर्त्रेबलाधिकैः॥ शिवेमनःसमावेश्यप्रवेक्ष्यामिहुताशनं॥ यदिब्रह्मेंद्र
विष्ण्वाद्यावारयेयुःसमेत्यमां॥ तथाप्यस्मिन्क्षणेवीरःप्रवेक्ष्यामिहुताशनं॥ तमेवंदृढनिर्बंधंसा
विज्ञायसुदुःखिता॥ स्वभृत्यैःकारयामासचितांस्वभवनाद्बहिः॥ ततस्सवैश्यःशिवभक्तिपूत
प्रदक्षिणीकृत्यसमिद्धमग्निं॥ विवेशपश्यत्सुनरेषुधीरःसाचानुतापयुवतीप्रपेदे॥ अथसा
दुःखितानारीस्मृत्वाधर्मंसुनिर्मलं॥ सर्वान्बंधुजनान्वीक्ष्यबभाषेकरुणंवचः॥ रत्नकंकण — राम
मादायमयासत्यमुदाहृतं॥ दिनत्रयमहंपत्नीवैश्यस्यास्यामुष्यसंमता॥ कर्मणामत्कृतेनायंम ॥६२॥
तोवैश्यःशिवव्रती॥ तस्मादहंप्रवेक्ष्यामिसहानेनहुताशनं॥ सधर्मचारिणीत्युक्तंसत्यंतद्धि
ननश्यति॥ सत्येनतृप्तिमायांतिदेवास्त्रिभुवनेश्वराः॥ सत्यान्नपःपरोधर्मःसत्येसर्वंप्रतिष्ठितं॥

सत्येनस्वर्गमोक्षंचनासत्येनपुरामतिः॥ तस्मात्सत्यंसमाश्रित्यप्रवेक्ष्यामिहुताशनं॥ इतिसादृढनि
र्बंधा वार्यमाणापिवंधुभिः॥ सत्यलोपभयान्नारीप्राणांस्त्यक्तुमनोदधे॥ सर्वस्वंद्विजमुख्येभ्योदत्वा
ध्यात्वासदाशिवं॥ तमग्निंत्रिःपरिक्रम्यप्रवेश्याभिमुखीस्तथा॥ तापतंतीसमिद्धेग्नौस्वपादार्पितमा
नसा॥ धारयामासविश्वात्माप्रादुर्भूतःसदाशिवः॥ सातंविलोक्याखिलदेवदेवत्रिलोचनंचंद्रकला
वतंसं॥ नूनांकसूर्यानलकोटिभासंस्तत्थेवसीलेवतथेवतस्थौ॥ तांविह्वलांभयत्रस्तांवेपमानांन
डीकृतां॥ समाश्वास्यगळद्बाष्पांकरेगृह्यसोब्रवीद्वच॥ सत्यंधर्मंचधैर्यंचभक्तिंचमयिनिश्चलां॥ परी
क्षितुंत्वत्सकाशंवैनृपोभूत्वाहमागतः॥ मयाचाग्निंसमुत्पाद्यदग्धंत्वन्नाथमंडपं॥ दग्धंकृत्वारत्नलिं
गंप्रविष्टोस्मिहुताशनं॥ वैश्याःकैतवकारिण्यास्वैरिण्योजनवंचकाः॥ सात्वंसत्यमनुसृत्यप्रविष्टाग्निं
मयासह॥ अतस्तेसंप्रदास्यामिभोगांस्त्रिदशदुर्लभान्॥ आयुश्चपरमंदीर्घमारोग्यंचप्रजोन्नतिं॥ यद्यदि
दिच्छसिसुश्रोणीतत्तद्देवददामिते॥ इतिवदतिगौरीशेसावैश्याप्रत्यभाषत॥ नमेवांछास्तिभोगेषु
भूमौस्वर्गेरसातले॥ तवपादांबुजस्पर्शादन्यत्किंचिन्नकामये॥ एतेभ्यस्त्वाश्चदाराश्चपुत्राश्चममबांध
वाः॥ सर्वेत्वदर्चनपरास्त्वयिसन्यस्तवृत्तयः॥ सर्वानेतान्मयासार्धंनीत्वातवपरंपदं॥ पुनर्जन्मभयं

घोरं शिवे नयनमोस्तुते॥ तथेतितस्यावचनं प्रतिवंघमहेश्वरः॥ तान्सर्वांश्च तयासार्धं निनायस्वपदंपरं॥
॥ पराशरउवाच॥८२॥ नाघमंडपिकादारे यौ दूरं विरतौपुरा॥ तत्रावशिष्टौ तावेव कुर्कुटोमर्कटस्तथा॥ ८३॥
कालेननिधनं प्राप्यस तस्यानाघमर्कटः॥ असौतवकुमारोभूत कुर्कुटो मंत्रिणःसुतः॥ रुद्राक्षधारि
णौभूतां पुण्यात्सर्वपापवर्जितौ॥ कुले महतिसंजातौ वर्त्तेते बालकाविमौ॥ पूर्वाभ्यासेन रुद्राक्षान्
दधतौ भद्रमानसौ॥ अस्मिन्जन्मनि तल्लोके शिवंसंपूज्यपस्यतः॥ एषाप्रवृत्तिस्त्वनयोबालकयोःसमुप
हृतः॥ तथाच शिवभक्ताश्च किमन्यद्द्रष्टुमिच्छसि॥ ८४॥ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडे रुद्राक्षमहिमा
नामाष्टादशोध्यायः॥ ॥श्री॥ ॥सूतउवाच॥ ॥एवंब्रह्मर्षिणाप्रोक्तं वाक्यंपीयूषसन्निभं॥
आकर्ण्यमुदितोराजाप्रांजलिःपुनरब्रवीत्॥ १॥ राजोवाच॥ ॥अहोसत्संगतिःपुंसामशेषार्थ
प्रसाधना॥ कामधेनुरिवाभीष्टदोग्घीसर्वजनस्यहि॥ अथसर्वतमोनष्टं ज्ञानदृष्टिःप्रकाशिता॥ राम
तवदर्शनमात्रेणप्राप्तोहममरोत्तमः॥ श्रुतंचएवंचरितं बालयोःसम्यगेतयोः॥ भविष्यमपिपृच्छामि ॥३॥
मत्पूर्वाचरणान्मुने॥ अस्यायुःकतिवर्षाणिभाग्यंचवदकीदृशं॥ विद्याकीर्तिश्चश्रद्धाचभक्तिश्चवद
कीदृशी॥ एतत्सर्वमशेषेणत्वंमुनेवक्तुमर्हसि॥ तवपृष्टोस्मिशिष्योस्मि शरणं त्वागतोस्म्यहं॥ ६॥

॥पाराशर उवाच॥ ॥अत्रानुवाच्यं यत्किंचित्कथं शक्नोमि शंसितुं॥ यच्छ्रुत्वा धृतिमंतोपि विषादं प्राप्नुयु
र्जनाः॥ अथापि निश्चयो बुद्धौ केन भावेन परिपृच्छसि॥ अवाच्यमपि वक्ष्यामि तव स्नेहान्महीपते॥ अमुष्य
त्वत्कुमारस्य वर्षाणि द्वादशात्यपुः॥ इतः परं प्रपद्येत सप्तमे दिवसे मृतिं॥ इति तस्य वचः श्रुत्वा काल
कूटमिवोदितं॥ मूर्छितः स हसा भूमौ पपात नृपतिः शुचा॥ उत्थाप्य च समाश्वास्य स मुनिः करुणार्द्रधीः॥
उवाच माभैर्नृपते पुनर्वक्ष्यामि ते हितं॥ स्वर्गात्पुरा यदालोकं यदेकं निष्कलं परं॥ चिदानंदमयं ज्योति
स आद्यः केवलः शिवः॥ स एवादौ रजोरूपं सृष्ट्वा ब्रह्माणमात्मनः॥ सृष्टिकर्मणि युक्ताय तस्मै वेदांश्च प्र
त्तवान्॥ पुनश्च जगतामीशामात्मा तत्वैकसंग्रहः॥ सर्वोपनिषदां सारं रुद्राध्यायं च दत्तवान्॥ यदेक
मव्ययं साक्षात् ब्रह्मज्योतिः सनातनं॥ शिवात्मकं परं तत्वं रुद्राध्याये प्रतिष्ठितं॥ स आत्मभूस्तत्सृजन्
विश्वं चतुर्भिर्वदनैः स्वराट्॥ ससर्ज वेदांश्चतुरो लोकानां स्थितिहेतवे॥ तेत्रायं यजुषां मध्ये ब्र
ह्मणो दक्षिणान्मुखात्॥ अत्रोपनिषत्सारो रुद्राध्यायः समुद्धृतः॥ स एव मुनिभिः पूर्वैर्मरीच्यत्रि
पुरोगमैः॥ स हृद्येव धृतस्तेभ्यस्तच्छिष्या जगृहुश्च तं॥ तच्छिष्यपुत्रैस्तत्पुत्रैस्तत्पौत्रैश्च क्रमागतः॥
धृतो रुद्रात्मकः सोयं वेदसारः प्रकाशितः॥ एष एव परो मंत्र एष एव परं तपः॥ रुद्राध्यायजपः पुंसां

परं कैवल्यसाधनं ॥ ये महापातकैर्मुक्ता उपपातकिनश्च ये । रुद्राध्यायजपात्सद्यो स्तेपि यांति परां गतिं ॥२१॥
भूयोपि ब्रह्मणा सृष्टा । सदसन्मिश्रयोनयः ॥ देवतिर्यङ्मनुष्याद्याः स्ततः संपूजितं जगत् ॥ एषां कर्माणि
सृष्टानि स्वजन्मानुगुणानि च ॥ लोकास्तेषु प्रवर्त्तंते भुंजते तेचैव तत्फलं ॥ धर्ममेवानुतिष्ठंति पुण्यं विंदंति
तत्फलं । अधर्ममनुतिष्ठंति ते पापफलभोगिनः ॥ पुण्यं धर्मफलं स्वर्गो नरकस्तद्विपर्ययः ॥ तयोर्द्वावधि
पौ धात्रा कृतौ नातु मखांतकौ ॥ कामः क्रोधश्च लोभश्च मदमानादयोपरे ॥ अधर्मस्य सुता आसन्सर्वे
नरकनायकाः ॥ गुरुतल्पसुरापानं तथान्यः पुल्कसंगमः ॥ कामस्य तनया ह्येते प्रनाः परिकीकीर्त्तिताः ॥२७॥
क्रोधात्पितृवधो जातस्तथा मातृवधः परः ॥ ब्रह्महत्यैव कन्यैका क्रोधस्य तनयामी ॥ देवस्वहरणं चैव
ब्रह्मस्वहरणं तथा ॥ स्वर्णस्तेयमिति ह्येते लोभस्य तनयाः स्मृताः ॥ एतानाहूय बांगाकान् यमं पातकना
यकान् ॥ नरकस्य विवृध्यर्थं माधिपत्ये चकार ह ॥ ते यमेव समादिष्टा नव पातकनायकाः ॥ ते सर्वे सं राम
गतास्त्रयो घोरपातकनायकाः ॥ नरकान्पाचयामासुः स्वस्वैस्तैश्चोपपातकैः ॥ रुद्राध्याये भुवं प्राप्त ॥६४॥
साक्षात्कैवल्यसाधने ॥ भीताः प्रदुद्रुवुः सर्वे ते मी पातकनायकाः ॥ समं विज्ञापयामासुः सहान्यैरुप
पातकैः ॥ जयदेव महाराज लयं पाहि तव किंकराः ॥ नरकस्य विवृध्यर्थमधिकारात्कृतास्त्वया ॥ अधुना
वै

वर्त्तितुं लोके न शक्तास्मो वयं प्रभो॥ रुद्रजाप्यानुभावेन विदग्धाः श्चैव विहृताः॥ ग्रामे ग्रामे नदीकूवे पु
ण्येषायतनेषु च॥ रुद्रजाप्ते च पर्याप्ते कथं लोके चरामहे॥ प्रायश्चित्तसहस्रं वा गणयामो न किंचन॥ रु
द्रजाप्याक्षराण्येव सोढुं बत न शक्नुमः॥ महापातकमुख्यानामस्माकं लोकघातिनां॥ रुद्रजाप्यमयं घो
रं रुद्रजाप्यं महद्विषं॥ अतो निर्विषयं घोरमस्माकं व्यसनं महत्॥ रुद्रजाप्येन संप्राप्तमपनेतुं त्वमर्हसि॥ ५८॥
इति विज्ञापितः साक्षाद्यमः पातकनायकैः॥ ब्रह्मणोतिकमासाद्य तस्मै सर्वं न्यवेदयत्॥ दिव देव जगन्ना
थ त्वामहं शरणागतः॥ त्वया नियुक्तो मर्त्यानां न संति पृथिवीतले॥ रुद्राध्यायेन निर्हृतपातकानां
कुलं महत्॥ पातकानां कुले नष्टे नरकाः शून्यतां गताः॥ नरके शून्यतां याते मम राज्यं हि निःफलं॥
तस्मात्त्वयैव भगवन्नुपायः परिचिंत्यतां॥ यथा मे न विरुध्येत स्वामित्वं सर्वदेहिनां॥ इति विज्ञापि
तो धाता यमेन परिखिद्यता॥ रुद्रजाप्यविघातार्थमुपायं परिकल्पयत्॥ अश्रद्धां चैव दुर्मेधां मा
विद्यायाः सुते उभे॥ श्रद्धामेधाविघातिन्यौ मर्त्येषु समचोदयत्॥ ताभ्यां विमोहिते लोके रुद्राध्यायप
रान्मुखैः॥ यमः स्वस्थानमासाद्य कृतार्थ इव सोऽभवत्॥ पूर्वजन्मकृतैः पापैर्जीयंते तल्पायुषो नरः॥ ६६॥
तानि पापानि नश्यंति रुद्रजाप्यवतां नृणां॥ क्षीणेषु सर्वपापेषु दीर्घमायुर्बलोन्नतिः॥ आरोग्यं ज्ञान

मैश्वर्यंवर्धतेसर्वदेहिनां॥ रुद्राध्यायेनदेवेशंस्नापयंतिमहेश्वरं॥ तज्जलैःकुर्वतोस्नानंतेमृत्युंसंतरंति
ह॥ रुद्राध्यायाभिजप्तेनस्नानंकुर्वंतियेंभसा॥ तेषांमृत्युभयंनास्तिशिवलोकेमहीयते॥ जातरुद्राभि
षेकेनजूतायुजर्यायतेनरः॥ अशेषपापनिर्मुक्तःशिवस्यपदपीतोभवेत्॥ एवंरुद्राप्लुतस्नानंकरोतुतवपु
त्रकः॥ दशावर्षसहस्राणिमोदतांभुविशक्रवत्॥ अव्याहतबलैश्वर्योहतशत्रुर्निरामयः॥ निधूत
शेषपापोघःशास्ताराज्यमकंटकं॥ विप्रादिवेदविदःशांतावशिनःशंसितव्रताः॥ ज्ञानयज्ञतपोनिष्ठाः
सर्वतःसमदर्शनः॥ रुद्राध्यायजपंसद्यःकुर्वंतुस्यमकातराः॥ तेषांजपानुभावेनसद्यःश्रेयोभविष्यति॥
इत्युक्तेवंतंनृपतिर्महात्मातमेववव्रेप्रथमंक्रियाझुरु॥ अथापरानप्यमलाशयान्मुनीनावाहयामा
ससहस्रशःक्षणात्॥ तेविप्राःशांतमनसःसहस्रपरिसंख्यया॥ कलशानांशतंप्राप्तंपुण्यवृक्षरसे
पूतं॥ रुद्राध्यायेनसंजाप्यतमुर्वीपतिपुत्रं॥ विधिवत्स्नापयामासुःसंप्राप्तेसप्तमेदिने॥ स्नाप्यमाने
मुनिवरैःसराजन्यकुमारकः॥ अकस्माद्दिवसत्रस्तक्षणान्मूर्छामवापह॥ गतमूर्छोनृपसुतःपश्चात्ते
राहतान्मुनीन्॥ मांग्रहस्तंकृतमतिर्भीमदंष्ट्रोभयानकः॥ सोपियान्यैर्महावीरःपुरुषैरभिरक्षितः॥ ब
धापाशेनमहताहूरंनीतरवाभवं॥ एतावमहमद्राक्षंसवज्रिरस्तिरक्षितः॥ इत्युक्तवंतंनृपतेस्तनुजंमुनि
कैः

राम
॥६५॥

सत्तमः॥ आशीर्भिरभिनंद्याथ सपाद्योराद्मभ्युवत्॥ अथ सर्वान्द्विजश्रेष्ठान्दक्षिणाभिर्नृपोत्तमः॥ पूज
यित्वा वरान्नेन भोजयित्वा च भक्तितः॥ प्रतिगृह्याशिषस्तेषां मुनीनां ब्रह्मवादिनां॥ भुक्त्वा च बंधुज
नैः सार्द्धं सभार्यः समुपाविशत्॥ तस्मिन्समागते वीरे मुनिभिः सह पार्थिवे॥ आजगाम महायोगी दे
वर्षिर्नारदः स्वयं॥ तमागतं प्रेक्ष्य गुरुं मुनीनां सार्धं सदस्यैरविक्लैर्मुनींद्रैः॥ प्रणम्य भक्त्या विनिवेश्य
पीठे कृतोपचारं नृपतिर्बभाषे॥ ६३॥ राजोवाच॥ ६४॥ किं दृष्टमस्ति ते ब्रह्मन्त्रैलोक्ये किंचिदद्भुतं॥ तन्मे
ब्रूहि वयं सर्वे त्वद्वाक्यामृतलालसाः॥ ६५॥ नारद उवाच॥ ॥ अत्र चित्रं महद्दृष्टं व्योम्नो व्यवतरता मया॥ तच्छ
णुष्व महाराज सहैभिर्मुनिपुंगवैः॥ अद्य मृत्युरिहायातो निहंतुं तव पुत्रकं॥ दंडहस्तोऽतिदुराधर्षो लोकमुद्वेजय
न्सदा॥ ईश्वरोपि विदित्वैनं त्वत्पुत्रं हंतुमागतं॥ सहसा पार्श्वदेः कैश्चिद्वीरभद्रमचोदयत्॥ स आगत्याह
मृत्युं त्वत्पुत्रं हंतुमागतं॥ गृहीत्वा च दृढं बध्वा दंडेनाभ्यहनद्दृषा॥ तन्नीयमानं जगदीशसन्निधिं शीघ्रं विदि
त्वा भगवान्यमः स्वयं॥ कृतांजलिर्देवजयेत्युदीरयन्प्रणम्य मत्तो र्भानिजगादशंकितं॥ ७१॥ यम उवाच॥
देवदेव महारुद्र वीरभद्र नमोस्तु ते॥ निरागसि कथं मत्तो कोपस्तव समुत्थितः॥ निजकर्मानुबंधेन रा
जपुत्रं गतायुषं॥ प्रहर्तुमुद्यतं मत्तो कोपराधो वद प्रभो॥ ७२॥ वीरभद्र उवाच॥ ॥ दशवर्षसहस्रायुः

१२६

७७ ७८

सरोजतनयः कथं॥ विपत्तिमंतरा याति स्कंदस्नानमहाभुजा॥ अस्ति वेदरथ संदेहो मम वाक्येन निवारिते॥ चि

त्रगुप्तं समानीय पप्रछाद्यैव चमाचिरं॥ नारद उवाच॥७५॥ अथाकुश्चित्रगुप्तोयं यमेन सहसागतः॥

आयुःप्रमाणं त्वत्सूनोः परिपृछ स चोऽब्रवीत्॥ द्वादशाब्दं च तस्यायुरित्युक्त्वा च विनिर्ययौ॥ पुनर्लेख

करः प्राह सुवर्णा पुत्रजीवितं॥ अथ भीतो यमो राजा वीरभद्रं प्रसाद्य च॥ कथंचिन्मोचयामास समृत्युदुव

रबंधनात्॥ वीरभद्रेण मुक्तोथ यमो गान्निजमंदिरं॥ वीरभद्रश्च कैलासमहं प्राप्तस्तवांतिके॥ अथो तव

कुमारोयं रुद्रजाप्यानुभावतः॥ मृत्योर्भयानतिक्रम्य सुखी जातोयुतं समा॥ इत्युक्त्वा नृपमामंत्र्य नारद

स्त्रिदिवं गतः॥ महर्षयः प्रमुदितास्ते स्वं स्वं जग्मुर्यथाश्रमं॥ ये कीर्त्तयंति मनुजाः परमेश्वरस्य परे माहात्म्यमेत

दथ कर्णपुटैः पिबंति॥ ते जन्मकोटिकृतपातकगा॥ तैर्विमुक्ताः शांताः प्रयांति परमं पदमिंदुमौले॥१००॥ राम

॥ ॥इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे रुद्रजाप्यमहिमानामैकोनविंशोध्यायः॥ ॥श्री॥ ॥ ॥

॥सूत उवाच॥ ॥अथातः संप्रवक्ष्यामि सर्वधर्मोत्तमोत्तमं॥ उमामहेश्वरं नाम व्रतं सर्वार्थसाधनं॥ ॥१ ॥६६॥

आनर्त्तेष्वभवत्कश्चिन्नाम्ना वेदरथो द्विजः॥ कलत्रपुत्रसंपन्नो विद्वानुत्तमवंशजः॥ तस्यैव वर्त्तमानस्य

ब्राह्मणस्य गृहाश्रमे॥ बभूव शारदा नाम कन्या कमललोचना॥ तारूपलक्षणोपेता बाला द्वादशहायना॥

(127)

यथावेपञ्जनाभाख्योमतद्दारोवरद्विजः॥ महाधनस्यमरस्यसदाराजसमस्य च॥ याच्याभंगभया
त्तस्य तां कन्यां प्रददौ पिता॥ मध्यंदिने कृतोद्वाहः स विप्रः श्वशुरालये॥ संध्यामुपासितुं सायं सरस
स्तटमाययौ॥ उपास्य संध्यां विधिवत्प्रत्यागच्छत्तमोवृते मार्गे दृष्टो भुजंगेन ममार निजकर्मणा॥ १॥
तस्मिन्मृते कृतोद्वाहो सहसागत्य बांधवाः॥ चुकुशुः शोकसंतप्ताश्वश्रुरौ सा च कन्यका॥ निकृत्य
तं बधुजनं जग्मुः स्वस्वनिकेतनं॥ तदा प्राप्तवैधव्या पितुरे बालपेस्थिता॥ वृद्धत्वादनभिष्टेन पि
त्रा विरहिता सती॥ निनाय कतिचिन्मासान्सा बाळपित्ववेश्मनि॥ एकदा नैध्रुवो नाम कश्चिद्व
तमो मुनिः॥ अंधः शिष्यकरग्राही तन्मंदिरमुपाययौ॥ तस्मिन्वृद्धे गृहं प्राप्ते गतेषु क्वापि बंधुषु॥ सा
क्षादिव महादेवं सा बाला समपूजयत्॥ स्वागतं ते महाभागापीठेस्मिन्नुपविश्यतां॥ नमस्ते मुनिना
थाय किं प्रियं करवाणिते॥ इत्युक्त्वा भक्तिमास्थाय कृत्वा पादावनेजनं॥ वीजयित्वा परिश्रांतं तं
मुनिं पर्यतोषयत्॥ अंतःप्रवेश्य तं बाला कृत्वाभ्यंगं स्वपाणिना॥ कृतस्नानं च विधिवत्कृतदेवा
र्चनं मुनिं॥ सुखासनोपविष्टं तं धूपमाल्यानुलेपनैः॥ अर्चयित्वा वरान्नेन भोजयित्वा सुसादरं॥ ६
भुक्त्वा सम्यक्सन्मानकैः कृतश्चानंदनिर्भरः॥ चकारांधो मुनिस्तस्यै सुप्रीतः परमाशिषं॥ विहत्य

भर्त्रासरुद्दावदायुलब्ध्वासुतंसर्वगुणैरुपेतं।। कीर्त्तिंचलोकेमहतीमदाप्यप्रसादयोग्याभवदेवता
नां।। इत्याशिष्यापदत्तेतेनमुनिनामंतवष्ठुषा।। निशम्यविस्मितावाक्यप्रत्युवाचकृतांजलिः।। ब्रसंव
चनंसत्यंकदाचिन्नमृषाभवेत्।। तदेतनमंदभाग्यायांकथंनपिफलिष्यति।। लूनायामपिसद्वृत्तिः
भुनक्त्यामिवसत्क्रिया।। विफलामंदभाग्यायामाशीर्ब्रह्मविदामपि।। सैषाहिविधवाब्रह्मन्दुःक
र्मफलभागिनी।। तवाशीर्वचनस्यास्यकथंयोग्यास्मिसांप्रतं।।२२।। मुनिरुवाच।। ।। त्वामनालक्ष्य
यत्प्रोक्तंमयेनामिमयाधुना।। तदेवसाधयिष्यामिकुरुमद्वचनंशुभे।।२३।। मुनिरुवाच।। सचैत्रेवाम
र्गशीर्षेवाश्शुक्लपक्षेशुभेदिने।। व्रतारंभंप्रकुर्वीत नारदोवाच।।२४।। त्वयोपदिष्टंयत्नेनकरिष्याम्यतिदु
श्चरं।। तद्व्रतंब्रूहिमेब्रह्मन्विधानंवदविस्तरात्।।२५।। मुनिरुवाच।। चैत्रेवामार्गशीर्षेवाश्शुक्लपक्षेशुभे
दिने।। व्रतारंभंप्रकुर्वीतपपागुर्रुरनुज्ञया।। अष्टम्यांचचतुर्दश्यामुभयोरपिवर्णयोः।। मंडपंकार
येद्रम्यंवितानाद्यैरलंकृतं।। फलपल्लवपुष्पाद्यैस्तोरणैश्चसमन्वितं।। पंचवर्णैस्तुतन्मध्येरजोभिःपद्म
मुद्धरेत्।। चतुःशालिदलैर्बाह्येद्वात्रिंशद्भिस्तदंतरं।। तदंतरेषोडशभिरष्टभिश्चतदंतरे।। एवंपद्मंस
मुद्धृत्यपंचवर्णमनोरमं।। चतुरस्रंततःकुर्याद्दंतवर्तुलमुत्तमं।। व्रीहितंदुलराशींचतन्मध्येचसकूर्चकं।

कूर्चोपरिसुसंस्थाप्यकलशंधान्यपरीतं॥ कलशोपरिविन्यस्यवस्त्रंवर्णसमन्वितं॥ तस्योपरिष्टात्सौव
र्णेप्रतिमेशिवयोःशुभे॥ निधायपूजयेद्भक्त्यायथाविभवविस्तरं॥ पंचामृतैःसुस्नाप्यततःशुद्धोद
केनच॥ रुद्रैकादशकंजप्त्वापंचाक्षरशतात्मकं॥ अभिमंत्र्यसुसंस्थाप्यपीठेहेममयेर्चयेत्॥ एवंसु
खासनासीनोधौतशुक्लांबरःशुचिः॥ पीठमामंत्र्यमंत्रेणप्राणायामात्समाचरेत्॥ संकल्पंप्रवदेत्त
त्रशिवाभ्यांविहितांजलिः॥ यानिपापानिघोराणिजन्मांतरशतेष्वपि॥ तेषांसर्वविनाशाय
शिवपूजांसमारभेत्॥ सौभाग्यविजयारोग्यमैश्वर्यादिविवृद्धये॥ स्वर्गापवर्गसिध्यर्थंकरि
ष्येशिवपूजनं॥ इतिसंकल्पमुच्चार्ययथावस्तुसमाहितः॥ अंगन्यासंततःकृत्वाध्यायेदीशंचपा
र्वतीं॥ कुंदेंदुधवलाकारंनानाभरणभूषितं॥ वरदाभयहस्तंचबिभ्राणंपरशुंमृगं॥ सूर्यकोटि
प्रतीकाशंजगदानंदकारणं॥ जाह्नवीजलसंसिक्तदीर्घपिंगजटाधरं॥ उरगेंद्रफणोन्नद्धमहामु
कुटमंडितं॥ शीतांशुखंडविलसत्कोटीरांतरभूषणं॥ उन्मीलत्फालनयनंतथासूर्येंदुलोचनं॥ नीलकं
ठंचतुर्बाहुंगजेंद्राजिनवाससं॥ रत्नसिंहासनारूढंकारुण्यामृतवारिधिं॥ देवींचदिव्यावयवांबा
लसूर्यायुतद्युतिं॥ बालवेषांचतन्वंगींबालशीतांशुशेखरां॥ पाशांकुशाभयवरान्बिभ्रतींचचतु

मे

भुजां॥ प्रसादसुमुखीं बालां लीलारसविहारिणीं॥ लसत्कुरवकाशोकपुन्नागनवचंपकैः॥ कृताव
तंसमुत्फुल्लमल्लिकोत्कलितालकां॥ कांचीकलापपर्यस्तजघनाभोगशालिनीं॥ उदारकिंकिणीश्रे
णीनूपुराढ्यपदद्वयां॥ गंडमंडलसंयुक्तरत्नकुंडलरोचिषां॥ बिंबाधरानुरक्ताभ्रकशाद्दशानरु
म्नवां॥ लीलालोलसितापांगीं भक्ताभयकारिणीं॥ एवं ध्यात्वा तु हृन्मध्ये जगतः पितरौ शिवौ॥
जप्त्वा तदात्मकं मंत्रं तदंते बहिरर्चयेत्॥ आवाह्य प्रतिमायुग्मे कल्पयेदासनादिकं॥ अर्घ्यं च
दद्याच्छिवयोर्मंत्रेणानेन मंत्रवित्॥ नमस्ते पार्वतीकांत नमस्ते वरदर्षभ॥ श्रीत्र्यंबक महादेव गृ
हाणार्घ्यं नमोस्तु ते॥ नमस्ते देवि विश्वेशि प्रसन्नाभयहारिणी॥ अंबिके वरदे देवी गृहाणार्घ्यं शि
वप्रिये॥ इति त्रिवारमुच्चार्य दद्यादर्घ्यं समासतः॥ गंधपुष्पाक्षताः कल्प्या धूपदीपांश्च कल्पयेत्॥
नैवेद्यं पायसेनैव घृताक्तं परिकल्पयेत्॥ जुहुयान्मूलमंत्रेण हविरष्टोत्तरं शतं॥ ततउद्वास्य नैवेद्यं ध
पनीराजनादिकं॥ कृत्वा निवेद्य तांबूलं नमस्कुर्यात्समाहितः॥ अथाभ्यर्च्योपहारैः पूजयेद्दंपती॥
एवं संवत्सरं कुर्याद्व्रतं पापहरं बुधः॥ ततः संवत्सरे पूर्णे व्रतोद्यापनमाचरेत्॥ एवं सायंतनीं पूजां कृत्वा
विप्रानुमोदितः॥ भुंजीत वाग्यतो रात्रौ हविष्यं क्षीरभावितं॥ प्रातरुत्थाय द्विजप्रेरितः स्नापयेत्प्रतिमां जलैः॥

आगमोक्तेन विधिना संपूज्य गिरिजाशिवौ ॥ सवस्त्रं ससुवर्णं च कलशं प्रतिमान्वितं ॥ दत्वाचार्या
य महते सदाचाररताय वै ॥ ब्राह्मणान्भोजयेत्पश्चाद्यथाशक्त्याभिपूज्य च ॥ दत्वा च दक्षिणां ते
भ्यो गोहिरण्याम्बरादिकं ॥ भुंजीत तदनुज्ञातः सहेष्टजनबंधुभिः ॥ एवं यः कुरुते भक्त्या व्रतं त्रैलो
क्यविश्रुतं ॥ त्रिःसप्तकुलमुद्धृत्य भुक्त्वा भोगान्यथेप्सितान् ॥ इंद्रादिलोकपालानां स्थानेषु रमते
सदा ॥ ब्रह्मलोके च रमते विष्णुलोके च शाश्वते ॥ शिवलोकवसं प्राप्य तत्र कल्पशतं पुनः ॥ भुक्त्वा भो
गान्सुविपुलान् शिवमेव प्रपद्यते ॥ महाव्रतमिदं वत्से त्वमपि श्रद्धया चर ॥ अतीव दुर्लभं चापि
लब्ध्वा सैव मनोरथं ॥ इत्यादिष्टा मुनींद्रेण सा बाला मुदिता भृशं ॥ प्रत्ययहीमतद्भक्त्या वचनं सु
मनोहरं ॥ अथ तस्याः समायाता तापि तस्मात्सहोदराः ॥ तं मुनिं सुखमासीनं दृष्ट्वा कृतभोजनं ॥ सह
सागत्य ते सर्वे नमश्चक्रुर्महात्मने ॥ प्रसीद नः प्रसीदेति गृणंतः पर्यपूजयन् ॥ श्रुत्वा च ते तया बालाभ्य
पूजितं परमं मुनिं ॥ अनुग्रहं कृतं तस्यै श्रुत्वा हर्षं परं ययुः ॥ ते कृतांजलयः सर्वे तमूचुर्मुनिपुंगवं ॥ अ
द्य धन्या वयं सर्वे तवागमनमात्रतः ॥ पावितं नः कुलं सर्वं गृहं च सफलीकृतं ॥ इयं च शारदा कन्या नाम
वैधव्यमागता ॥ केनापि कर्मभारेण दुर्विलंघ्येन तपसा ॥ सैषा च तव पादाब्जं प्रपन्ना शरणार्थिनी ॥ इ
मांसमुद्धरास्मात्सुघोराद्दुःखसागरात् ॥ त्वयापि तावदत्रैव स्थातव्यं नो गृहांतिके ॥ अस्मिन्गृहे मठे

स्मिन्वा स्नातपूजाजपोचितैः॥ एषा च बाला भगवन् कुर्वंती त्वत्पदार्चनं॥ अत त्वत्सन्निधावेव चरि
ष्यति महामुने॥ यावत्समाप्तिमायाति व्रतमस्यास्त्वदंतिके॥ उषित्वा तावदत्रैव कृतार्थान्कुरु नो गु
रो॥ एवमभ्यर्थितः सोथ तस्याभ्रात्रजनादिभिः॥ तथेति स मुनिश्रेष्ठ तत्रैवास मठे सुखे॥ सापि
तेनोपदिष्टेन मार्गेण गिरिजाशिवौ॥ अर्चयंती व्रतं सम्यक् चचार परितोषयत्॥ २८॥ इति श्री स्कं
दपुराणे ब्रह्मोत्तरखंडे उमामहेश्वरव्रतोपाख्यानं नाम विंशो ध्यायः॥ २०॥ श्री॥ ॥ सूत उवाच॥
॥ एवं महाव्रतं तस्याश्चरंत्या गुरुसन्निधौ॥ संवत्सरो व्यतीयाय शिवांघ्रिध्यतचेतसः॥ संवत्सरांते
सा बाला तत्रैव पितृमंदिरे॥ चकारोद्यापनं सम्यग्विप्रभोजनपूर्वकं॥ दत्वा च दक्षिणां तेभ्यो ब्रा
ह्मणेभ्यो यथार्हतः॥ विसृज्य तान्नमस्कृत्य सापि तस्या मधिनंदिता॥ उपोषिता स्वयमपि तदा नियममा
स्थिता॥ जजाप परमं मंत्रमुपदिष्टं महात्मना॥ अथ प्रदोषसमये प्राप्ते संपूज्य शंकरं॥ तस्मिन्नरुं
लिकमठे गुरोस्तस्य स्वे वसन्निधौ॥ जपार्चनरता साध्वी ध्यायंती परमेश्वरं॥ तस्मिन् जागरणे रा — राम
त्रौ समुपविश्य शिवांतिके॥ तस्यां रात्रौ तया सार्धं समुनिं जगदंबिका॥ जपध्यानतपोभिश्च तोष — ॥ ६२॥
यामास पार्वती॥ तस्याश्च भक्त्या व्रतभाविताया मुनेस्तपोयोगसमाधिना च॥ तुष्टा बभूव जननी ज
गदेकमाता प्रादुर्बभूव द्रुतसौम्यमूर्त्तिः॥ प्रादुर्भूता यदा गौरी तयोरग्रे नगात्मजा॥ अंधोपि तत्र

133

णादेव मुनिःश्रापदग्धोद्र्यं॥ तौवीक्ष्य जगतोधात्रीसाविर्भूतांपुरस्थितां॥ निपेवतुस्तत्पदयोःसमु
निःसाचकन्यका॥ तंभक्तिभावोच्छ्वसितामला॥ग्रापावानंदवाष्पोक्षित सर्वगात्रौ॥ उत्थाप्यदेवीरू
पपापरिप्लुताप्रेम्णाबभाषे मृदुवल्गुभाषितं॥ प्रीतास्मितेमुनिश्रेष्ठ वत्सेतुष्टास्मितेनघ॥ किं
ददामीप्सितं देवी देवानामपिदुर्लभं॥१२॥ मुनिरुवाच॥ ॥एषातुनारदानामकन्याचगतस्पत
का॥ मयाप्रतिश्रुतं चास्मै तुष्टेनगतचक्षुषा॥ सैहभर्त्राचिरं कालंविहृत्य सुखमुत्तमं॥ लभ
स्वेतिमयाप्रोक्तंसत्यंकुरुनमोस्तुते॥१४॥ श्रीदेव्युवाच॥ ॥एषापूर्वभवे बाला द्राविडस्यद्विजन्म
नः॥ आसीद्वितीयादपिता भामिनीतिचविश्रुता॥ साभर्त्तुःप्रेयसीनित्यंरूपमाधुर्यपेशला॥
भर्त्तारं वञ्चयामासानित्यं रूपवत्पादिकैतवैः॥ अस्यामासक्तहृदयः सविप्रोमोहयंत्रितः॥ कदाचिन
पित्रैवागात्ज्येष्ठपत्नींपतिव्रतां॥ अनस्यागमनाङ्कर्तुरनपत्साश्चवत्तुसा॥ सदाशोकेनसंतप्ताका
केनानि घनंगता॥ अस्यागृहसमीपस्थोयःकश्चिद्ब्राह्मणोयुवा॥ इमांवीक्ष्यास्यचार्वंगीकामार्त्तः
करमग्रहीत्॥ अनयारोषताम्राक्ष्यासविप्रस्त्वचघोरितः॥ इमांस्त्वत्वादिवानक्तंनिधनंप्रत्यपद्य
त॥ एषासंमोह्यभर्त्तारंज्येष्ठपत्न्याःपराङ्मुखं॥ वकाय तेनपापेनस्वचास्मिन्विधवाभवत्॥ पांकु
र्वींतिस्त्रियोलोके नाथ्यापत्याश्चविप्रियं॥ तासांकौमारवैधव्यमेकविंशतिजन्मनि॥ यदेतयापूर्वभवे

134

मल्लगामहतीकृता॥ तेनपुण्येन तत्पापं नष्टमस्याः पुरातनं॥ एनांसंस्मृत्य यो विप्रोन्मतः का
मेन मोहितः॥ सोऽस्याः पाणिं कृत्वा भवेऽस्मिन् निधनं गतः॥ प्राग्जन्मपतिरेतस्याः पांड्यदेशो सोऽधु
ना॥ जातोविप्रवरः श्रीमान्सदारः सपरिच्छदः॥ तेनभर्त्रा प्रतिनिशं सैषाप्रेम्णाभिसंगता॥
स्वप्नेरतिसुखे यास्या प्रेष्ठा जागरणादपि॥ षष्ठ्युत्तरद्विधयोजनदूरसंस्थोदेशादितो द्विजवरः स
च कर्मगत्या॥ एतां वधूं प्रतिनिशं मनसोऽभिरामां स्वप्नेषु पश्यति विरंरतिमादधानः॥ एषा वैस्व
प्नसंगत्या पत्युः प्रतिनिशं सती॥ कालेन लप्स्यते पुत्रं वेदवेदांगपारगं॥ एतस्यास्तनयं
जातमालक्ष्य चित्तसंगमात्॥ सोऽपि विप्रो निशां स्वप्ने द्रक्ष्यति प्रेमभावितं॥ अनयाराधि
तं सर्वं भवे साहंगतामुने॥ अस्या वरप्रदानार्थमाविर्भूतास्मि सांप्रतं॥ग॥ सूत उवाच॥ ॥
अथोवाच महादेवी तां बालां प्रतिसादरं॥ अयि वत्से महाभागे शृणु मे परमं वचः॥ यदा कदाचि
द्रष्टारं कापिदेशोपुरातनं॥ द्रक्ष्यसि स्वप्नदृष्टं प्राक् तास्यसि त्वं विचक्षणा॥ त्वां द्रक्ष्यति स विप्रोऽपि
रूविरां रतिदायिनीं॥ तदापरस्परालापो युवयोः संभविष्यति॥ तदा स्वतनयं भद्रे तस्मै देहि वधुश्च
तं॥ फलं चापि व्रतस्यास्य तस्य हस्ते समर्पय॥ ततः प्रभृति तस्यैव वशेऽतिष्ठ सुमध्यमे॥ युवयोर्दे
हिकः संगो माभूत्स्वपनतरोदृते॥ कालात्पचत्वमापन्ने तस्मिन्ब्राह्मणसत्तमे॥ अग्निंप्रवेक्ष्यते नैव

राम
॥७०॥

सहयास्यतितस्मदौ॥ पुत्रस्तेभवितासुभ्रू सर्वलोकमनोरम॥ संपदश्चभविष्यंति प्राप्स्यतेपरमंप
दं॥ इत्युक्त्वात्रिजगन्माता ददौतस्यैमनोरथं॥ तयोःसंपश्यतोरेवंक्षणेनादर्शनंगता॥ सापिबाला
वरंलब्ध्वापार्वत्याकरुणात्मना॥ अवापपरमानंदंपूजयामासतंगुरुं॥ तस्यारात्र्यांव्यतीतायांसमु
निर्लब्धलोचनः॥ तस्याःपित्रोश्चतत्सर्वंरहस्यादवदद्धर्मवित्॥ अथसर्वानुपामंत्र्य शारदांचयशस्वि
नी॥ विधायपाणिग्रहंतेषां ययौस्वैरगतिर्मुनिः॥ एवंदिनेषुगच्छत्सुसाबालाचप्रतिक्षणं॥ भर्त्तुः
समागमंलेभेस्वप्नेसुखविवर्धनं॥ गौरीवरप्रभावेनशारदाविषदव्रता॥ दधारगर्भंस्वप्नेपिभ
र्त्तुःसंगानुभावतः॥ तांमत्वाभर्तृरहितांशारदांगर्भिणींसती॥ सर्वेधिक्धिगितिप्रोचुर्जाति
पीचमुमुचुः॥ सर्पदष्टस्यतद्भर्तुरहितांज्ञातिबांधवाः॥ तांवार्त्तांदुःकृतांदृष्ट्वाययुस्तात्पितुर्मं
दिरं॥ अथसर्वेसमायाताग्रामवृद्धाश्चपंडिताः॥ समाजंकर्त्तुमागत्यकुलवृद्धैःसमन्विताः॥ अं
तर्वत्नींसमाहूयशारदांविनयानतां॥ अंतर्जयसुसंरुद्धाः केचिदासंपराङ्मुखाः॥ अभिचारिणि
डुवृद्धे किमेतत्तेविचेष्टितं॥ अस्मत्कुलस्यदुःकीर्त्तिंकृतवत्यसिबालिशे॥ इतिसंतर्जयतस्तेग्रामवृ
द्धमनीषिणः॥ सर्वेसमंत्रयामासुःकिंकुर्मइतिभाषिणः॥ वृद्धाःकेचनतत्रोचुस्तांबालांप्रति
निर्दयः॥ एषापरमतिर्बालाकुलक्षयविनाशिनी॥ कृत्वास्याःकेशवपनंकर्णौछित्वाचनासिकां॥

निःसार्यतबहिर्ग्रामात्परित्यक्त्वास्वगोत्रतः॥ इतिसर्वेसमालोक्यतांयथाकर्त्तुमुद्यताः॥ अथांतरिक्षा
त्संभूताशुश्रुवेवागगोचरा॥ अनयानकृतंपापंनचैवकुलदूषणं॥ व्रतभंगोनचाप्यस्यपवित्राशु
द्धमंगना॥ अतःपरमिमंनारीजारिणींनिवदंतिये॥ तेषांदोषविमूढानांसद्योजिह्वाविदीर्यते॥ इत्यंतरि
क्षजनितांवाणींश्रुत्वाशरीरिणीं॥ सर्वेप्रजहृषुस्तस्याजननीजनकादयः॥ ततःससंभ्रमाःसर्वेग्रा
मवृद्धाःसभासदः॥ मुहूर्त्तंमौनमालंब्यभीतास्तस्थुरधोमुखाः॥ तत्रकेचिदविश्वासान्मिथ्यावाणीति
वादिनः॥ तेषांजिह्वाद्विधाभूत्वाववमुस्तेकृमीन्क्षणात्॥ ततःसंप्रजपामासुस्तांबालांज्ञातिबांधवाः॥
बंधुस्त्रियश्चवृद्धाश्चशशंसुःसाधुसाध्विति॥ मुमुचुःकेचिदानंदबाष्पबिंदून्कुलोत्तमाः॥ कुल
स्त्रियःप्रमुदितास्तामाश्लिष्यसमाश्वसन्॥ अथतत्रापरेप्रोचुरेवंवदतिनानृतं॥ कथमेषाद
धौगर्भंस्त्रीवाचस्खलितापिच॥ इतिसर्वान्सभासंस्थान्संशयाविष्टचेतसः॥ विलोक्यवृद्धस्त
त्रैकोब्रभाषेलोकतत्त्ववित्॥ मायामयमिदंविश्वंदृश्यतेश्रूयतेपितत्॥ विभात्यसंभाव्यंवासंसा
रेस्मिन्भ्रममातुरे॥ अनिरूप्यमद्भुतार्थंमायायोजयतिस्फुटं॥ ईश्वरस्यवशामायातस्याःकोवेदचेष्टि
तं॥ यथपकेतोस्तुराजर्षेःशुक्रंनिपतितंजले॥ सम्भक्ष्यंतज्झषीबालावेत्यागर्भंदधौकिल॥ मुनेर्विभांड
कस्यापिभुक्त्वापीत्वासहांभसा॥ हरिणीगर्भिणीभूत्वाऋष्यशृंगमजीजनत्॥ सुराष्ट्रस्यतथाराज्ञःक

राम
॥७२॥

K K S U LIBRARY
RAMTEK
441 106
M998
Dist. Nagpur

```
[OrderDescription]
,CREATED=28.09.20 13:46
,TRANSFERRED=2020/09/28 at 14:08:51
,PAGES=136
,TYPE=STD
,NAME=S0003744
,Book Name=M-998-SKANDPURAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
```

```
FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
```

```
FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
```

```
FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,
```